CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

53-Shelf-2

श्यामारहस्यम् ।

श्रीपूर्णानन्दगिरिपरमहंसपरिव्राजक-
विरचितम् ।

पण्डितकुलपतिना
वि, ए, उपाधिधारिणा
श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण
संस्कृतं प्रकाशितञ्च ।

द्वितीयसंस्करणम् ।

कलिकातानगरे
कलिकाता यन्त्रे
मुद्रितम् ।

ई १८९६ ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

DYAR LIBRARY
Rare
1896
Par
SR
(a)
Ph.C

पण्डितकुलपतिः

श्रीजीवानन्दविद्यासागर वि, ए,

PANDIT KULAPATI

JIBANANDA VIDYASAGARA, B. A.

Superintendent, Free Sanskrit College, Calcutta.

E7 AUG 1999
17,073

1896

श्यामारहस्यम् ।

श्रीपूर्णानन्दगिरिपरमहंसपरिव्राजक-

विरचितम् ।

पण्डितकुलपतिना

वि, ए, उपाधिधारिणा

श्रीजीवानन्दविद्यासागरभट्टाचार्य्येण

संस्कृतं प्रकाशितञ्च ।

द्वितीयसंस्करणम् ।

कलिकातानगरे

कलिकाता यन्त्रे

मुद्रितम् ।

ई १८९८ ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

श्यामारहस्यम् ।

प्रथमः परिच्छेदः ।

ओं नमः परदेवतायै ।

देवीं दानवदैत्यदर्पनिवहानुन्मूलयन्तीं शिवां
ब्रह्मानन्दमहेशमौलिमणिभिः संसेविताङ्घ्रिद्वयाम् ।
नत्वा श्रीगुरुपादपद्मपरमामोदामृतप्लावितः
पूर्णानन्दगिरिस्तनोति विमलां श्यामारहस्याभिधाम् ॥
स्वतन्त्रं वीरतन्त्रञ्च तन्त्रं फेत्कारिणीं तथा ।
कालिकाकुलसर्वस्वं कालीतन्त्रञ्च यामलम् ॥
कुलचूड़ामणिञ्चैव कुमारीतन्त्रमेव च ।
कुलार्णवं तथा कालीकल्पं भैरवतन्त्रकम् ॥
कालिकाकुलसद्भावं तथा चोत्तरतन्त्रकम् ।
गुरूणाञ्च मतं ज्ञात्वा साधकानां तथा मतम् ॥
शुद्धबुद्धिस्वभावार्थं वक्ष्यामि मोक्षकारिणीम् ॥

तदुक्तं स्वतन्त्रे ।

क्रोधीशं विन्दुयुक् कान्ते ! त्रिमूर्त्यग्निसमायुतम् ।
त्रिर्लिखेत् परतो देवि ! हुंकारद्वयमेव च ।
मायाद्वयं समालिख्य अत्रिसंवर्त्तसूक्ष्मयुक् ॥
त्रैकालिके सप्तवर्णान् पूर्ववत् परमेश्वरि ! ।
स्वाहान्तेयं महाविद्या द्वाविंशत्यक्षरा परा ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अनया सदृशी विद्या नास्ति ज्ञाने तु मामके ॥

कुमारीतन्त्रेऽपि। भैरव उवाच।

अतिगुह्यतरं ह्येतत् ज्ञानात्मकं सनातनम्।
अतीव च सुगोप्यञ्च कथितुं नैव शक्यते ॥
अतीव च प्रियासीति कथयामि तव प्रिये!।
रूपाणि बहुसंख्यानि प्रकृतेः सन्ति भाविनि! ॥
तेषां मध्ये महेशानि! कालीरूपं मनोहरम्।
विशेषतः कलियुगे नराणां भुक्तिमुक्तिदम् ॥
तस्यास्तूपासकाश्चैव ब्रह्मविष्णुशिवादयः।
चन्द्रः सूर्य्यश्च वरुणः कुबेरोऽग्निस्तथापरः ॥
दुर्वासाश्च वशिष्ठश्च दत्तात्रेयो बृहस्पतिः।
बहुना किमिहोक्तेन सर्वे देवा-उपासकाः ॥
कालिकायाः प्रसादेन भुक्तिमुक्तिः करे स्थिता ॥
तस्या मन्त्रं प्रवक्ष्यामि यतो रक्षेद्युगत्रयम्।
ककारं वह्निसंयुक्तं रतिविन्दुसमन्वितम् ॥
त्रिगुणञ्च ततः कूर्चयुग्मं लज्जायुगं तथा।
दक्षिणे कालिके चेति पूर्ववीजानि वेष्टयेत् ॥
वह्निजायावधिः प्रोक्तः कालिकाया मनुर्मतः।
न सुसिध्याद्यपेक्षास्ति नारिमित्रादिदूषणम् ॥

श्रुतिरपि।—अथहैनां ब्रह्मरन्ध्रे ब्रह्मस्वरूपिणीमाप्नोति सुभगां त्रिगुणयुक्तां कामरेफेन्दिरां विन्दुमेलनरूपां एतत्त्रिगुणितामादौ तदनु कूर्चद्वयम्। कूर्चवीजञ्च—व्योमषष्ठस्वरविन्दुमेलनरूपम्। तदेव द्विरुच्चार्य्य भुवनां द्वयम्। भुवना तु व्योमज्वलनेन्दिरा शून्यमेलनरूपा। तदुक्तं—दक्षिणे कालिके तवाभिमुख्यता। तदनु वीजसप्तकमुच्चार्य्य बृहद्भानुजायामुच्चरेत्। मत्वा शिवमयो भवेत्। सर्वसिद्धीश्वरो

भवेत्। गतिस्तस्यास्ति नान्यस्य स तु नारीश्वरः स तु दैत्येश्वरः स तु सर्वेश्वर इति।

भैरव उवाच।

नात्र चिन्ताविशुद्धिर्वा नारिमित्रादिदूषणम्।
न वा प्रयासबाहुल्यं समयासमयादिकम् ॥
देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये।
पन्नगैराक्षसैर्वन्यैर्मुनिभिश्च मुमुक्षुभिः ॥
कामिभिर्धर्मिभिश्चार्थलिप्सुभिः सेवितां पराम्।
न चित्तव्ययबाहुल्यं कायक्लेशकरं न च।
तत्र यश्चिन्तयेन्मन्त्रो सर्वसिद्धिसमृद्धिदाम् ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः।
गद्यपद्यमयी वाणी सभायां तस्य जायते ॥
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः।
वह्नेः शैत्यं जलस्तम्भं गतिस्तम्भं विवस्वतः ॥
दिवारात्रिव्यत्ययञ्च वशीकर्त्तुं क्षमो भवेत्।
सर्वस्यैव जनस्यैव वल्लभः कीर्त्तिवर्द्धनः ॥
अन्ते च भजते देव्या गणत्वं दुर्लभं नरैः।
चन्द्रसूर्य्यसमो भूत्वा वसेत् कल्पायुतं दिवि।
न तस्य दुर्लभं किञ्चिद् यः स्मरेत् घोरदक्षिणाम् ॥

अथास्याः सपर्य्याविधिर्लिख्यते। ब्राह्मे मुहूर्त्ते उत्थाय बद्धपद्मासनः शिरःस्थाधोमुखशुक्लवर्ण-सहस्रदलकमलकर्णिकास्थ-शशहीनशरदिन्दुसुन्दर-चन्द्रमण्डलान्तर्गतहंसपीठे निजगुरुं ध्यायेत्। यथा।

शुद्धस्फटिकसङ्काशं शुद्धक्षौमविराजितम्।
गन्धानुलेपनं शान्तं वराभयकराम्बुजम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मन्दस्मितं निजगुरुं कारुण्येनावलोकिनम् ।
वामोरुशक्तिसंयुक्तं शुक्लाभरणभूषितम् ॥
स्वशक्त्या दक्षहस्तेन धृतचारुकलेवरम् ।
वामे धृतोत्पलायाश्च सुरक्तायाः सुशोभनम् ॥
परानन्दरसोल्लासलोचनद्वयपङ्कजम् ॥

इति ध्यात्वा दिव्याभिषेकेण गुरुणा संप्रदायानुगतकृत-नामपूर्वकं मानसैरुपचारैराराध्य ऐं क्लीं श्रीं हसथफ्रें हस-क्षमलवरयुं हसथफ्रें श्रीअमुकानन्दार्थाय श्रीअमुकदेवशर्मा श्रीगुरुपादुकां पूजयामि । इति गुरुपादुकां नत्वा दशधा जपसमर्पणं कृत्वा प्रणमेद् यथा—

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

अथ सारदाटीकाकारश्रीराघवभट्टमतेन तु शक्तिविषये गुरोर्ध्यानम् । शुक्लवर्णमेव न गौरम् । तदितरविषये शुक्ल-मेवेति निश्चितं वचनद्वयदर्शनात् । तद्यथा--

श्वेताम्बरधरं गौरं श्वेताभरणभूषितम् ।
अपिच—रक्तमाल्याम्बरधरं सुरक्तं पद्मविस्तरम् ॥

इति तु असमीचीनम् । श्वेतवर्णं गुरोर्ध्यानान्तरं भवति शक्तिविषये तु तथा दर्शनात् । यथा ज्ञानार्णवे ।

ब्रह्मरन्ध्रे सहस्रारे कर्पूरधवलो गुरुः ।
तस्मात् सम्प्रदायानुगत्या गुरोर्ध्यानं कुर्यात् ॥ इति शेषः ।

अथ गुरोराज्ञां गृहीत्वा मूलाधारपद्मकर्णिकास्थत्रि-कोणान्तर्गत-स्वयम्भूलिङ्गवेष्टनीं प्रसुप्तभुजगाकारां सार्द्ध-त्रिवलयां विद्युत्पुञ्जप्रभां नीवारशूकतन्वीं कुलकुण्डलिनीं इष्टदेवतास्वरूपां हुंकारेण हंस इति मनुना बधे वनदहन-योगात् सचैतन्यां विधाय ब्रह्मवर्त्मना परमशिवे नीत्वा

चन्द्रमण्डले कुलगुरून् ध्यायेत् । तदुक्तं कालिकास्मृतौ ।

मूलाधारे स्मरेद्दिव्यं त्रिकोणं तेजसां निधिम् ।
तस्याग्निरेखामानीय अध-ऊर्द्ध व्यवस्थिताम् ॥
नीलतोयदमध्यस्थतड़िल्लेखेव भासुराम् ।
नीवारशूकतन्वीञ्च सुपीतां भास्करोपमाम् ॥
तस्याः शिखाया मध्ये च परमोर्द्ध व्यवस्थिताम् ।
स ब्रह्मा स स्वरः शान्तः स शिवः परमस्वराट् ।
स एव विष्णुः स प्राणः स कालाग्निः स चन्द्रमाः ॥
इति कुण्डलिनीं ध्यात्वा सर्वपापैः प्रमुच्यते ।
स महापातकेभ्यश्च पूतो भवति ।
सर्वसिद्धिं कृत्वा भैरवो भवति ।

अथ कुलगुरून् ध्यायेत् यथा—कुलचूड़ामणौ ।

मूलादिब्रह्मरन्ध्रान्तं गुरुं ध्यात्वा गुरुं स्मरेत् ।
प्रह्लादानन्दनाथाख्यं सकलानन्दमेव च ॥
कुमारानन्दनाथाख्यं वशिष्ठानन्दनाथकम् ।
क्रोधानन्दसुखानन्दौ ध्यानानन्दं ततः परम् ॥
बोधानन्दं ततश्चैव ध्यायेत् कुलसुखोपरि ।
महारसरसोल्लासहृदया घूर्णलोचनाः ॥
कुलालिङ्गनसंभिन्ना घूर्णिताशेषमानसाः ।
कुलशिष्टैः परिवृताः पूर्णान्तःकरणोद्यताः ॥
वराभययुताः सर्वे कुलतन्त्रार्थवादिनः ।
एवं कुलगुरून्नत्वा विसृज्य कुलमालिकाम् ॥
कुलस्थाने समानीय स्नानार्थं तीर्थमाश्रयेत् ।
शाक्तं कुलगुरुं वत्स ! स्मृतं कुलसुखावहम् ॥
रहस्यमद्भुतं प्रोक्तं गोप्तव्यं पशुशङ्कटे ।
कुलनाथं परित्यज्य ये शाक्ताः परसेविनः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तेषां शिक्षा च यागश्च अभिचाराय कल्पते ।
तस्मात् सर्वप्रयत्नेन कुलीनं गुरुमाश्रयेत् ॥
कुलीनः सर्वविद्यानामधिकारीति गीयते ।
दीक्षागुरुः स एवात्मा सर्वमन्त्रस्य नापरः ॥

अन्यच्च श्रुतौ ।

प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम् ।
अन्तःपदव्यामनुसञ्चरन्तीमानन्दरूपामवलां प्रपद्ये ॥ इति ।

अहं देवो न चान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहमात्मानमिति भावयेत् ॥
प्रातःकृत्यमवश्यमेव नित्यं करणीयम् ।
प्रातःकृत्यमकृत्वा तु यो देवीं भक्तितोऽर्चयेत् ।
तस्य पूजा च विफला शौचहीना यथा क्रिया ॥

अथ नद्यादौ गत्वा कालिकारूपं सर्वं विभाव्य सुवर्णरजतात्मकं कुलगर्भमनामातर्जनीषु धृत्वा आचम्य मूलं स्मरन् मलापकर्षकं कृत्वा आचम्य ओं अद्येत्यादि कुलदेवताप्रीतिकामो मन्त्रस्नानमहं करिष्ये । इति सङ्कल्प्य जले त्रिकोणचक्रं कृत्वा सूर्यमण्डलादङ्कुशमुद्रया तीर्थमावाह्य मूलान्ते अं आत्मतत्त्वाय स्वाहा विद्यातत्त्वाय स्वाहा । शिवतत्त्वाय स्वाहा । इति आचामेत् । अथवा ओं क्रीं स्वाहा इत्यनेन त्रिराचम्यात्मानं त्रिः संप्रोक्ष्य मूलेन मृत्तिकया अङ्गलेपनं कृत्वा मूलं पठन् कुम्भमुद्रया स्वमूर्ध्नि त्रिर्जलमभिषिच्याङ्गुलीभिः श्रवणादीनि सप्तच्छिद्राणि संरुध्य त्रिर्निमज्जेत् । तदुक्तं कुमारीतन्त्रे—

वेदाद्यञ्च तथा माया स्वाहेत्याचमनं मतम् ।

नीलतन्त्रेऽपि—

मृत्कुशानपि संगृह्य गत्वा जलाशयं ततः ॥

मलापकर्षकं कृत्वा मन्त्रस्नानं समाचरेत् ।
विद्यया त्रिर्निमज्ज्यैव आचामेत् पयसा पुनः ॥

कुलचूडामणौ—

कृष्णरक्तहरिन्नीला विविधा मम मूर्त्तयः ।
तत्र यत्कुलशिष्यश्च स तद्रूपं परामृशन् ॥
दिवं सर्वामयोर्वीञ्च पातालभूतसम्भवाम् ।
आचान्तः कुलदर्भेण स दर्भः कुलपुत्त्रकः ॥
कुलपात्रे तु दूर्वाञ्च सतिलं सजलं ततः ।
गृहीत्वा कुलदेवस्य प्रीतये स्नानमाचरेत् ॥
कृतसङ्कल्प एवादौ कुलचक्रं जले न्यसेत् ।
जलस्थानात् समानीय कुलमुद्राङ्कुशेन च ॥
कुलतीर्थानि तत्रैव समावाह्य शिवात्मकम् ।
तत्तोयञ्च त्रिधा पीत्वा त्रिधा च प्रोक्षणं मनोः ॥

अथ अङ्कुशमुद्रा । यथा ज्ञानार्णवे—

दक्षमुष्टिं विधायाथ तर्जन्यङ्कुशरूपिणी ।
अङ्कुशाख्या महामुद्रा त्रैलोक्याकर्षणक्षमा ॥

तीर्थावाहनमन्त्रो यथा । श्रीक्रमसंहितायां—

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ।

अथ स्वतन्त्रेऽपि ।

मूलं पठन् मूर्ध्नि तोयं मुद्रया कुम्भसंज्ञया ।
क्षिप्त्वा वारत्रयं देवि ! आचामेत् साधकाग्रणीः ।
आत्मविद्याशिवैस्तत्त्वैस्ततो यागगृहं विशेत् ॥

कुम्भमुद्रा यथा गुप्तार्णवे—

दक्षाङ्गुष्ठे पराङ्गुष्ठं क्षिप्त्वा हस्तद्वयेन तु ।
सावकाशाञ्चैव मुष्टिं कुम्भमुद्रां विदुर्बुधाः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सप्तच्छिद्राणि संरुध्य ततो मज्जे त्रिधा सुधीः ॥
आत्मविद्याशिवैस्तत्त्वैराचामेत् साधकाग्रणीः ।
वह्निजायां ततो दत्त्वा शुद्धेन पयसा प्रिये ! ॥

ॐ मानध्वनि वज्रिणि महाप्रतिशरे रक्ष रक्ष हुं फट् स्वाहा । इति शिखाबन्धनम् । मूलेन तिलकं कृत्वा पूर्ववदाचम्य वैदिकीं सन्ध्यां विधाय तान्त्रिकीं सन्ध्यां कुर्य्यात् । तदुक्तं कुमारीकल्पे—

प्रणवं पूर्वमुद्धृत्य मानान्ते च ध्वनीति च ।
वज्रिणीतिपदं प्रोक्तं महाप्रतिशरे तथा ॥
रक्षद्वयं हुं फट् स्वाहा इति च तदनन्तरम् ।
अनेनैव च मन्त्रेण रक्षां कुर्य्याद्विचक्षणः ॥

रक्षामिति शिखानन्धनरूपेण वस्त्राञ्चले ग्रन्थिबन्धनरूपेण वा कुर्य्यादित्यर्थः । सारदाटीकायाञ्च—

उक्तेनैव विधानेन कृत्वा स्नानञ्च तान्त्रिकम् ।
वैदिकीं तान्त्रिकीं सन्ध्यां कृत्वा तर्पणमाचरेत् ॥

तान्त्रिकीसन्ध्या यथा । तदुक्तं तत्रैव ।

पुनराचम्य विन्यस्य षड्ङ्गमपि मन्त्रवित् ।
वामहस्ते जलं गृह्य गलितोदकबिन्दुभिः ॥
सप्तधा प्रोक्षणं कृत्वा मूर्द्ध्नि मन्त्रं समुच्चरन् ।
अवशिष्टोदकं दक्षहस्ते संगृह्य बुद्धिमान् ॥
इड़याकृष्य देहान्तः क्षालितं पापसञ्चयम् ।
कृष्णवर्णं तदुदकं दक्षनाड्या विरेचयेत् ॥
दक्षहस्ते च तन्मन्त्री पापरूपं विचिन्त्य च ।
पुरतो वज्रपाषाणे प्रक्षिपेदस्त्रमन्त्रतः ॥

अन्यत्रापि—

षड़ङ्गन्यासमाचर्य्य वामहस्ते जलं ततः ।

गृहीत्वा दक्षिणे चैव संपुटं कारयेत्ततः ॥
शिववायुजलपृथ्वीवह्निबीजैस्त्रिधा पुनः ।
अभिमन्त्र्य च मूलेन सप्तधा तत्त्वमुद्रया ॥
निक्षिपेत्तज्जलं मूर्द्ध्नि शेषं दक्षे विधाय च ।
शरीरान्तःस्थितं पापं क्षालयेत् साधकाग्रणीः ॥

अथ प्रयोगः । पूर्ववदाचम्य षड़ङ्गन्यासं कृत्वा वामहस्ते जलं निधाय दक्षहस्तेनाच्छाद्य हं यं वं लं रं इति त्रिरभिमन्त्र्य मूलमुच्चरन् गलितोदकबिन्दुभिः तत्त्वमुद्रया मूर्द्ध्नि सप्तधाभ्युक्षणं कृत्वा शेषजलं दक्षहस्ते समादाय तेजोरूपं ध्यात्वा इड़याकृष्य देहान्तःपापं प्रक्षाल्य कृष्णवर्णं तज्जलं पापरूपं ध्यात्वा पिङ्गलया विरिच्य पुरःकल्पितवज्रशिलायां फड़िति प्रक्षिपेत् । इति तान्त्रिकी सन्ध्या ।

ततः हस्तौ प्रक्षाल्याचम्य जले यन्त्रं ध्यात्वा सावरणां देवतामावाह्य ऐशाने ऐं श्रीं अमुकानन्दनाथभैरवस्तृप्यतामिति देवतीर्थेन त्रिः सकृद्वा शुद्धोदकेन सन्तर्प्य वह्नौ परमगुरुं नैर्ऋत्यां परापरगुरुं वायव्यां परमेष्ठिगुरुं पूर्ववत् सन्तर्प्य मध्ये श्रीअमुकदेवता तृप्यतामिति यथाशक्तितः सन्तर्प्य एकैकाञ्जलिना परिवारान् सन्तर्पयेत् । अशक्तश्चेत् मूलमुच्चरन् सायुधपरिवार-सवाहन-महाकालसहित--श्रीदक्षिणकालिकामाता तृप्यतामिति त्रिः सप्तधा वा ऋषीन् भैरवान्तान् स्वकल्पोक्तविधिना स्वपित्रादीनपि सन्तर्प्य दूर्वाक्षतरक्तपुष्पादिना अर्घ्यं दत्त्वा ह्रीं हंसः मार्त्तण्डभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं स्वाहा इति सूर्य्याय त्रिरर्घ्यं समुत्थाय दत्त्वा सूर्य्यमण्डले देवीं ध्यात्वा दूर्वाक्षतविल्वपत्रजवापुष्पादिना अर्घ्यं कृत्वा देवीगायत्रीमुच्चरन् महाकालसहितायै श्रीमद्दक्षिणकालिकायै इदमर्घ्यं स्वाहा इत्यर्घ्यं दत्त्वा गायत्रीं यथाशक्तितः प्रजप्य देव्यै समर्प-

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

येत्। तदुक्तम्। तर्पणादौ प्रयुञ्जीत लप्यतां महाकालभैरवः
पिता।

मूलान्ते तर्पयामीति स्वाहान्तं तर्पणं मतम्।
एवंविधं तर्पणन्तु कृत्वा पापक्षयो भवेत्॥

कुलचूडामणौ च।

भैरवाय च देवाय भैरवेण च कर्त्तृणा।
भैरवाख्यं प्रदातव्यं मन्त्रमुच्चार्य्य पूर्वतः॥
दातृदानगृहीतॄंश्च ततो लिङ्गानुरूपतः।
भैरवीं भैरवात्मानं भावयेत् यदशेषतः॥
श्राद्धे विवाहे दाने च स्नानेनाङ्गप्रपूजने।
एवं चिन्तापरे देवः प्रसीदति न संशयः॥

अन्यच्च।

एवमेव विधानेन यथाशक्ति च तर्पयेत्।
मार्त्तण्डभैरवायेति त्रिरर्घ्यं कल्पयेत्ततः॥

कुलचूडामणौ च।

कुलसूर्य्याय देवाय त्रिरर्घ्यं तु प्रकल्प्य च।
देवीं पितृनृषींश्चैव तर्पयेत् कुलवारिणा॥

नन्दिकेश्वरसंहितायाञ्च।

यावन्न दीयते चार्घ्यं भास्कराय निवेदनम्।
तावन्न पूजयेद्विष्णुं शङ्करं वा सुरेश्वरीम्॥
दिनेशाय तु चोत्तिष्ठन् वारिणा चाञ्जलित्रयम्।
अष्टोत्तरशताहत्या गायत्रीं प्रजपेत् सुधीः॥
कालिकायै पदं प्रोक्त्वा विद्महे तदनन्तरम्।
श्मशानवासिनीं ङेन्तां धीमहीति ततो वदेत्॥
तन्न घोरे पदं प्रोच्य प्रचोदयात् पठेदिति।
अस्याः प्रभावमात्रेण महापातककोटयः॥

सद्यः प्रलयमायान्ति साधकस्य च नान्यथा।
रावणस्य बधाच्चैव रामचन्द्रो विमोचितः॥
गुरुदाराकर्षणाच्च देवश्चन्द्रो विमोचितः।
मातृबधात् परशुरामो मोचितोऽस्याः प्रसादतः॥
सुरापानाच्च श्रीकृष्णो दत्तात्रेयस्तथैव च।
एवमेषा महाविद्या गोतव्या चैव सुन्दरि!॥
महापातकयुक्तोऽपि प्रजपेद्दशधा यदि।
सत्यं सत्यं महादेवि! मुक्तो भवति तत्क्षणात्॥

अथ कुलचूडामणौ च।

उत्थाय कुलवस्त्रे च परिधाय कुलेन तु।
तिलकं कुलरूपञ्च कृत्वाचम्य कुलेश्वरः॥

स्वतन्त्रेऽपि।

मोक्षार्थी रक्तवस्त्रेण भोगार्थी श्वेतवाससा।
मारणे कृष्णवस्त्रञ्च वश्ये रक्तं सदा गृही॥
उच्चाटे व्याघ्रचर्माणि वृक्षत्वक् स्तम्भकर्मणि।
परिधाय ततो मन्त्री यागभूमिमथो विशेत्॥

तन्त्रान्तरे च।

ततश्च साधकश्रेष्ठो हृदि मन्त्रं परामृशन्।
अवहिर्मानसो योगी यागभूमिमथो विशेत्॥
जलशङ्खं करे कृत्वा गत्वा द्वारि महेश्वरि!।
क्षालयेद्धस्तपादौ च वक्ष्यमाणेन वर्त्मना॥

यागस्थानानि यथा।—फेत्कारिण्याम्।

एकलिङ्गे श्मशाने वा शून्यागारे चतुष्पथे।
तत्रस्थः साधयेद् योगी विद्यां त्रिभुवनेश्वरीम्॥
पञ्चक्रोशान्तरे यत्र न लिङ्गान्तरमीक्षते।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तदेकलिङ्गमाख्यातं तत्र सिद्धिरनुत्तमा ॥

मुण्डमालातन्त्रे च ।

नदीतीरे विल्वमूले श्मशाने शून्यवेश्मनि ।
एकलिङ्गे पर्वते वा देवागारे चतुष्पथे ॥
शवस्योपरि सुण्डे च जले वा कण्ठपूरिते ।
संग्रामभूमौ योनौ वा स्थले वा विजने वने ।
यत्र कुत्र स्थले रम्ये यत्र वा स्यात् मनोलयः ॥

अन्यत्रापि ।

ऊषरे पर्वते क्वापि निर्जने वा चतुष्पथे ।
देवागारे देवशून्ये विल्वमूले नदीतटे ॥
स्वगृहे निर्जनारामे तथा चाश्वत्थसन्निधौ ।
अथैतेषामेकतमं स्थानमाश्रित्य यत्नतः ॥

ओं वज्रोदके हुं फट् स्वाहा । अनेन जलं सव्येन आनीय आसनयभ्युक्ष्य उपरि उपविश्य ओं ह्रीं विशुद्धैत्र सर्वपापानि शमय अशेषविकल्पमपनय हुं फट् स्वाहा इति पादौ प्रक्षाल्य पूर्ववदाचामेत् । तदुक्तं कुमारीकल्पे ।

ओं वज्रोदके हुं फट्-स्वाहामन्त्रेण मन्त्रवित् ।
जलमानीय सव्ये तु आसनं शोधयेत्ततः ॥
प्रणवं पूर्वमुद्धृत्य लज्जावीजं तथैव च ।
ततो विशुध्यन्ते सर्वपापानि शमयेदथ ॥
अशेषान्ते विकल्पं स्यात् अपनयेति ततःपरम् ।
कूर्चचीजं भवेन्मन्त्रं पादप्रक्षालने प्रिये ! ॥

अथ वामे त्रिकोणवृत्तभूविम्बं विलिख्याधारशक्तये नमः इति संपूज्य तदुपरि अस्त्रमन्त्रेण शोधितं साधारपात्रं निधाय नमः इति संपूज्य अङ्कुशमुद्रया सूर्यमण्डलात्तीर्थमावाह्य ओं इति गन्धपुष्पं दत्त्वा धेनुमुद्रां प्रदर्श्य ओं इति दशधा

जप्त्वा तज्जलेन गृहद्वारमभ्युक्ष्य द्वारदेवताः प्रपूजयेत् ॥ तदुक्तं तन्त्रान्तरे ।

तत आचमनं कृत्वा सामान्यार्घ्यं प्रकल्पयेत् ।
त्रिकोणवृत्तभूविम्बं मण्डलं रचयेत् सुधीः ॥
आधारशक्तिं संपूज्य तत्राधारं विनिक्षिपेत् ।
अस्त्रमन्त्रेण संशोध्य हृन्मन्त्रेण प्रपूरयेत् ॥
निक्षिपेत्तीर्थमावाह्य गन्धादीन् प्रणवेन तु ।
दर्शयेद्धेनुमुद्रां वै सामान्यार्घ्यमिदं स्मृतम् ।
सामान्यार्घ्येण देवेशि ! पूजयेद्द्वारपार्श्वयोः ॥

धेनुमुद्रा यथा ।

अन्योन्याभिमुखं श्लिष्टा कनिष्ठानामिका पुनः ।
तथाच तर्जनीमध्या धेनुमुद्राऽमृतप्रदा ॥

द्वारदेवता यथा—

गणेशं क्षेत्रपालञ्च वटुकं योगिनीं तथा ।
ऊर्द्ध्वं वामे च दक्षे च अधश्चैव प्रकीर्त्तितम् ॥

अथ पूजा । द्वारोर्द्ध्वे गां गणेशं वामे क्षां क्षेत्रपालं दक्षिणे वां वटुकम् अधः यां योगिनीं एवं तत्रैव गां गङ्गां यां यमुनां श्रीं लक्ष्मीं ऐं सरस्वतीञ्च एवं चतुर्द्वारे सम्पुटवामाङ्गसङ्कोचेन पूजामण्डपान्तर्गत्वा नैर्ऋत्यां ब्रह्मणे नमः वास्तुपुरुषाय नमः इति गन्धपुष्पाभ्यां संपूज्याक्षतसिद्धार्थतिलान् नाराचमुद्रया ओं सर्वविघ्नान् उत्सारय हुं फट् स्वाहा ओं पवित्रवज्रभूमे हुं हुं फट् स्वाहा अनेन भूमिमभिमन्त्रयेत् । तदुक्तं स्वतन्त्रे ।

भूमिव्योमस्थितान् सर्वान् विघ्नांस्तांस्तान् सहाक्षतः ।
सिद्धार्थैस्तिलसंमिश्रैः प्रोत्सार्य्य त्वासने विशेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अन्यत्रापि ।

भूतापसर्पणं कुर्य्यात् मन्त्रेणानेन साधकः ।
यस्मिन् कृते स्थले भूता दूरं यान्ति सुरार्चने ॥
स्थितेषु सर्वभूतेषु नैवेद्यं मण्डलं तथा ।
विलुम्पति सदा लुब्धा न च गृह्णन्ति देवताः ॥
तस्माद् यत्नेन कर्त्तव्यं भूतानामपसर्पणम् ॥

कुमारीतन्त्रेऽपि ।

प्रणवं पूर्वमुद्धृत्य सर्वविघ्नांस्ततःपरम् ।
उत्सारय ततो हुं फट् स्वाहा च तदनन्तरम् ॥
अनेनैव च मन्त्रेण विघ्नानुत्सारयेत् सुधीः ।
प्रणवं पूर्वमुद्धृत्य रक्ष रक्ष तदन्तरम् ।
हुं फट् स्वाहेति मन्त्रेण भूमिञ्च परिशोधयेत् ॥
ततः पवित्रवज्रादौ प्रणवं पूर्वमुद्धरेत् ॥
वर्मद्वयं ततश्चैव फट् स्वाहा तदनन्तरम् ।
अनेनैव विधानेन कुर्य्याद् भूम्यभिमन्त्रणम् ॥

अथ आसनानि यथा— तदुक्तं मत्स्यसूक्ते ।—

मृदुचूड़कमासीनश्चान्येषु कोमलेषु वा ।
विस्तारेषु समाश्रित्य साधयेत् सिद्धिमुत्तमाम् ॥
अर्वाक् षण्मासतो गर्भमृतमाहुर्मृदुं बुधाः ।
चूड़ोपनयनैर्हीनं मृतमचूड़कं विदुः ॥
निवृत्तचूड़को बालो हीनोपनयनः पुमान् ।
यो मृतः पञ्चमे वर्षे तमेव कोमलं विदुः ॥

स्वतन्त्रेऽपि ।

कम्बले लोहिते वापि कृष्णे वा व्याघ्रचर्मणि ।
मत्यासी ब्रह्मचारी च विशेत् कृष्णस्य चर्मणि ॥

मत्स्यसूक्तेऽपि ।

कृष्णसारद्वीपचर्म अचूड़कम्बलं तथा ।
पीतवस्त्रञ्च शुक्लं वा आसनाय प्रकल्पयेत् ॥

मुण्डमालातन्त्रे ।—

व्याघ्राजिनं सर्वसिद्धैः ज्ञानसिद्धैः मृगाजिनम् ।
वस्त्रासनं रोगहरं वेत्रजं प्रीतिवर्द्धनम् ॥
कौषेयं पुष्टिदं प्रोक्तं कम्बलं सर्वसिद्धिदम् ।
शुक्लं वा यदि वा रक्तं विशेषाद्रक्तकम्बलम् ॥
मृदुकोमलमास्तीर्णं संग्रामे पतितं हि यत् ।
जन्तुव्यापादितं वापि मृगं वापि वरासनम् ॥
गर्भच्युतं वा नारीणामथवा योनिजां त्वचम् ।
सर्वसिद्धिप्रदञ्चैव सर्वभोगसमृद्धिदम् ॥
त्वचं वा यौवनस्थानां कुर्य्याद्वीरवरासनम् ।
श्मशानकाष्ठघटितं पीठं वा यज्ञदारुजम् ॥
न दीक्षितो विशेज्जातु कृष्णसाराजिने गृही ।
उदासीनवनासीनस्नातकब्रह्मचारिणः ॥
कुशाजिनाम्बरेणाढ्यं चतुरस्रं समन्ततः ।
एकहस्तं द्विहस्तं वा चतुरङ्गुलमुच्छ्रितम् ॥
विशुद्धे आसने कुर्य्यात् संस्कारे पूजनं बुधः ॥ इति ।

अत्र मृतासनमश्यमेव प्रत्यवायश्रवणात् । कालीतन्त्रे—

मृतासनं विना देवि ! यो जपेत् कालिकां नरः ।
तावत्कालं नारकी स्यात् यावदाभूतसंप्लवम् ॥

यत्तु स्वतन्त्रादौ कम्बलाद्यासनमुक्तं तन्न स्वतन्त्रासनम् । किन्तु मृतकयुतमिति बोद्धव्यम् । मृताभावे विष्टरमिति । तदुक्तं—

मृताभावे विष्टरञ्च शवरूपं प्रकल्पयेत् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ भूमौ त्रिकोणमण्डलं कृत्वा तत्र आधारशक्त्यादिभ्यो नमः इति संपूज्य तदुपरि विहितासनमारोप्य कृताञ्जलिः पठेत्। तदुक्तं

मेरुपृष्ठ ऋषिः प्रोक्तः सुतलं छन्द ईरितम्।
कूर्मो हि देवता देवि! आसनाय प्रकल्पयेत्॥
विनियोगं तु ततः कृत्वा पठेत् धृत्वा समन्ततः।
पृथ्वि! त्वया धृतालोको देवि! त्वं विष्णुना धृता॥
त्वञ्च धारय मां नित्यं पवित्रं कुरु चासनम्।
इति धृत्वा तु देवेशि! कुशांस्तत्रैव दापयेत्॥
मायाबीजं समुच्चार्य्य आधारशक्तिमुच्चरेत्।
कमलासनमालिख्य ङे नमोऽन्तं प्रपूजयेत्॥

कुमारीकल्पेऽपि।

आःकारान्तं सुरेखे च वज्ररेखे ततःपरम्।
हुं फट् स्वाहेति कुर्य्यात्तु मण्डलञ्च शवासने॥
वीरासनेनोपविशेत् संपूज्यासनमेव च।

अथ आसनोपरि कुशत्रयं दत्त्वा ह्रीं आधारशक्तये कमलासनाय नमः इति संपूज्य आः सुरेखे वज्ररेखे हुं फट् स्वाहा। इति मन्त्रेण तत्र मण्डलिकां कृत्वा तदुपरि वीरासने उपविश्य विजयां स्वीकुर्य्यात्। तदुक्तं भावचूडामणौ।

विना हेतुकमास्वाद्य चोभयुक्तो महेश्वरः।
न पूजां मम कुर्य्याच्च न ध्यानं न च चिन्तनम्॥
तस्माद्भुक्त्वा च पीत्वा च पूजयेत् परमेश्वरीम्।

विजयाकल्पेऽपि।

संविदासवयोर्मध्ये संविदैव गरीयसी।
संवित्प्रयोगस्तेनेह पूजादौ साधकोत्तमैः।
कर्त्तव्या च महापूजा करणीया सुनिन्दितैः॥

अन्यत्रापि।

आनन्देन विना भ्रंशो न च तृप्यन्ति देवताः।

तस्मात् पूजादौ विजयास्वीकारः कार्य्यः। सा पुनश्चतुर्द्धा। ब्राह्मणी क्षत्रिया वैश्या शूद्रा च। श्वेतरक्तकृष्णपीतवर्णासूनभेदाः।

तासां शुद्धिर्विजयाकल्पानुसारेण लिख्यते।
संविदे ब्रह्मसम्भूते ब्रह्मपुत्रि सदानघे॥
भैरवाणाञ्च तृप्त्यर्थं पवित्रा भव सर्वदा।
ओं ब्राह्मण्यै नमः स्वाहा। साधयेदपरां ततः॥

इत्यनेन अभिमन्त्रणम्।

सिद्धिमूले प्रिये! देवि! हीनबोधप्रबोधिनि।
राजप्रजावशङ्करि शत्रुकण्ठत्रिशूलिनि॥
ऐं क्षत्रियायै नमः स्वाहा शोधयेदपरां ततः।
अज्ञानेन्धनदीप्ताग्ने ज्वालाग्ने ज्ञानरूपिणि॥
आनन्दस्याहुतिं प्रीतिं सम्यग्ज्ञानं प्रयच्छ मे।
क्लीं वैश्यायै नमः स्वाहा शूद्रां संशोधयेत्ततः॥
नमस्यामि नमस्यामि योगमार्गप्रबोधिनि।
त्रैलोक्यविजये मातः समाधिफलदा भव॥

क्लीं शूद्रायै नमः स्वाहा ओं अमृते अमृतोद्भवे अमृतवर्षिणि पदं ततः।

अमृतमाकर्षय इन्द्रं सिद्धिं देहि ततःपरम्।
अमुकं मे ततो ब्रूयात् वशमानय ततःपरम्।
द्विठान्तोऽयं मनुः प्रोक्तश्चतुर्द्धानाञ्च शोधने॥

उत्तरतन्त्रे च।

मूलमन्त्रं ततो देवि! तस्योपरि नियोजयेत्।
आवाहनादिमुद्राञ्च धेनुयोनौ ततःपरम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

दिग्बन्धश्छोटिकाभिश्च तालत्रयपुरःसरः ।
दिव्यदृष्ट्या तथा पार्ष्णिघातैर्विघ्नान् विघातयेत् ॥
सप्तधा तर्पयेद् ब्रह्मरन्ध्रे मूलं जपेत् मनुम् ।
गुरुपद्मे सहस्रारे तथा सङ्केतमुद्रया ॥
त्रिधैव तर्पयेत् मन्त्री साधकः सिद्धिमानसः ।
ऐं वद वद पदं ब्रूयात् वाग्वादिनि ततःपरम् ॥
मम जिह्वाग्रे स्थिरा भव सर्वपदं ततः ।
सत्त्वरशङ्करी स्वाहेति मन्त्रेण जुहुयान्मुखे ॥
सङ्केतमुद्रया तत्त्वमुद्रया इत्यर्थः ।

अथ साधकः वामकर्णोर्द्ध्वं अमुकानन्दनाथश्रीभैरवगुरुपादुकाभ्यो नमः । दक्षिणकर्णोर्द्ध्वं गां गणपतिं मध्ये इष्टदेवतां नमस्कृत्य सामान्योदकेन पूजस्थानादिकमभ्युक्ष्य स्वदक्षिणे गन्धपुष्पादिकं वामे सुगन्धिजलं देवतायाः पश्चिमे कुलदेवतायाः द्रव्याणि अन्यत् पानञ्च देवतावामे धारयेत् । तदुक्तं कुलचूड़ामणौ ।

कुलासनं ततो धृत्वा तदभ्यर्च्य यथासुखम् ।
कुलासनं ततो बद्ध्वा गुरुपूजाक्रमेण च ॥
आत्मशुद्धिं पीठशुद्धिं शृणु शुद्धादि भैरव ।
कृत्वा चार्घ्यं ततो विद्वान् कुर्य्यात् कुलविचेष्टितम् ॥
दीक्षिताभिः कुलीनाभिर्युवतीभिः कुलात्मभिः ।
देवतागुरुभक्ताभिर्वाञ्छितं यागभूमिषु ॥
नानाविधानि पुष्पाणि गन्ध्यानि विविधानि च ।
कर्पूरजातीधूपादिवासितं पटवासितम् ॥
ताम्बूलं देयद्रव्यञ्च धूपदीपादिकञ्च यत् ।
सर्वालङ्कारभूषाभिर्भूषितः कौलिकेश्वरः ॥
मूलमन्त्रजलतोयैः प्रोक्षितं स्थापयेत्सकृत् ।

सर्वस्वं दक्षिणे स्थाप्यं वामे चार्घ्यं निवेदयेत ।
पश्चिमे देवतायाश्च कुलद्रव्याणि धारयेत् ॥
पश्चिमे पृष्ठे इत्यर्थः । कालिकापुराणेऽपि—
मदिरां पृष्ठतो दद्यादन्यपात्रञ्च वामतः ।
कुलार्णवेऽपि—आत्मस्थानमनु द्रव्यं देहशुद्धिस्तु पञ्चमी ।
यावन्न कुरुते देवि ! तावद्देवार्चनं कुतः ॥
मार्जनाद्देहशुद्धिस्तु प्राणयोगादिभिः प्रिये ! ।
षड्ङ्गानि न्यसेन्मन्त्री आत्मशुद्धिरितीरिता ॥
गृहीत्वा मातृकावर्णमूलमन्त्राक्षराणि तु ।
क्रमोत्क्रमाद्विराहृत्तिर्मन्त्रशुद्धिरितीरिता ॥
पूजाद्रव्यादि संप्रोक्ष्य मूलास्त्राभ्यां विधानतः ।
धेनुमुद्रां दर्शयेच्च द्रव्यशुद्धिरितीरिता ॥
पीठे देवीं प्रतिष्ठाप्य सकलीकृत्य मन्त्रवित् ।
मूलमन्त्रेण दीप्तात्मा अभिभाव्योदकेन च ॥
त्रिवारं प्रोक्षयेद्विद्वान् देहशुद्धिरितीरिता ।
पञ्चशुद्धिं विधायेत्थं पश्चाद् यजनमाचरेत् ॥
अन्यत्रापि । पञ्चशुद्धिविहीनेन यत् कृतं न च तत् कृतम् ।
पञ्चशुद्धिं विना पूजा अभिचाराय कल्पते ॥
आत्मशुद्धिः स्थानशुद्धिर्मन्त्रस्य शोधनं तथा ।
द्रव्यशुद्धिर्देहशुद्धिः पञ्चशुद्धिरितीरिता ॥

अथ कुमारीकल्पे

पुष्पाधिष्ठाने पुष्पस्य प्रणवं पूर्वमुद्धरेत् ।
ततोऽभिषेकेति पदं शताभीति ततःपरम् ॥
सेकेति च पदं प्रोक्त्वा हुं फट् स्वाहा ततःपरम् ।
अनेन मनुना देव्याः पुष्पाधिष्ठानमेव च ॥
प्रणवं पुष्पकेतुश्च तथा राजार्हतेऽपि च ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शताय सम्यगुक्ता च सम्बद्धाय ततश्च ओं ॥
पुष्पे पुष्पे महापुष्पे सुपुष्पे पुष्पसम्भवे ।
पुष्पचयावकीर्णे हुं फट् स्वाहेति ततः परम् ॥
विशोध्य पुष्पमेतेन जलं पूर्ववदाहरेत् ॥

ओं शताभिषेक ओं शताभिषेक हुं फट् स्वाहेति मन्त्रेण पुष्पमधिष्ठाय ओं पुष्पकेतु राजार्हते शताय सम्यक् सम्बद्धाय इति पुष्पमभिमन्त्र्य पूजाद्रव्यादिकं मूलान्ते फड़ित्यनेन अभ्युक्ष्य धेनुमुद्रया अमृतीकृत्य वामपार्ष्णिघातत्रयं फड़िति भूमौ कृत्वा तर्जनीमध्यमाभ्याम् ऊर्द्ध्वोर्द्ध्वं तालत्रयं दत्त्वा तर्जन्यङ्गुष्ठाभ्यां छोटिकाभिर्दशदिग्बन्धनं कुर्य्यात् । दिव्यदृष्ट्या दिव्यान् विघ्नानुत्सार्य्य रमिति चतुर्दिक्षु वह्निप्राकारं ध्यात्वा मूलमन्त्रेण स्वदेहं संमार्ज्य प्राणायामं कुर्य्यात् । यथा मूलाधारे मनः संयोज्य दक्षिणाङ्गुष्ठेन दक्षिणनासापुटं धृत्वा मूलमन्त्रं प्रणवं वा षोड़शवारं जपन् वामेण वायुमापूर्य्य कनिष्ठानामिकाभ्यां वामनासापुटमपि विधृत्य तमेव चतुःषष्टिवारं जपन् वायुं कुम्भयित्वा पुनस्तं द्वात्रिंशद्वारं जपन् दक्षिणेन वायुं रेचयेत् । एवं क्रमोत्क्रमेण प्राणायामत्रये कृते एकः प्राणायामः । इत्थं वारत्रयं कुर्य्यात् । तदुक्तं स्वतन्त्रे ।

पार्ष्णिघातकरास्फोटसमुदञ्चितवह्निकैः ।
तालत्रयमथो दद्यात् सशब्दं सम्प्रदाय च ॥
ऋतुचन्द्रैर्नेत्रवासैर्वासैर्वेदाधिकैः प्रिये ! ।
मात्राभिः प्रणवं जप्त्वा पूरकुम्भकरेचकैः ॥
प्राणायामं ततः कृत्वा भूतशुद्धिं ततश्चरेत् ॥

अन्यत्रापि । मनो जीवात्मनः शुद्धिः प्राणायामेन जायते ॥
कालोत्तरेऽपि । प्राणायामत्रयं कुर्य्यान्मूलेन प्रणवेन वा ।
ज्ञानार्णवेऽपि । कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम् ।

प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना ॥
अथ गौतमीये ।
भूतशुद्धिं लिपिन्यासं विना यस्तु प्रपूजयेत् ।
विपरीतं फलं दद्यादभक्त्या पूजनं यथा ॥

ततो भूतशुद्धिं कुर्य्यात् । तथा मूलाधारपद्मात् कुलकुण्डलिनीं प्रसुप्तभुजगाकारां सार्द्धत्रिवलयां स्वयम्भूलिङ्गवेष्टिनीं विषतन्तुतनीयसीं तड़ित्पुञ्जप्रभां हंस इति मन्त्रेण पृथिव्या सह स्वाधिष्ठानं समानीय तत्रस्थजले पृथिवीं विलीनां विचिन्त्य तस्माज्जलेन सह मणिपूरस्थवह्नौ तज्जलं विलीनं विचिन्त्य तस्मान्मणिपूरात् वह्निना सह अनाहत आनीय तत्रस्थवायौ वह्निं लीनं ध्यात्वा तस्मान्मरुता जीवात्मना सह विशुद्धस्थाकाशे वायुं लीनं कृत्वा तस्मादाकाशेन सह आज्ञाख्यमनसि आकाशं लीनं विचिन्त्य मनो नादे लीनं विधाय तत्रैव ध्वनिं समर्पयेत् । ततः सहस्रदलकमलकर्णिकास्थचन्द्रमण्डलमध्यत्रिकोणान्तर्गतबिन्दुरूपपरमशिवे कुण्डलिनीं जीवात्मानञ्च नित्यैकरूपतां विभाव्य प्राणायामविधिना यमिति वायुबीजं धूम्रवर्णं षोड़शवारं जपन् पापपुरुषेण सह शरीरं शोष्य रमिति वह्निबीजं रक्तवर्णं चतुःषष्टिवारं जपन् तं संदह्य मिति वरुणबीजं शुक्लवर्णं द्वात्रिंशद्वारं जपन् तद्भस्मामृतदृष्ट्या पापं शरीरम् उत्पाद्य लमिति पृथ्वीबीजेन पीतवर्णं ध्यायन् शरीरं सुदृढ़ीकृत्य सोऽहमिति मन्त्रेण कुलकुण्डलिनीममृतकलां पञ्चभूतजीवात्मानञ्च ब्रह्मपथेन स्वस्वस्थाने नियोजयेत् । एवं देवीरूपमात्मानं ध्यात्वा हृदि हस्तं निधाय जीवं न्यसेत् । यथा – आं ह्रीं क्रीं हंसः श्रीदक्षिणकालिकायाः प्राणा इह प्राणा आं ह्रीं क्रीं हंसः अमुष्याः जीव इह स्थित । आं ह्रीं क्रीं हंस अमुष्याः सर्वेन्द्रियाणि आं ह्रीं क्रीं हंसः अमुष्याः

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठन्तु स्वाहा।
इति जीवं न्यसेत्। तदुक्तं स्वतन्त्रे

संहारक्रमयोगेन पञ्चतत्त्वं समुद्धरेत्।
शोषदाहप्लवान् कृत्वा वायुग्निसलिलाक्षरैः॥
ततो न्यासं प्रकुर्वीत फेत्कारीतन्त्र ईरितम्॥

अन्यत्रापि। देवीरूपं ततो ध्यायेदात्मानं कमलेक्षणे।

ततो जीवं प्रविन्यस्य पाशादित्रयक्षरेण तु॥
प्राणमन्त्रेण मुक्तेन ततोऽमुष्याः पदं ततः।
प्राणा इति पदं पश्चादिह प्राणाः पदं ततः॥
सर्वेन्द्रियाण्यमुष्यान्ते वाङ्मनो नयनं ततः।
श्रोत्रघ्राणपदात् प्राणा इहागत्य सुखं चिरम्।
तिष्ठन्तु वह्निजायान्तः प्राणमन्त्रोऽयमीरितः॥

प्रकारान्तरञ्च ज्ञानार्णवे--

विपरीतं प्राणमन्त्रं विलिखेत् पाशपूर्वकम्।
प्राणप्रतिष्ठामन्त्रोऽयं सर्वकर्माणि साधयेत्॥

अमुष्या इति पदानि बोद्धव्यानि इति साम्प्रदायिकाः
अमुष्याः स्थाने षष्ठ्यन्तं नाम प्रयोक्तव्यं तदुक्तं नारायणीये—

अमुकपदं यद्रूपं यन्त्रमन्त्रेषु दृश्यते।
साध्याभिधानं तद्रूपं तत्र स्थाने नियोजयेत्॥

कुमारीकल्पेऽपि—

भूतशुद्धिं विधायेत्थं देवीरूपेण चिन्तयेत्॥

ओं आं ह्रीं क्रीं फट् स्वाहा अनेन कायवाक्चित्त शोधनं कृत्वा रक्ष हुं फट् स्वाहा अनेन हृदि हस्तं दत्त्व आत्मरक्षां विधाय स्ववामे लतां गुरुदेवतां नवयौवनगर्वित विधाय भूतशुद्धिं प्राणायामान् कारयित्वा यथोक्तमाचरेत्।
तदुक्तं तत्रैव। प्रणवं पूर्वमुच्चार्य्य विशेषाक्षरमेव च।

हुं फट् स्वाहा मनुः प्रोक्तं कायवाक्चित्तशोधने।
रक्ष हुं फट् ततः स्वाहा मन्त्रः स्यादात्मरक्षणे॥
ततः षोड़शवर्षीयां नारीमानीय मन्त्रवित्।
युवतीं वा मदोन्मत्तां सुवेशां चारुहासिनीम्॥
सदा कामाभिलषितां सिन्दूराङ्कितभालिकाम्।
साधके प्रेमसम्पन्नां वामे संस्थापयेत् बुधः॥
तस्याश्च भूतशुद्ध्यादीन् कृत्वा तु मातृकां न्यसेत्।
प्राणायामं मातृकाञ्च कारयित्वा यथाविधि॥

अथ ऋष्यादिन्यासं कुर्य्यात्। यथा। कृताञ्जलिः भैरवऋषिरनुष्टुप्छन्दः श्रीदक्षिणकालिका देवता क्रीं बीजं हुं शक्तिः क्रीं कीलकं रक्षार्थकाममोक्षपुरुषार्थचतुष्टयसिद्धिपूर्वकदिव्यज्ञानद्रुतकवित्वपाण्डित्यसिद्धये विनियोगः। इत्यभिलप्य पुष्पेण अनामिकया वा न्यसेत्। यथा। शिरसि भैरवऋषये नमः मुखे अनुष्टुप्छन्दसे नमः। हृदि श्रीदक्षिणकालिकायै नमः। गुह्ये क्रीं बीजाय नमः पादयोः हुं शक्तये नमः सर्वाङ्गे क्रीं कीलकाय नमः। तदुक्तम्।

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छन्द उदाहृतम्।
देवता कालिका प्रोक्ता लज्जाबीजन्तु कीलकम्॥
शक्तिस्तु कूर्चबीजं स्यादनिरुद्धसरस्वती।
कवित्वार्थे विनियोगः एवमृष्यादिकल्पना॥

कवित्वार्थे विनियोगः इत्युपलक्षणम्। यद्यस्याभिलषितं तदर्थे विनियोगः इत्यर्थः। तन्त्रे विविधश्रवणात्। तदुक्तं कालीक्रमे।

कीलकं चाद्यबीजन्तु चतुर्वर्गार्थसिद्धये।

कुलचूड़ामणौ।

भैरवोऽस्य ऋषिः प्रोक्तः उष्णिक्छन्द उदीरितम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

दक्षिणाकालिका देवी चतुर्वर्गफलप्रदा ।

अथ तन्त्रान्तरे ।

ऋषिं न्यसेन्मूर्ध्नि देशे छन्दस्तु मुखपङ्कजे ॥
देवतां हृदये चैव वीजन्तु गुह्यदेशके ।
शक्तिस्तु पादयोश्चैव सर्वाङ्गे कीलकं न्यसेत् ॥

गौतमीये । ऋषिश्छन्दोऽपरिज्ञानान्न मन्त्रः फलभाग् भवेत् ।

नैर्वीर्य्यं याति मन्त्राणां विनियोग अजानताम् ॥

अथ कराङ्गन्यासौ । ओं क्रां अङ्गुष्ठाभ्यां नमः इत्यङ्गुष्ठयोः । ओं क्रीं तर्जनीभ्यां स्वाहा इति तर्जन्योः । ओं क्रूं मध्यमाभ्यां वषट् इति मध्यमयोः । ओं क्रैं अनामिकाभ्यां हुं इति अनामिकयोः । ओं क्रौं कनिष्ठाभ्यां वौषट् इति कनिष्ठयोः । ओं क्रः करतलपृष्ठाभ्यां नमः इति करतलपृष्ठयोः । इति इति करन्यासः । अथवा सर्वत्र नमस्कारान्तेन करन्यासः ततः ओं क्रां हृदयाय नमः इति हृदि तर्जनीमध्यमानामिकाभिर्न्यसेत् । ओं क्रीं शिरसे स्वाहा इति शिरसि तर्जनीमध्यमाभ्याम् । ओं क्रूं शिखायै वषट् इति शिखायां मुष्टिं कृत्वाधोमुखाङ्गुष्ठेन । ओं क्रैं कवचाय हुं इति कवचे हृदयाङ्गुलीभिः । ओं क्रौं नेत्रत्रयाय वौषट् इति नेत्रत्रये तर्जनीमध्यमानामिकाभिः । ओं क्रः करतलपृष्ठाभ्यां फट् इति करतलपृष्ठयोः । ततः ओं क्रः अस्त्राय फट् इत्यनेन तर्जनीमध्यमाभ्यां मूर्ध्नि ऊर्ध्वोर्ध्वतालत्रयं दत्त्वा छोटिकाभिर्दशदिग्बन्धनं कुर्य्यात् । तदुक्तं कालीतन्त्रे ।

अङ्गन्यासकरन्यासौ यथावदभिधीयते ।
षड्दीर्घभाजा वीजेन प्रणवाद्येन कल्पयेत् ॥
हृदयाय नमः प्रोक्तं शिरसे वह्निवल्लभा ।
शिखायां वषडित्युक्तं कवचाय हुमीरितम् ॥

नेत्रत्रयाय वौषट् स्यादस्त्राय फट् प्रकीर्त्तितम् ।
वीजं मन्त्राद्यवीजं न तु पारिभाषिकम् ॥

तन्त्रान्तरे स्मरणात् । स्वतन्त्रेऽपि ।

प्रणवं चाद्यवीजञ्च षड्दीर्घस्वरभाषितम् ।
कुर्य्यात् षड्ङ्गविन्यासं मूलखण्डत्रयेण वा ॥

अथ प्रकारः । आद्यसप्तवीजेन हृदयम् । द्वितीयखण्डषड्वर्णेण शीर्षम् । तृतीयखण्डनवार्णेण शिखायाम् । पुनराद्येन कवचम् । द्वितीयेन नेत्रत्रयम् । तृतीयखण्डेनास्त्रम । इत्थं वा अङ्गन्यासं कुर्य्यात् । भैरवतन्त्रेऽपि ।

षड्ङ्गानि न्यसेन्मन्त्री त्रिः सकृद्वा यथाक्रमम् ॥

अथ वर्णन्यासं कुर्य्यात् । अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं नमो हृदि । एं ऐं ओं औं अं अः कं खं गं घं नमो दक्षभुजे । ङं चं छं जं झं ञं । टं ठं डं ढं नमो वामभुजे । णं तं थं दं धं नं पं फं बं भं नमो दक्षजङ्घायाम् । मं यं रं लं वं शं षं सं हं क्षं नमो वामजङ्घायां न्यसेत् । तदुक्तं कालीतन्त्रे ।

एवं यथाविधि कृत्वा वर्णन्यासं समाचरेत् ।
अं आ इ ई उ ऊ ऋ ॠ ऌ ॡ वै हृदये न्यसेत् ॥
ए ऐ ओ औ ततः अं अः क ख ग घ पुनस्ततः ।
उक्त्वा च दक्षिणभुजं स्पृशेत् साधकसत्तमः ॥
ङ च छ ज झ ञ ट ठ ड ढ तथा पुनः ।

इति वामभुजे न्यस्य । ण त थ द पुनः स्मरेत् । ध न प फ ब भ दक्षिणे जङ्घके न्यसेत् । म य र ल व श ष स ह च वामजङ्घके । तथैतल्लिखितवर्णस्वरसात् विन्दुरहितवर्णन्यासः । विरूपाक्षमते तु सविन्दुरेव न्यासप्रमाणम् । तदुक्तं कवचे लिखितायाः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ऋषिर्ब्रह्मा भवेच्छन्दोगायत्री मातृका पुनः ।
देवता व्यञ्जनं बीजं शक्तयस्तु स्वरास्ततः ॥
अव्यक्तं कीलकं ज्ञेयं न्यास उक्तः क्रमेण तु ।

उक्त इति पूर्वोक्तऋष्यादिक्रमवत् । क्रमेण न्यसेदित्यर्थः ।

षड्ङ्गं मातृकायाश्च साधकः कारयेत्ततः ।

स्वराणां क्लीवहीनानां ऋ ॠ ऌ ॡ रहितानामित्यर्थः ।

एवं विधिना मातृकाषड्ङ्गं कृत्वा ध्यायेत् । यथा ।

शरत् पूर्णेन्दुशुभ्रां सकलगुणमयीं लोलरक्तत्रिनेत्रां
शुक्लालङ्कारभूषां शशिमुकुटजटाटोपयुक्तां प्रसन्नाम् ।
पुस्तीस्रक्पूर्णकुम्भान् वरमपि दधतीं शुक्लपट्टाम्बराढ्यां
वाग्देवीं पद्मवक्त्रां कुचभरनमिताम् चिन्तयेत् साधकेन्द्रः ॥

एवं ध्यात्वा ललाटादिक्रमेण अकारादिक्षकारान्तं क्रमेण न्यसेत् । यथा । श्रीरामे ।

ब्रह्मरन्ध्रे तथा वक्त्रे वेष्टने नयनद्वये ।
श्रुतिनासापुटद्वन्द्वगण्डोष्ठद्वयकेऽपि च ॥
दन्तयुग्मे च मूर्द्धास्ये षड्वर्णान् षोडश न्यसेत् ।
दोःपत्सन्धिषु साग्रेषु पार्श्वयुग्मे न्यसेत् पुनः ॥
पृष्ठनाभिद्वये चैव जठरे विन्यसेदथ ।
त्वगसृङ्मांसमेदोऽस्थिमज्जशुक्राणि धातवः ॥
प्राणजीवौ च परमौ यकारादिषु संस्थिताः ।
एवं क्रमेण देवेशि ! न्यस्तव्या एतदात्मिकाः ॥
हृदोर्मूलेऽपि विन्यस्य तथापरगले न्यसेत् ।
करमूले हृदारभ्य पाणिपादयुगे तथा ॥
जठराननयोर्व्याप्तिं न्यासेदित्यर्णरूपिणीम् ॥

एवं ज्ञानार्णवे । अन्यच्च ललाटमुखवृत्ताच्चीत्यादि ।

अथ प्रयोगः । अं नमो ब्रह्मरन्ध्रे ललाटे वा आं नमो

मुखवृत्ते एवं क्रमेण मकारपर्य्यन्तं विन्यस्य । यं त्वगात्मने नमः । रं असृगात्मने नमः । लं मांसात्मने नमः । रं मेदआत्मने नमः । वामांशे ककुदि वा शं असृगात्मने नमः । षं मज्जात्मने नमः । सं शुक्रात्मने नमः । हं प्राणात्मने नमः । लं जीवात्मने नमः । क्षं परमात्मने नमः । इति विशेषः ।

पञ्चाशदक्षरन्यासः क्रमेणैव प्रकाशितः ।
श्रीमाद्यन्तो नमोऽन्ताश्च सविन्दुर्विन्दुवर्जितः ।
मायालक्ष्मीबीजपूर्वो न्यस्तव्य उच्यते बुधैः ॥
ललाटेऽनामिकामध्ये विन्यसेन्मुखवृत्तके ।
तर्जनीमध्यमानामा वृद्धानामा च नेत्रयोः ॥
अङ्गुष्ठं कर्णयोर्न्यस्य कनिष्ठाङ्गुष्ठकौ नसोः ।
मध्यास्तिस्रो गण्डयोश्च मध्यमामोष्ठयोर्न्यसेत् ॥
अनामां दन्तयोर्न्यस्य मध्यमामुत्तमाङ्गके ।
मुखेऽनामां मध्यमाञ्च हस्ते पादे च पार्श्वयोः ॥
कनिष्ठानामिका मध्यास्तास्तु पृष्ठे प्रविन्यसेत् ।
ताः साङ्गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् ॥
हृदये च तलं सर्वमंसयोश्च ककुत्स्थले ।
हृत्पूर्वं हस्तपत्कुक्षिमुखेषु तलमेव हि ॥
एतास्तु मातृकामुद्राः क्रमेण परिकीर्त्तिताः ।
अज्ञात्वा विन्यसेद् यस्तु न्यासः स्यात्तस्य निष्फलः ॥

अथ श्रीकण्ठन्यासो यथा ।

विन्यसेन्मातृकास्थाने श्रीकण्ठादीन् यथाक्रमम् ।
पूर्णोदर्य्यादिभिः सार्द्धं मातृकार्णसमन्वितान् ॥
श्रीकण्ठोऽनन्तसूक्ष्मौ च त्रिमूर्त्तिरमरेश्वरः ।
अर्घीशोभारभूतिश्चातिथीशः स्थाणुको हरः ॥
झिण्टीशो भौतिकः सद्योजातश्चानुग्रहेश्वरः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अक्रूरश्च महाशैलः षोड़श स्वरमूर्त्तयः ॥
पश्चात् क्रोधीशचण्डेशपञ्चान्तकशिवोत्तमाः ।
अथैकरुद्रकूर्मैकनेत्रार्द्धचतुराननाः ॥
अजेशः सर्वसोमेशस्तथा लाङ्गलिदारुकौ ।
अर्द्धनारीश्वरश्चोमाकान्तश्चाषाढ़िदण्डिनौ ॥
स्युरत्रिमीनमेषाख्या लोहितश्च शिखी तथा ।
छगलाण्डद्विरण्डेशौ समहाकालवालिनौ ॥
भुजङ्गेशपिनाकीशखड्गेशाख्यावकेश्वरः ।
श्वेतभृग्वीशनकुलिशिवाः सम्वर्त्तकः स्मृतः ॥
एते रुद्राः स्मृता रक्ताधृतशूलकपालकाः ।
पूर्णोदरी स्याद्विजया शाल्मली तदनन्तरम् ॥
लोलाक्षी वर्त्तुलाक्षी च दीर्घघोणा समीरिता ।
सुदीर्घमुखीगोमुख्यौ दीर्घजङ्घा तथैव च ॥
कुम्भोदर्य्यूर्द्धकेशी च तथा विकृतमुख्यपि ।
ज्वालामुखी ततो ज्ञेया पश्चादुल्कामुखी तथा ॥
चुल्लीमुखी विद्यामुखी चैताः षोड़श शक्तयः ।
महाकालीसरस्वत्यौ सर्वसिद्धिसमन्विते ॥
गौरी त्रैलोक्यविद्या च मन्त्रशक्तिस्ततःपरम् ।
आत्मशक्तिर्भूतमाता तथा लम्बोदरी मता ॥
द्राविणी नागरी भूयः खेचरी चैव मञ्जरी ।
रूपिणी वीरिणी पश्चात् काकोदर्य्यपि पूतना ॥
स्याद्भद्रकाली योगिन्यौ शङ्खिनी गर्जिनी तथा ।
सकालरात्रिकुब्जिन्यौ कपर्दिन्यपि वज्रिणी ॥
जया च सुमुखी प्रोक्ता रेवती माधवी तथा ।
वारुणी वायवी प्रोक्ता पश्चाद्रक्षोविदारिणी ॥
ततश्च सहजा लक्ष्मीर्व्यापिनी माययान्विता ।

एता रुद्राङ्कपीठस्थाः सिन्दूरारुणविग्रहाः ॥
रक्तोत्पलकपालाढ्या अलङ्कृतकराम्बुजाः ॥

अथ प्रयोगः यथा । अं श्रीकण्ठपूर्णोदरीभ्यां नमः इति ललाटे । आं अनन्तवीजाभ्यां नमः इति मुखवृत्ते । एवं क्रमेण सर्वं कुर्य्यात् ।

अथ षोढ़ान्यासः । तदुक्तं वीरतन्त्रे ।

केवलां मातृकां कृत्वा मातृकां तारसंपुटाम् ।
मातृकापुटितं तारं न्यसेत् साधकसत्तमः ॥

ओं अं ओं एवं तथैव मातृकापुटितं एवं कामपुटितं तत्पुटितं कामम् । शक्तिपुटितं तत्पुटितां शक्तिम् । लज्जापुटितं तत्पुटितां लज्जाम् । मन्त्रपुटितात् तत्पुटितं मन्त्रम् । पुरनुलोमविलोमतः केवलमन्त्रं मातृकास्थाने न्यस्य अष्टोत्तरशतेन व्यापकं कुर्य्यात् ।

इति गुप्तेन दुर्गाया अङ्गषोढ़ा प्रकीर्त्तिता ।
तारायाः कालिकायाश्च तन्मुख्याश्च तथापि वा ॥
कृतेऽस्मिन्न्यासवर्य्ये तु सर्वं पापं प्रणश्यति ।
विषापमृत्युहरणं ग्रहरोगादिनाशनम् ॥
दुष्टसत्त्वा विनश्यन्ति शत्रवो यान्ति मित्रताम् ।
कवितालहरी तस्य द्राक्षारसपरम्परा ॥
अणिमाद्यष्टसिद्धिस्तु तस्य हस्ते व्यवस्थिता ।
कायिकं वाचिकं वापि मानसञ्चापि दुष्कृतम् ॥
सर्वं तस्य विनाशत्वं याति न्यासस्य चिन्तनात् ।
पुरस्कृत्य क्षयं याति यत्किञ्चिदुपपातकम् ॥
यद्रूपं दृश्यते योहि स तद्रूपञ्च गच्छति ।
यं नमन्ति महेशानि ! षोढ़ापुटितविग्रहाः ।
अल्पायुः स भवेत् सद्यो देवता कम्पते भिया ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ तत्त्वन्यासः। मूलविद्या स्वतन्त्रे ।
आत्मविद्या शिवैस्तत्त्वैस्तत्त्वन्यासं समाचरेत् ।
अथ जीवन्यासं कुर्य्यात् । यथा कुमारीतन्त्रे ।
ब्रह्मरन्ध्रे भ्रुवोर्मध्ये ललाटे नाभिदेशके ।
गुह्ये वक्त्रे तु सर्वाङ्गे सप्तबीजान् क्रमान् न्यसेत् ॥
अथ प्रयोगः। आद्यबीजमुच्चार्य्य नमो ब्रह्मरन्ध्रे । ए
द्वितीयबीजं भ्रुवि । तृतीयं भाले चतुर्थं नाभौ पञ्चमं गुह्ये षष्ठं
वक्त्रे । सप्तमं सर्वाङ्गे न्यसेत् । ततः प्रणवपुटितमूलेन व्यापक-
न्यासं कुर्य्यात् नवधा सप्तधा पञ्चधा वा मस्तकादिपादपर्य्यन्तं
पादादिमस्तकान्तं न्यसेत् । तदुक्तं भैरवतन्त्रे
पञ्चधा नवधा वापि मूलेन सप्तधा तथा ।
व्यापकं कुर्य्यादित्यादि । स्वतन्त्रेऽपि
मूलेन व्यापकं न्यासं नवधा कारयेत् प्रिये ! ॥

इति महामहोपाध्याय श्रीपरमहंसपरिव्राजक श्रीपूर्णा-
नन्दगिरिविरचिते श्यामारहस्ये न्यासान्तविवरणं
नाम प्रथमः परिच्छेदः ।

अथ द्वितीयः परिच्छेदः ।

अथान्तर्यजनं वक्ष्ये दृष्टादृष्टफलप्रदम् ।
गुरुध्यानं प्रकुर्वीत यथा पूर्वं विशालधीः ॥
स्नायाच्च विमले तीर्थे पुष्करे हृदयाश्रिते ।
विन्दुतीर्थेन वा स्नायात् पुनर्जन्म न विद्यते ॥
ईड़ासुषुम्ने शिवतीर्थकेऽस्मिन् ज्ञानाम्बुपूर्णेऽथ ततः शरीरे ।
ब्रह्माम्बुभिः स्नाति तयोः सदा यः किं तस्य गाङ्गैरपि पुष्करैव
इति स्नानम् ।

शिवशक्त्योः समायोगो यस्मिन् काले प्रजायते ।
सा सन्ध्या कुलनिष्ठानां समाधिस्थैः प्रतीयते ॥
इति सन्ध्योपासनम् ।
अथ मूलधारात् कुलकुण्डलीं सोमसूर्य्याग्निरूपिणीं समु-
त्थाप्य परविन्दुं निर्भिद्य देहदेवतां तर्पयेत् । तदुक्तं—
चन्द्रार्कानलसंजुष्टाकुलितं यत् परामृतम् ।
तेनामृतेन दिव्येन तर्पयेत्तेन देवताम् ॥ इति तर्पणम् ।
ब्रह्मरन्ध्रादधोभागे यच्चान्द्रं पात्रमुत्तमम् ।
कलासाधनं संपूर्य्य तर्पयेत्तेन खेचरीम् ॥ इत्यर्घ्यसाधनम् ।
आधारे लिङ्गनाभौ हृदयसरसिजे तालुमूले ललाटे
द्वेपत्रे षोड़शारे द्विदशदशदले द्वादशार्द्धे चतुष्के ।
वामान्ते वालमध्ये डफकठसहिते कण्ठदेशे स्वरांश्च
हृत्तौ कोदण्डमध्ये न्यसतु विमलधीर्न्याससम्पत्तिसिद्ध्यै ॥
इति मातृकार्णान् कण्ठच्छदक्रमेण ध्यायेत् ।
अथ षड़ङ्गन्यासः । तदुक्तं गौतमीये ।
इज्यमानहृदर्थोऽयं हृदये स्याच्चिदात्मकः ।
क्रियते तत्परत्वेन हृन्मन्त्रेण ततःपरम् ॥
सर्वज्ञादिगुणोत्तुङ्गे संविद्रूपे परात्मनि ।
क्रियते विषयाहारः शिरो मन्त्रेण देशिकः ॥
हृच्छिरोरूपसिद्धौ नियता भावना दृढ़ा ।
क्रियते निजदेहस्य शिखामन्त्रेण देशिकः ॥
मन्त्रात्मकस्य देहस्य मन्त्रवाच्येन तेजसा ।
सर्वतो धर्ममन्त्रेण अहन्यहनि संवृतिः ॥
इति अहिंसनीयवङ्गिलक्षणम् । यत्र क्षणे हिंस्राणां
हिंसोपाया न प्रवर्त्तन्ते इत्यर्थः ।
यो ददाति परं ज्ञानं संविद्रूपे परात्मनि ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

हृदयादिमयं तेजः स्यादेतन्मैत्रसंज्ञितम् ॥
आध्यात्मिकादिरूपं यत् साधकस्य विनाशयेत् ।
अविद्याशतमन्त्रं तत्परं धाम समीरितम् ॥

इति षड्ङ्गन्यासं विधाय ध्यानं कुर्यात् । यथा उदयाकरपद्धत्यां –

शक्तिद्वयपुटान्तस्थं लक्षद्वयसुसंस्थितम् ।
ज्योतिस्तत्त्वमयं ध्यायेत् कुलाकुलनियोजनात् ॥

अथवा । शृङ्गाटद्वयमध्यस्थं शक्तिद्वयपुटीकृतम् ।
सदा समरसं ध्यायेत् कालं तत् कुलयोगिनाम् ॥

अन्यच्च । किरणस्थं तदग्निस्थं चन्द्रभास्करमध्यमम् ।
महाशून्येन यत् कृत्वा पूर्णस्तिष्ठति योगिराट् ॥

महाशून्य इति सर्वोपाधिविनिर्मुक्ते । पूर्ण इति सर्वोपाधिविनिर्मोक्षात् विभागविरहात् पूर्ण एव भवतीति । अथवा

निरालम्बपदे शून्ये यत्तेज उपपद्यते ।
तद्धर्ममभ्यसेन्नित्यं ध्यानं तत् कुलयोगिनाम् ॥

तद्धर्ममिति अन्तःकरणस्थं अभ्यसेदिति वारंवारं कुर्यादित्यर्थः ॥ इति ध्यानम् ।

अर्चयन् विषयैः पुष्पैस्तत्क्षणात्तन्मयो भवेत् ।
न्यासस्तन्मयता बुद्धिः सोऽहम्भावेन पूजयेत् ॥

तन्मयेति तदेवात्मतत्त्वज्ञानम् । सोऽहमिति तत्त्वम्पदबोधनार्थं परिचिन्तनमात्रम् । विषयपुष्पाणि यथा –

अमायमनहङ्कारमवादमपदं तथा ।
अमोहकमदम्भञ्च तत्त्वेर्ष्याक्षोभकं तथा ॥
अमात्सर्यमलोभञ्च दशपुष्पं विदुर्बुधाः ।
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहम् ॥
दयापुष्पं क्षमापुष्पं ज्ञानपुष्पञ्च पञ्चमम् ।

इत्यष्टसप्तभिः पुष्पैः पूजयेत् परमेश्वरीम् ॥ इति पूजनम् ।

माला पञ्चाशिका प्रोक्ता सूत्रं शक्तिशिवात्मकम् ।
ग्रथिता कुण्डलीशक्तिः कल्पान्ते मेरुसंस्थिता ॥

एवं विधिना वर्णमालामुपस्कृत्य क्षमेरुरूपं कृत्वा अकारादिक्षकारान्तं लकारादि श्रीकण्ठान्तं मूलमन्त्रं जप्त्वा रतेजसि समर्पयेत् ॥

अथ होमः । आत्मानमपरिच्छिन्नं विभाव्यान्तरं वा परमज्ञानात्मस्वरूपं चतुरस्रं चित्कुण्डमानन्दमेखलायुतम् अर्द्धाकृतयोनिभूषितं नाभौ ध्यात्वा तन्मध्यस्थज्ञानाग्नौ जुहुयात् । यथा मूलान्ते नाभौ चैतन्यरूपाग्नौ हविषा मनसा चा ज्ञानप्रदीपिते नित्यमक्षवृत्तिर्जुहोम्यहं स्वाहा । अनेन यथाहुतिं दद्यात् ।

मूलान्ते धर्माधर्महविर्दीप्त आत्माग्नौ मनसा स्रुचा ।
सुषुम्ना वर्त्मना नित्यमक्षवृत्तिर्जुहोम्यहम् । स्वाहा

इति द्वितीयाहुतिं दत्त्वा

मूलान्ते प्रकाशाकाशहस्ताभ्यामवलम्बयोन्मनी स्रुचा ।
धर्माधर्मफलस्नेहपूर्णां वह्नौ जुहोम्यहं स्वाहा ।

अनेन तृतीयाहुतिं दद्यात् । ततो मूलान्ते

अन्तर्निरञ्जननिबन्धनमेधमाने
मायान्धकारपरिपन्थिनि संविदग्नौ ।
कस्मिंश्चिदुद्भुतमरीचिविकाशभूमौ
विश्वं जुहोमि वसुधां दिशि वावसानाम् ॥

इत्यन्तर्यजनं कृत्वा साक्षाद्ब्रह्ममयो भवेत् ।
न तस्य पापपुण्यानि जीवन्मुक्तो भवेत् ध्रुवम् ॥

इति श्यामारहस्ये द्वितीयः परिच्छेदः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ तृतीयः परिच्छेदः ।

अथ साधकः कुलवेशं कृत्वा कुलवेशञ्च कारयित्वा पी
न्यासं कुर्य्यात् । तदुक्तं कुमारीतन्त्रे

ततः स्त्रीवेशधारी स्यात् सिन्दूराङ्कितभालकः ।
शृङ्गारोज्ज्वलवेशाढ्यस्ताम्बूलपूरिताननः ॥
एवं वेशादिकं कृत्वा वनितामपि कारयेत् ।
पीठन्यासं ततः पश्चादाधारशक्तिपूर्वकम् ॥
प्रकृतिं कमठं चैव शेषं पृथ्वीं तथैव च ।
सुधाम्बुधिं मणिद्वीपं चिन्तामणिगृहं तथा ॥
श्मशानं पारिजातञ्च तन्मूले रत्नवेदिकाम् ।
तस्योपरि मणेः पीठं न्यसेत् साधकसत्तमः ॥
चतुर्दिक्षु मुनीन् देवान् शिवांश्च शवमुण्डकान् ।
धर्मांश्चैवाप्यधर्मांश्च पादगात्रचतुष्टये ॥

पादगात्रचतुष्टयन्तु – दक्षांस-वामुख-दक्षजङ्घा-दक्षपार्श्वे
दिकम् ।

हृदि कन्दं तथा पद्मं सूर्य्यं सोमं महेश्वरि ! ।
वैश्वानरं तथा सत्त्वं रजश्चैव तमस्तथा ॥
आत्मानञ्चैव विन्यस्य शक्तिं हृत्पद्मके न्यसेत् ।

आत्मानमिति आत्मशब्देनात्मचतुष्टयमुच्यते । शक्तिर्यथा

इच्छा ज्ञाना क्रिया चैव कामदा कामदायिनी ।
रती रतिप्रियानन्दा तथैव च मनोन्मनी ॥
वाग्भवं प्रथमं चोक्त्वा परायै तदनन्तरम् ।
अपरायै द्विरूपायै हेसौ वाच्यावतःपरम् ॥
सदाशिव महाप्रेत ङेन्तं पद्मासनं तथा ।
नम इत्येव मन्त्रोऽयं पीठन्यास उदाहृतः ।

एवं पीठे देहमये चिन्तयेदिष्टदेवताम् ॥

अथादौ कामकलारूपमात्मानं विभाव्य मूलाधारात्
ण्डलिनीं परमशिवान्तं ध्यात्वा चन्द्रामृतेन संप्लाव्य कर-
च्छपिकया पुष्पं गृहीत्वा सुषुम्नया आवाह्य हृदयाष्टदलरक्त-
मध्ये ध्यायेत् । तदुक्तं स्वतन्त्रे

अतः कामकलाध्यानमावाह्य कालिकां शिवाम् ।
कूर्माख्यमुद्रया पुष्पैश्चक्रमध्ये निधापयेत् ॥

अथ कामकला यथा ।

मुखं विन्दुवदाकारं तदधः कुचयुग्मकम् ।
सर्वविद्यामृतापूर्णं सर्ववाग्विभवप्रदम् ॥
सर्वार्थसाधकं देवि ! सर्वरञ्जनकारकम् ।
तदधः सपरार्द्धञ्च सुपरिष्कृतमण्डलम् ॥
सर्वदेवादिभूतान्तःसर्वदेवनमस्कृतम् ।
सर्वाह्लादसुसंपूर्णं सर्ववश्यप्रवश्यकम् ॥
एतत् कामकलाध्यानं सुगोप्यं साधकोत्तमैः ।

श्रीक्रमेऽपि—

सा मधुमती नाम्ना मायामोहनकारिणी ।
बाह्याभ्यन्तरयोगेन चिन्तनीयाञ्च तां शृणु ॥
त्रैलोक्यमेकरूपेण स्वात्मानमेकरूपिणम् ।
चाकृतिस्वरूपेण सर्वां शान्तिं विचिन्तयेत् ॥
भावयेत् कामिनीं सर्वां देवीमोङ्काररूपिणीम् ।
चिन्तयेत् सुन्दरीं देवीं सर्वव्यापककारिणीम् ॥
ओंकारः सर्वमन्त्रः स्यादपरं स्याच्चतुष्टयम् ।
विन्दुत्रयस्य देवेशि ! प्रथमे देवि ! वक्त्रके ॥
विन्दुद्वयं स्तनद्वन्द्वं हृदि स्थाने नियोजयेत् ।
तारार्द्धकलां सूक्ष्मां योनिमध्ये विचिन्तयेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तथा कामकलारूपां मदनाङ्कुरगोचरे ।
उद्यदादित्यसङ्काशां सिन्दूराभां स्तनद्वये ॥
विन्दुं सङ्कल्प्य वक्त्रे तु स्फुरद्दीपशिखां प्रिये ।
आधाराद् ब्रह्मरन्ध्रान्तं तन्त्रमार्गेण भावयेत् ॥
कामविन्दुरहं देवि ! तत्रस्थां परमेश्वरीम् ।
शिवशक्तिमयीं देवि ! तदधःस्थात् कुचद्वयम् ॥
तदधः सपरार्द्धञ्च चिद्रूपां परमां कलाम् ।
सापि कुण्डलिनी शक्तिः कामकलास्वरूपिणी ॥
सा शिखावर्त्म गच्छन्ती भित्त्वा ग्रन्थिं चतुर्दश ।
प्रविश्य परमार्गन्तु सूक्ष्ममार्गस्वरूपिणी ॥
सापि च त्रिविधा सृष्टिर्ब्रह्मविष्णुस्वरूपिणी ।
सञ्चिन्त्य साधकश्रेष्ठस्त्रैलोक्यं वशमानयेत् ॥
एतत्ते कथितं देवि ! कामकलाविनिर्णयम् ।
गोप्तव्यं हि प्रयत्नेन यदिच्छेदात्मनो हितम् ॥

अथ कूर्ममुद्रा यथा । कालिकापुराणे

वामहस्तस्य तर्जन्यां दक्षिणस्य कनिष्ठिकाम् ।
तथा दक्षिणतर्जन्यां वामाङ्गुष्ठेन योजयेत् ॥
प्रोन्नतं दक्षिणाङ्गुष्ठं वामस्य दक्षिणादिकाः ।
अङ्गुलीर्योजयेत् पृष्ठे दक्षिणस्य करस्य च ॥
वामस्य पितृतीर्थेन मध्यमानामिके तथा ।
अधोमुखे च ते कुर्य्यात् दक्षिणस्य करस्य च ॥
कूर्मपृष्ठसमं कुर्य्याद्दक्षिणस्य करस्य च ।
एवंविधः सर्वसिद्धिं ददाति पाणिकच्छपः ॥
कुर्य्यात्तु नयनाग्रे तु निमील्य नयनद्वयम् ।
समं कायशिरोग्रीवं कृत्वा स्थिरतरो बुधः ।
ध्यानं समारभेन्मन्त्री सर्वपापविनाशनम् ॥

ध्यानं यथा – स्वतन्त्रे

देव्या ध्यानं प्रवक्ष्यामि सर्वदेवोपसेविताम् ।
अञ्जनाद्रिनिभां देवीं करालवदनां शिवाम् ॥
मुण्डमालावकीर्णांसां मुक्तकेशीं स्मिताननाम् ।
महाकालहृदम्भोजे स्थितां पीनपयोधराम् ॥
विपरीतरतासक्तां घोरदंष्ट्रां शिवैः सह ।
नागयज्ञोपवीताञ्च चन्द्रार्द्धकृतशेखराम् ॥
सर्वालङ्कारयुक्ताञ्च मुण्डमालाविभूषिताम् ।
मृतहस्तसहस्रैस्तु काञ्चीबद्धां दिगम्बरीम् ॥
शिवाकोटिसहस्रैस्तु योगिनीभिर्विराजिताम् ।
रक्तपूर्णमुखाम्भोजां मदपानप्रमत्तकाम् ॥
वह्न्यर्कशशिनेत्रान्तु वह्निविन्दुयुताननाम् ।
विगतासुकिशोराभ्यां कृतकर्णावतंसिनीम् ॥
कण्ठावसक्तमुण्डालीं गलद्रुधिरचर्चिताम् ।
श्मशानवह्निमध्यस्थां ब्रह्मकेशववन्दिताम् ॥
सद्यश्छिन्नशिरः खड्गवराभीतिकराम्बुजाम् ।
तत्र वामोर्द्धहस्तेन कपालं तदधः शिरः ॥
दक्षिणोर्द्धहस्ते अभयं तदधो वरमिति ।

उक्तं महाकालकृतस्तवे ।

ऊर्द्ध्वे वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः
सव्ये चाभीर्वरञ्च ॥ इत्यादि ।

ध्यानान्तरं यथा भैरवतन्त्रे—

करालवदनां घोरां मुक्तकेशीं चतुर्भुजाम् ।
कालिकां दक्षिणां दिव्यां मुण्डमालाविभूषिताम् ॥
सद्यश्छिन्नशिरःखड्गवामाधोर्द्ध्वकराम्बुजाम् ।
अभयं वरदञ्चैव दक्षिणोर्द्ध्वाधःपाणिकाम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

महमेघप्रभां श्यामां तथैव च दिगम्बरीम् ।
कण्ठावसक्तमुण्डालीं गलद्रुधिरचर्चिताम् ॥
कर्णावतंसतानीतशवयुग्मभयानकाम् ।
घोरदंष्ट्रां करालास्यां पीनोन्नतपयोधराम् ॥
शवानां करसंघातैः कृतकाञ्चीं हसन्मुखीम् ।
सृक्कद्वयगलद्रक्तधाराभिः स्फुरिताननाम् ॥
घोररूपां महारौद्रीं श्मशानालयवासिनीम् ।
दन्तुरां दक्षिणव्यापिमुक्तालम्बिचचोच्चयाम् ॥
शवरूपमहादेवहृदयोपरि संस्थिताम् ।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ॥
महाकालेन च समं विपरीतरतातुराम् ।
भजेच्चिजगतां धात्रीं स्मेराननसरोरुहाम् ॥
एवं सञ्चिन्तयेत् कालीं धर्मकामार्थसिद्धिदाम् ॥

अथानयोरेकतरेण देवीं ध्यात्वा मानसोपचारैराराध्य पूर्ववज्जपहोमं कृत्वा नमस्कारं स्तोत्रपाठं च कुर्यात् ।

यन्त्रनिर्माणार्थं पात्राणि यथा मुण्डमालातन्त्रे—

ताम्रपात्रे कपाले वा श्मशाने काष्ठनिर्मिते ।
शनिभौमदिने वापि शरीरे मृतसम्भवे ॥
स्वर्णरौप्ये च लौहे वा चक्रमभ्यर्च्य यत्नतः ।

स्वतन्त्रेऽपि । इत्थं विन्यस्तदेहः सन् चक्रराजं समालिखेत् ।

सुवर्णे रजते ताम्रे पाषाणे वाष्टधातुषु ॥ इति ।

अथ वह्निः पूजार्थं वक्ष्यमाणगन्धाष्टकलिप्ते स्वर्णादिकुण्डगोलस्वयम्भूकुसुमागुरुलिप्ते वा स्वर्णरजतताम्रशलाकया विन्दुकण्टकेन पुष्पेण वा मन्त्रमुच्चरणन् । विन्दुमायायुतत्रिकोणपञ्चवृत्ताष्टदलपद्मचतुरस्रं चतुर्द्वारात्मकम् यन्त्रराजं लिखेदिति सत्सम्प्रदाया वदन्ति । तथा च कालीतन्त्रे—

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ।
ततो वै विलिखेन्मन्त्री त्रिकोणत्रयमुत्तमम् ॥
ततो वृत्तं समालिख्य लिखेदष्टदलं ततः ।
वृत्तं विलिख्य विधिवल्लिखेत् नूपुरयुग्मकम् ॥

स्वतन्त्रेऽपि ।

स्वयम्भूकुसुमं कुण्डगोलोत्थं रोचनागुरु ।
काश्मीरमृगनाभी च शिह्लञ्च चन्दनद्वयम् ॥
एष गन्धः समाख्यातः सर्वदा चण्डिकाप्रियः ।
एतेन गन्धयोगेन योनिचक्रं समालिखेत् ॥
योनिद्वयं ततः कुर्यात् कोणषट्कं ततः प्रिये ! ।
ततश्चाष्टदलं भूमिं चतुर्द्वारैः समन्विताम् ॥
एतत्ते कथितं चक्रमत्र पुष्पाञ्जलिं किरेत् ॥

कुमारीकल्पेऽपि ।

आदौ त्रिकोणं विन्यस्य त्रिकोणं तद्बहिर्न्यसेत् ।
बहिस्त्रिकोणमालिख्य कोणषट्कं लिखेद्बहिः ॥
मध्ये तु वैन्दवं चक्रं बीजमायाविभूषितम् ।
षट्कोणात् तु बहिर्वृत्तं ततोऽष्टदलकं लिखेत् ॥
बहिर्वृत्तेन संयुक्तं नूपुरेकेण संयुतम् ।
शत्वैवं मुक्तिमाप्नोति यन्त्रराजं न संशयः ॥
एतत् तु विलिखेत्ताम्रे कुण्डगोलविलेपिते ।
स्वयम्भूकुसुमैर्युक्ते कुङ्कुमागुरुसेविते ॥

ननु उक्तं पञ्चदशकोणं कथमुक्तं स्वतन्त्रादि तन्त्रविरोधात् । न च वाच्यं कालीतन्त्रमतमिति तत्रैव पूजायां षट्कोणश्रुतेः । तद्यथा ।

कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम् ।
विप्रचित्तान्तु संपूज्य वह्निः षट्कोणके बुधः ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इति वह्निरुपादानं व्यर्थमेव। अन्तःषट्कोणाभावात् वचनान्तरदर्शनाच्च। तथा कालीतन्त्रे।

पञ्चशक्तिं समालिख्य अधोवक्त्रां सुलक्षणाम्।

कालिकास्तुतौ च। त्रिकोणं त्रिकोणं नवकोणं पद्मम् कुलसम्भवेऽपि।

त्रिकोणं विन्यसेत् पद्मे पुनश्चापि त्रिकोणकम्।

नवकोणं पुनस्तत्र तन्मध्ये स्थापयेत् शिवाम्॥

तस्मात् षट्कोणमत्र शक्त्यात्मकमिति। ननु एवं त्रिकोण द्वयान्तर्गतभैरवीचक्रवत् नवकोणं मतान्तरं स्यात्। नैवं तत्र तत्रैव पूजायां महाविरोधः। तद्यथा कुलसम्भवे।

कालीं कपालिनीं कुल्लां कुरुकुल्लां विरोधिनीम्।

विप्रचित्तां न्यसेच्चैव वह्निः षट्कोणके बुधः॥

उग्रामुग्रप्रभां दीप्तां परत्रिकोणके न्यसेत्।

नीलां घनां वलाकाञ्च तथैवापरके त्रिके॥

मात्रां मुद्रां मिताञ्चैव परत्रिकोणके बुधः॥

एतदुक्तं भवति षट्कोणावरणान्ते अपरत्रिकोणके त्रयावरणम्। तथापरे त्रिकोणत्रयं अपरं त्रयं यजेदित्यस्य अर्थो भवेत्। मते तु त्रिकोणं नास्त्येव त्रिकोणशब्दस्य केवल त्रिकोणात्मके शृङ्गाटके शक्तित्वात्। न च वाच्यं नवयोनेर्वाह्यकोणाष्टकस्यैकैककोणपदशक्तिरिति। तत्त्रिपञ्चारपीठानुपपत्तेः समग्रचक्रपूजाभावाच्च। तस्मात् नवयोन्यात्मकमिति भावः। वस्तुतस्तु स्वतन्त्रादितन्त्रभेदात् षट्कोणान्तर्गतत्रिकोणात्मकमन्यन्तरं भवति। यतः षट्कोणशब्दस्यपारिभाषिके शक्तिरन्यत्र लक्षणा। नहि कोऽपि दृष्टपरिकल्पनां विहाय अदृष्टं कल्पयति यत् तु कालीतन्त्रे षट्कोणमुक्तं तत् तु तन्मतं बोद्धव्यम्। अन्यत्र कल्पने मानाभावात्। न चैकदैवतमन्त्रे यन्त्रद्वयकल्पने विरोध इति वाच्यम्। तारातन्त्रे।

एकदैवतमन्त्रस्य विविधयन्त्रदर्शनात्।

एतत्तु तस्याः पूजायामग्रे लिखिष्यामः।

अथ स्वर्णादिसिंहासने पुरतो यथोक्तयन्त्रं संस्थाप्य तदुपरि पूजयेत् यथा। क्लीं आधारशक्तये नमः। ॐ प्रकृत्यै नमः। ॐ कूर्माय नमः। ॐ अनन्ताय नमः। लं पृथिव्यै नमः। ॐ सुधाम्बुधये। ॐ मणिद्वीपाय। ॐ चिन्तामणिगृहाय। ॐ श्मशानाय। ॐ पारिजाताय। ॐ रत्नवेदिकायै। ॐ मणिपीठाय। दिक्षु ॐ नमो देवेभ्यः परितः बहुमांसास्थिमोदमानशिवाभ्यः ॐ शवमुण्डेभ्यः। पूर्वादिचतुर्दिक्षु ॐ धर्माय ॐ ज्ञानाय ॐ वैराग्याय ॐ ऐश्वर्याय। वह्न्यादि दिक्षु ॐ अधर्माय ॐ अज्ञानाय ॐ अवैराग्याय ॐ अनैश्वर्याय। मध्ये ॐ अनन्ताय ॐ पद्माय अं अर्कमण्डलाय उं सोममण्डलाय मं वह्निमण्डलाय सं सत्त्वाय रं रजसे तं तमसे आं आत्मने अं अन्तरात्मने पं परमात्मने ह्रीं ज्ञानात्मने। पत्रमूले पूर्वादितः ॐ इच्छायै ॐ ज्ञानायै ॐ क्रियायै ॐ कामिन्यै ॐ कामदायै ॐ रत्यै ॐ रतिप्रियायै ॐ आनन्दायै। कर्णिकायां ॐ मनोन्मन्यै। मध्ये ऐं परायै ॐ परापरायै ऐं परापरायै ह्सौः सदाशिवमहाप्रेतपद्मासनाय नमः। इति पीठपूजां कुर्यात्। नमोऽन्तेन सर्वत्र। ततः कलसस्थापनं कुर्यात्। तत्र लक्षणमाह तन्त्रान्तरे।

कलाकन्दं गृहीत्वा तु देवानां विश्वकर्मणा।

निर्मितोऽयं सुरैर्यस्मात् कलसस्तेन उच्यते॥

पद्मपादाचार्यास्तु कला सेवते इति कलसः।

सौवर्णं राजतं वापि मार्त्तिक्यं वा यथोदितम्।

क्षालयेदस्त्रमन्त्रेण कुम्भं सम्यक् सुरेश्वरि। इति स्वतन्त्रे।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ प्रयोगः। स्ववामे विन्दुषट्कोणचतुरस्रं कृत्वा सामान्योदकेनाभ्युक्ष्य तत्र आधारशक्तये नमः इति पूजयेत्। ततो नम इति क्षालिताधारं तत्र निधाय मं वह्निमण्डलाय दः कलात्मने नम इति संपूज्य फड़िति क्षालितघटं रक्तवस्त्रमाल्यादिभिरलङ्कृतं ओं इति देवीबुद्ध्या मण्डलोपरि निधाय अर्कमण्डलाय द्वादशकलात्मने नम इति संपूज्य मूलमुच्चरन् कारणेन तं संपूज्य द्रव्यैः उं सोममण्डलाय षोड़शकलात्मने नम इति दत्त्वा फड़िति दर्भैर्द्रव्यं सन्ताड्य हुं इत्यवगुण्ठ्य मूलेन वोक्ष्य नमः इत्यभ्युक्षणं कृत्वा मूलेन गन्धमादाय ओमिति मन्त्रेण कुम्भे पुष्पं दत्त्वा शापमोचनं कुर्य्यात्। तदुक्तं स्वतन्त्रे।

ततश्च कारणं द्रव्यं समानीय घटे स्थितम्।
वेष्टितं रक्तवस्त्रेण रक्तमाल्येन भूषितम्॥
वामभागे महेशानि! मण्डलं चतुरस्रकम्।
ततः संस्थापयेद्भक्त्या देवीबुद्ध्या वरानने!॥
मण्डले कलसे द्रव्ये वह्न्यर्कशशिमण्डलम्॥

पूजयेदित्यर्थः। भावचूड़ामणौ

स्ववामभागे षट्कोणं तन्मध्ये ब्रह्मरन्ध्रकम्।
लिखित्वा तत्र कुम्भं वै सौवर्णं राजतञ्च वा॥
ताम्रं भूमिमयं वापि यद्वा लौहविवर्जितम्।

तन्त्रान्तरे—

आधारे स्थापयेन्मन्त्री सौवर्णं वाथ राजतम्।
कांस्यजं मृण्मयं वापि घटमव्रणशालिनम्॥
सौवर्णं भोगदं प्रोक्तं राजतं मोक्षदं स्मृतम्।
कांस्यं कान्तिकरञ्चैव मृण्मयं पुष्टिदं भवेत्॥

अथ काव्यशापविमोचनं कुर्य्यात्। तदुक्तं कुमारीतन्त्रे

अन्यच्च शृणु देवेशि! यथा पानादिकर्मणि।
दोषो न जायते देवि! तान् वै मन्त्रान् शृणुष्व मे॥
एकमेव परं ब्रह्म स्थूलसूक्ष्ममयं ध्रुवम्।
कचोद्भवां ब्रह्महत्यां तेन ते नाशयाम्यहम्॥
सूर्य्यमण्डलसम्भूते! वरुणमण्डलसम्भवे!।
अमावीजमये देवि! शुक्रशापाद्विमुच्यताम्॥
देवानां प्रणवो वीजं ब्रह्मानन्दमयं यदि।
तेन सत्येन देवेशि! ब्रह्महत्यां व्यपोहतु॥
एवं मन्त्रत्रयेणैव अभिमन्त्र्य सुरां शुभाम्।
प्रदद्यात् कालिकायै च ततो नैवेद्यभुग्भवेत्॥

इति मन्त्रत्रयं द्रव्योपरि त्रिर्जपेत्। ओं रां रीं रूं रैं रौं रः ब्रह्मशापविमोचनं द्रव्योपरि दशधा जपेत्। ह्रीं श्रीं क्रां क्रीं क्रूं क्रैं क्रौं क्रः सुराकृष्णशापं विमोचय अमृतं स्रावय स्रावय स्वाहा। इति कृष्णशापविमोचनं दशधा जपेत्। यथोत्तरतन्त्रे—हंसः शुचि सद्वसुरन्तरीक्षं सद्धोता वेदीषदतिथिर्दुरोणसत् नृषद्वर ऋतसत् सद्व्योम सदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत्। इति ऋचा वारत्रयं द्रव्यमभिमन्त्र्य तदुपरि आनन्दभैरव्यौ ध्यायेत्। यथा

सूर्य्यकोटिप्रतीकाशं चन्द्रकोटिसुशीतलम्।
अष्टादशभुजैर्युक्तं पञ्चवक्त्रं त्रिलोचनम्॥
अमृतार्णवमध्यस्थं ब्रह्मपद्मोपरिस्थितम्।
वृषारूढ़ं नीलकण्ठं सर्वाभरणभूषितम्॥
कपालखट्वाङ्गधरं घण्टाडमरुवादिनम्।
पाशाङ्कुशधरं देवं गदामूषलधारिणम्॥
खड्गखेटकपट्टीशं मुद्गरं शूलदन्तकम्।
विचित्रखेटकं दण्डं वरदाभयपाणिनम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

लोहितं देवदेवेशं भावयेत् साधकोत्तमः ॥

एवं ध्यात्वा ह स क्ष म ल व र यूं आनन्दभैरवाय वषट् इत्यानन्दभैरवं त्रिः संपूज्य आनन्दभैरवीं ध्यायेत् यथा—

भावयेच्च सुधां देवीं चन्द्रकोट्याननप्रभाम् ।
हेमकुन्देन्दुधवलां पञ्चवक्त्रां त्रिलोचनाम् ॥
अष्टादशभुजैर्युक्तां सर्वानन्दकरोद्यताम् ।
प्रहसन्तीं विशालाक्षीं देवदेवस्य सम्मुखीम् ॥

एवं ध्यात्वा ह स क्ष म ल व र षीं सुधादेव्यै वौषट् इति आनन्दभैरवीं संपूज्य द्रव्योपरि त्रिकोणचक्रं विलिख्य तत्र त्रिपंक्तिक्रमेण आदि १६ कादि १६ थादि १६ । हं ल क्षं मध्यलसितं विलिख्य शिवशक्त्योः समायोगाद्द्रव्यमध्ये अमृतत्त्वं विचिन्त्य धेनुमुद्रया अमृतीकृत्य वं इति वरुणबीजं मूलमन्त्रं चाष्टधा तदुपरि जप्त्वा देवतामयं भावयेदिति द्रव्यशुद्धिः । तदुक्तं स्वतन्त्रे ।

ततश्च भावयेद्द्रव्ये मध्येऽलक्तनिभं प्रिये ! ।
अकथादिभिस्त्रिपङ्क्त्या तु हलक्षं मध्यमण्डितम् ॥
पूर्वोक्तयोनिमुद्रायां शिवशक्त्योः समागमम् ।
अमृतं चिन्तयेद्द्रव्यमष्टधाप्यमृतं जपेत् ॥
अष्टधा मूलमन्त्रञ्च जपेद्भूत्वा घटं ततः ।
एतत्तु कारणं देवि ! सुरसङ्घनिषेवितम् ॥
अतएव तस्य नाम सुरेति भुवनत्रये ।
अस्य गन्धः केशवस्तु तेन गन्धेन कौलिकः ॥
सुरया पूजयेत् देवीं दक्षिणां कालिकां शुभाम् ।
ततः शङ्खं वीरपात्रं स्थापयेन्मध्यभागतः ॥
श्रीविद्योक्तक्रमेणैव ततः पूजां समारभेत् ।

समयाचारेऽपि ।

सामान्यार्घ्यं ततः कृत्वा पयसा साधकोत्तमः ।
तज्जलैर्मण्डलं कृत्वा पात्राणि स्थापयेदथ ॥

कुमारीतन्त्रेऽपि ।

ततोऽर्घ्यं कारयेन्मन्त्री तया नार्य्या सुवेशया ।
अर्घ्यद्रव्यमर्घ्यपात्रे निःक्षिपेद्यत्नतः सुधीः ॥
कुण्डगोलोद्भवं द्रव्यं स्वयम्भूकुसुमं तथा ।
नाधर्मो जायते देवि ! महामन्त्रस्य साधने ॥

मुण्डमालायाञ्च ।

रक्तचन्दनबिल्वादिजवाकुसुमवर्वरैः ।
अर्घ्यं दत्त्वा महेशानि ! सर्वकामार्थसिद्धये ॥
सुरया चार्घ्यदानेन योगिनीनां भवेत् प्रियः ।
महायोगी भवेद्देवि ! पीठप्रक्षालितैर्जलैः ॥
स्वयम्भूकुसुमे दत्ते भवेत् षट्कर्मभाजनः ।
सुशीतलजलैर्वापि कस्तूरीकुङ्कुमान्वितैः ॥
कुण्डगोलोत्थबीजैर्वा सर्वसिद्धीश्वरो भवेत् ।
जवादिना कृतार्घ्यं तु पूर्वशोधितद्रव्यं किञ्चित् क्षिपेत् ॥

तदुक्तं श्रीक्रमे । अर्घ्यविधौ ।

पूर्वन्तु शोधितं द्रव्यं गुप्तेनैव तु संक्षिपेत् ॥

अथवा ताराप्रकरणे च ।

शङ्खस्थितं तोयपूर्णं जवापुष्पञ्च वर्वरम् ।
चन्दनं चार्ककुसुमं शुद्धाञ्चैवापराजिताम् ॥
आदानञ्च विशेषेण नित्यपूजाक्रमः स्मृतः ॥

अथात्मयन्त्रयोर्मध्ये ईंकारगर्भत्रिकोणकवृत्तषट्कोण-चतुरस्रं विलिख्य चतुरस्रे पूं पूर्णशैलाय नमः । उं उड्डीयमानपीठाय नमः । जां जालन्धरपीठाय नमः । कां कामरूपपीठाय नमः इति संपूज्य षट्कोणे षड्ङ्गानि मूलखण्ड-

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

त्रयेण त्रिकोणाग्रं दक्षोत्तरं संपूज्य मध्ये आधारशक्तिं संपूज्य त्रिकोणवृत्तषट्कोणभूषिताधारं तत्र संस्थाप्य नम इति सामान्यार्घोदकेनाभ्युक्ष्य तत्र वह्नेर्दशकलाः पूजयेत्। यं धूमार्चिषे नमः। वं उमायै नमः। लं ज्वलिन्यै नमः। वं ज्वालिन्यै नमः शं विस्फुलिङ्गिन्यै नमः। षं सुश्रियै नमः। सं स्वरूपायै नमः। हं कपिलायै नमः। लं हव्यवहायै नमः। क्षं कव्यवहायै नमः। इति संपूज्य मं वह्निमण्डलाय दशकलात्मने अर्घ्यपात्रासनाय नमः। इति संपूज्य षट्कोणे षड्ङ्गं मध्ये व्यस्तमूलेन देवीम् इष्ट्वा कपालादिपात्रं फडिति क्षालितं तत्राधारोपरि संस्थाप्य सूर्य्यमण्डलं तत्र यजेद्यथा। कं भं तपिन्यै खं वं तापिन्यै गं फं धूम्रायै घं पं मरीच्यै ङं नं ज्वलिन्यै चं धं रुच्यै छं दं सुषुम्नायै जं थं भोगदायै झं तं विश्वायै ञं णं बोधिन्यै टं ढं धारिण्यै ठं डं क्षमायै नमोऽन्तेन संपूज्य अं अर्कमण्डलाय द्वादशकलात्मने अर्घ्यपात्राय नमः। इतीष्ट्वा त्रिकोणवृत्तषट्कोणं पात्रमध्ये विलिख्य समस्तव्यस्तमन्त्रेण त्रिकोणं संपूज्य वमिति वरुणबीजं मूलमन्त्रं विलोममातृकाञ्च पठित्वा घटस्थकारणामृतेन त्रिभागमर्घ्यं संपूर्य्य शेषं जलेन पूरयेत्। ततो दूर्वाक्षतरक्तचन्दनजवार्कश्वेतापराजिताकरवीरविल्ववर्वरीकुन्दसुगन्धिद्रव्याणि शुद्धिमोनमुद्राकुण्डगोलादिकञ्च संशोध्य तत्र निःक्षिप्य सोममण्डलं पूजयेद् यथा। अं अमृतायै नमः आं मानदायै नमः इं पुषायै नमः ईं तुष्ट्यै नमः उं पुष्ट्यै नमः ऊं रत्यै नमः ऋं धृत्यै नमः ॠं शशिन्यै नमः ऌं चन्द्रिकायै नमः ॡं कान्त्यै नमः एं ज्योत्स्नायै नमः ऐं श्रियै नमः ओं प्रीत्यै नमः औं अङ्गदायै नमः अं पूर्णायै नमः अः पूर्णामृतायै नमः उं सोममण्डलाय षोडशकलात्मने अर्घ्यपात्रामृताय नमः इति

संपूज्य पूर्ववदुयन्त्रं कारणैः लिखित्वा त्रिकोणत्रिरेखायां अं १६ कं १६ थं १६ मध्ये हं लं क्षं विलिख्य मूलखण्डत्रयेण त्रिकोणमिष्ट्वा षट्कोणे षड्ङ्गानि संपूज्य।

गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु॥

इत्यनेनाङ्कुशमुद्रया सूर्य्यमण्डलात्तीर्थमावाह्य आनन्दभैरवभैरव्यौ पूर्वोक्तक्रमेण संपूज्य पूर्वादिक्रमेण पञ्चरत्नं यजेद्यथा। ग्लुं गगनमण्डलेभ्यः स्लुं स्वर्गरत्नेभ्यः प्लुं पातालरत्नेभ्यः म्लुं मर्त्यरत्नेभ्यः न्लुं नागरत्नेभ्यः इति नमोऽन्तेन यजेत्। अथैषां भेदोऽपि लिख्यते। तदुक्तं यामले।

मांसन्तु त्रिविधं प्रोक्तं जलभूचरखेचरम्।
गोधा चैवाश्वमहिषवराहाजमृगोद्भवम्॥
महामांसाष्टकं प्रोक्तं देवताप्रीतिकारणम्॥

मांसाभावे तदनुकल्पं निक्षिपेत्। तदुक्तं समयाचारे।

लवणार्द्रकपिण्याकगोधूममांसपञ्चमम्।
लशुनञ्च महादेवि! मांसप्रतिनिधौ स्मृतम्॥
मत्स्यन्तु त्रिविधं प्रोक्तं उत्तमाधममध्यमम्।
उत्तमं त्रिविधं देवि! शालपाठीनरोहितैः॥
प्रवीणं कण्टकैर्हीनं तैलाक्तं स्वादुसंयुतम्।
देव्याः प्रीतिकरञ्चैव मध्यमं स्याच्चतुर्विधम्॥—
क्षुद्राणि तानि सर्वाणि अधमान्याहुरुत्तमाः॥

मुद्रा द्विविधा यथा कुलार्णवे।

त्रैहेयं मण्डलाकारं चन्द्रबिम्बनिभं शुभम्।
चारुपक्वं मनोहारि शर्करादैः प्रपूरितम्॥
पूजाकाले देवताया मुद्रैषा परिकीर्त्तिता॥

यामलेऽपि।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

भृष्टधान्यादिकं यद्यच्चर्वणीयं च चर्वयेत् ।
तेषां संज्ञा कृता मुद्रा महामोदप्रवर्द्धिनी ॥

कुलकुसुमभेदं त्वग्रे लिखिष्यामः । अथैषां शुद्धि लिख्यते । तदुक्तं भैरवतन्त्रे ।

ओं प्रतद्विष्णु स्तरते वीर्य्येण मृगोलभीमकुचयोर्गरिष्ठाः ।
यस्योरुषु त्रिषु विक्रमणेष्वधिक्षिपन्ति भुवनानि विश्वाः ॥

अनया मांसमभिमन्त्र्य ।

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

इत्यनया मत्स्यं संशोध्य । ओं तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् । तद्विप्रासो विपन्यवो जागृवांसः समिन्धते । विष्णोर्यत् परमं पदं इति ऋचा मुद्रामभिमन्त्र्य ।

ओं विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंषतु ।
आसिञ्चतु प्रजापतिर्धाता गर्भं दधातु ते ॥
गर्भं धेहि सिनीवालि ! गर्भं धेहि सरस्वति ! ।
गर्भं ते अश्विनौ देवावाधत्तां पुष्करस्रजौ ॥

ह्रूं क्लूं स्त्रूं ह्लूं स्वाहा अमृते अमृतोद्भवे ! अमृतवर्षिणि अमृतं स्रावय स्रावय स्वाहा । इति कुण्डोद्भवादिकमभिमन्त्र्य सर्वं हुमित्यवगुण्ठ्य धेनुमुद्रया अमृतीकृत्य तालत्रयं दिग्बन्धं च कृत्वा सर्वेषामुपरि मूलमन्त्रं सप्तधा जपेत् । इति मांसादि शोधनम् ।

ततः ऐं ह्रीं सौं ब्रह्मरससम्भूत-मशेषरससम्भवम् ।
आपूरितं महापात्रं पीयूषरससंयुतम् ॥
अखण्डैकरसानन्दकरे परसुधात्मनि ।
स्वच्छन्दस्फुरणामत्र निधेहि कुलरूपिणि ।

अकुलस्थामृताकारे शुद्धज्ञानकरे धरे ॥
अमृतत्वं निधेह्यस्मिन् वस्तुनि क्लिन्नरूपिणि ।
तद्रूपेणैकरस्यञ्च कृत्वा ह्येतत्स्वरूपिणी ॥
भूत्वा परामृताकारं मयि चित्स्फुरणं कुरु ।

एभिर्मन्त्रैरर्घ्यमभिमन्त्र्य मध्ये कामकलां विलिख्य तत्र इष्टदेवतामावाह्य तालत्रयं दशदिग्बन्धनं च कृत्वा हुमित्यवगुण्ठनमुद्रया अवगुण्ठ्य वमिति धेनुमुद्रया अमृतीकृत्य योनिमुद्रां प्रदर्श्य हंसौ नम इतीष्ट्वा शङ्खमुद्रां प्रदर्श्य षड्ङ्गेन सकलीकृत्य मत्स्यमुद्रया आच्छाद्य मूलमन्त्रं तदुपरि दशधा जप्त्वा देवतारूपमर्घ्यं भावयेत् । ततः ।

पुष्पाञ्जलित्रयं दत्त्वा धूपदीपौ प्रदर्शयेत् !

इति संक्षिप्तार्घ्यसाधनम् ।

सम्पूर्णप्रकारस्तु मत्कृततत्त्वानन्दतरङ्गिण्याम् अनुसन्धेयः ।

पूजासमाप्तिं यावत् तावदर्घ्यं न चालयेत् ॥

अथ अवगुण्ठनमुद्रा यथा ज्ञानार्णवे ।

सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी ।
अवगुण्ठनमुद्रेयमभितो भ्रमिता सती ॥

तदुक्तं तत्रैव ।

मध्यमे गुटिकाकारे तर्जन्युपरि संस्थिते ।
अनामिकामध्यगते तथैव हि कनिष्ठके ॥
सर्वा एकत्र संयोज्य अङ्गुष्ठपरिपीड़िताः ।
योनिमुद्रा समाख्याता त्रैलोक्योत्पत्तिमातृका ॥

शङ्खमुद्रा यथा । तन्त्रान्तरे ।

वाममुष्ट्यन्तरेऽङ्गुष्ठं नियोज्य सरलाङ्गुलीः ।
दक्षिणस्य करस्येव वामाङ्गुष्ठेन संस्पृशेत् ॥
शङ्खमुद्रेयमाख्याता मन्त्रविद्भिरनुत्तमा ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

देवताङ्गे षडङ्गञ्च सकलीकरणं भवेत् ॥
दक्षपाणिपृष्ठदेशे वामपाणितलं क्षिपेत् ।
अङ्गुष्ठौ चालयेत् सम्यङ्मुद्रेयं मत्स्यरूपिणी ॥
ततो देव्या अर्घ्यं गृहीत्वा ।
घटश्रीपात्रयोर्मध्ये पात्रे च स्थापयेत्ततः ।

घटसमीपे गुरुपात्रं ततो भोगपात्रं ततः शक्तिपात्रं योगिनीपात्रं वीरपात्रं वलिपात्रं पाद्याचमनीयपात्राणि सामान्यार्घ्यैः व्युत्क्रमेण स्थापयेत् । ततः शुद्धिसहितकारणेन तत्त्वमुद्रया श्रीगुरुपादुकां स्मरन् तत्पात्रामृतेन श्रीअमुकानन्दनाथगुरुपादुकां तर्पयामि, नमः इति त्रिः सकृद्वा मूर्ध्नि सन्तर्प्य एवं परमगुरु-परापरगुरु-परमेष्ठिगुरूनपि सन्तर्पयेत् ततः श्रीपात्रान् मूर्ध्नि श्रीआनन्दभैरवं तर्पयामि नमः इति मन्त्रेण त्रिः सन्तर्प्य ततो देवीं सायुधां सवाहनां सपरिवारां हृदि सन्तर्पयेत् ।

अत्र तत्त्वमुद्रा यथा । स्वतन्त्रे ।
अङ्गुष्ठानामिकायोगाद्वामहस्तस्य पार्वति !
तर्पयेत् कालिकां देवीं सायुधां सपरीकराम् ॥

अथ तत्त्वशुद्धिं कुर्यात् । तदुक्तं श्रुतौ । ओं प्राणापानव्यानोदानसमाना मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ १ ॥ ओं पृथिव्यप्तेजोवायुराकाशानि मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ २ ॥ ओं प्रकृत्यहङ्कारबुद्धिमनःश्रोत्राणि मे इत्यादि ॥ ३ ॥ ओं त्वक्चक्षुर्जिह्वाघ्राणवचांसि मे इत्यादि ॥ ४ ॥ ओं पाणिपादपायूपस्थशब्दा मे इत्यादि ॥ ५ ॥ ओं स्पर्शरूपगन्धाकाशानि इत्यादि ॥ ६ ॥ ओं वायुतेजःसलिलभूम्यात्मानो मे शुद्ध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहा ॥ ७ ॥ इति सप्तवि

ऋग्भिर्विमृश्य कारणेन करतलं सम्मार्ज्य दक्षहस्ते त्रिकोणं लिखित्वा कलायसदृशीं शुद्धिं दक्षिणवामभुजसंमुखमध्येषु निधाय वामहस्ताङ्गुष्ठमध्यमानामायोगैरेकां गृहीत्वा मन्त्रान्ते ह्रीं श्रीं आत्मतत्त्वेन स्थूलदेहं शोधयामि स्वाहा । अनेन अधःस्थां शुद्धिं स्वीकृत्य ह्रीं श्रीं विद्यातत्त्वेन सूक्ष्मदेहं शोधयामि स्वाहा । अनेन दक्षिणस्थां स्वीकृत्य ह्रीं श्रीं शिवतत्त्वेन परदेहं शोधयामि स्वाहा अनेन उत्तरस्थां स्वीकृत्य ह्रीं श्रीं सर्वतत्त्वेन तनुत्रयाश्रयं जीवं शोधयामि स्वाहा अनेन वामदक्षिणमध्यस्थां स्वीकृत्य वस्त्रेण हस्तौ विशोध्य हस्ताभ्यां सर्वाङ्गं मार्जयेदिति तत्त्वशुद्धिः । विस्तृतिस्तु मत्कृततत्त्वानन्दतरङ्गिण्यामनुसन्धेया ।

ततः श्रीपात्राद्बिन्दुस्वीकारम् आर्द्रं ज्वलतीति ऋग्भिः स्वदैवतमन्त्रेण वा कृत्वा श्रीपात्रामृतेन पूजोपकरणाभ्युक्षणात् सर्वं ब्रह्ममयं भवेदिति । ततः सिंहासनस्य पूर्वदक्षिणपश्चिमोत्तरेषु त्रिकोणवृत्तं विलिख्य ऐं ह्रीं क्लीं मण्डलाय नमः । इति मण्डलान् संपूज्य पूर्वे वां वटुकाय नमः इति गन्धादिभिरिष्ट्वा अर्घ्यपूर्णसलिलमांसमीनमुद्रापुष्पयुतं वलिमुपस्कृत्य वलिपात्रामृतेन वामाङ्गुष्ठानामाभ्याम् उत्सृजेत् अनेन । एह्येहि देवीपुत्र ! वटुकनाथ ! कपिलजटाभारभास्कर ! त्रिनेत्र ! ज्वालामुख ! सर्वविघ्नान् नाशय नाशय सर्वोपचारसहितवलिं गृह्ण गृह्ण स्वाहा एष वलिर्वटुकाय नमः । दक्षिणेयं योगिनीभ्यो नमः इति योगिनीः समभ्यर्च्य दक्षानामाङ्गुष्ठाभ्यां पूर्ववद्वलिम् अनेन दद्यात् ।

ऊर्ध्वं ब्रह्माण्डतो वा दिवि गगनतले भूतले निस्तले वा
पाताले वा तले वा पवनसलिलयोर्यत्र कुत्र स्थिता वा ।
क्षेत्रे पीठोपपीठादिषु च कृतपदा धूपदीपादिकेन

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

प्रीता देव्यः सदा नः शुभवलिविधिना पान्तु वीरेन्द्रवन्द्यान् ॥

सर्वयोगिनीः ह्रूं फट् स्वाहा। एष वलिर्योगिनीभ्यो नमः। पश्चिमे क्षां क्षेत्रपालमभ्यर्च्य वाममुष्टिकृतदीर्घया तर्जन्या वलिं दद्यात् अनेन। क्षां क्षौं क्षूं क्षैं क्षौं क्षः क्षेत्रपाल! धूपदीपसहितं वलिं गृह्ण गृह्ण गृह्ण स्वाहा एष वलिः क्षेत्रपालाय नमः। उत्तरे गां गणेशमभ्यर्च्य दण्डाकारसर्वाङ्गुलिमध्यद्वयोगैर्वलिं दद्यात्। गां गौं गूं गणपतये विरोधिसर्वजनमेव संमारय स्वाहा। एष वलिर्गणपतये नमः। अथ स्ववामे पूर्ववत् मण्डलं कृत्वा ऐं ह्रीं व्यापकमण्डलाय नमः इति संपूज्य तत्र साधारणवलिं संस्थाप्य मूलेन अभिमन्त्र्य गन्धपुष्पधूपदीपादिना तं संपूज्य ओं क्रीं सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यः हुं फट् नमः। एष वलिः सर्वभूतेभ्यो नमः। इति तत्त्वमुद्रया उत्सृजेत्। सशक्तश्चेत् सर्वभूताय वलिमेकं दद्यात्। ततः पूर्ववत् षड्ङ्गन्यासं कृत्वा कामकलां विभाव्य तरुणदिवाकरारुणकुसुमाञ्जलिं कूर्ममुद्रया गृहीत्वा मूलाधारात् कुण्डलिनीं ब्रह्मपथे परशिवान्तं ध्यात्वा हृदयाष्टदलपीठे समानीय मूलेन मूर्त्तिं कल्पयेत्। तदुक्तं तन्त्रान्तरे।

देवीं सुषुम्नामार्गेण आनीय ब्रह्मरन्ध्रकम्।
वामनासापुटे धृत्वा निर्माल्यं स्वाञ्जलिस्थितम्।
पुष्पमारोप्य तत्पुष्पं प्रतिमादौ निधापयेत्॥

भैरवतन्त्रे च। ततः पूर्वोक्तरूपां तां ध्यायेच्चैव हि दक्षिणाम्।

योगिनीचक्रसंहितां महाकालसमन्विताम्॥

कालीतन्त्रेऽपि।

ततो हृदयपद्मान्तःस्फुरन्तीं परमां कलाम्।
यन्त्रमध्ये समावाह्य न्यासजालं प्रविन्यसेत्॥

कुमारीकल्पेऽपि।

ततो हृदयपद्मान्तःस्फुरन्तीं विद्युताकृतिम्।
सुषुम्नावर्त्मना नीत्वा शिरःस्थाने महेश्वरीम्॥
ततो वै हृदयाम्भोजे पुष्पान्तरे समाहृयेत्।
नासया वा महादेवि! वायुवीजेन मन्त्रवित्॥
देवेशीति च मन्त्रेण विन्दुनावाहयेत् सुधीः॥

अथ पूर्वोक्तरूपं ध्यात्वा दीपाद्दीपान्तरमिति च परएवे संयोज्य यमिति वायुवीजमुच्चरन् वामनासापुटपथेन देवीं कुसुमाञ्जलावानीय मन्त्रमध्ये समावाहयेत्। अनेन मन्त्रेण।

देवेशि! भक्तिसुलभे! परिवारसमन्विते!।
यावत्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव॥

दे इति यन्त्रमध्ये देवीं समावाह्य महाकालसहितदक्षिणकालिके! इहागच्छ इहागच्छ इह तिष्ठ इह तिष्ठ सन्निहिता भव इह सन्निरुद्धा भूत्वा पूजां गृहाण। इत्याह्य पूर्ववज्जीवन्यासं लेलिहामुद्रया कुशविष्टरेण वा कृत्वा इत्यवगुण्ठ्य षड्ङ्गेन सकलीकृत्य परमीकरणं कृत्वा कोटिभिः दशदिग्बन्धनं विधाय अमृतीकरणं च कृत्वा कृतार्देवीनामसम्बोधनान्ते ओं स्वागतं कुशलमिदमासनमिहागमिति वदेत्। अथ आवाहनादिमुद्रा यथा। दक्षिणार्त्तसंहितायाम्।

ऊर्द्ध्वाञ्जलिमधः कुर्य्यादियमावाहनी भवेत्।
इयन्तु विपरीता स्यात्तदा वै स्थापनी भवेत्॥
ऊर्द्ध्वाङ्गुली मुष्टियोगा तदेयं सन्निधापनी।
अन्तराङ्गुष्ठयुगला तदेयं सन्निरोधनी॥

अथ लेलिहामुद्रा यथा।

तर्जनीमध्यमानामासमं कुर्य्यादधोमुखम्।
अनामायां क्षिपेद्दत्वा मृदु कृत्वा कनिष्ठिकाम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

लेलिहानाममुद्रेयं जीवन्यासे प्रकीर्त्तिता ।
अञ्जलिं चार्घ्यवत् कृत्वा परमीकरणं भवेत् ॥

ततः खड्गमुण्डवराभययोनीर्दर्शयित्वा प्रतिचक्रे रश्मि वृन्ददेवतामावाहयेत् । तदुक्तं स्वतन्त्रे ।

ध्यात्वा देवीं समावाह्य योनिमुद्रान्तु दर्शयेत् ।
खड्गमुण्डवराभीतिपरां योनिन्तु दर्शयेत् ।
ततश्च प्रतिचक्रेषु देवीमावाहयेत् सदा ॥

अथ खड्गादिमुद्रा यथा ।

कनिष्ठानामिके बध्वा स्वाङ्गुष्ठेनैव दक्षतः ।
शेषाङ्गुलीस्तु प्रसृते संपृष्ठे खड्गमुद्रिका ॥
अन्तराङ्गुष्ठमुष्टिञ्च कृत्वा वामकरस्य च ।
मध्यमायां दक्षिणस्य तथालम्ब्य प्रयत्नतः ॥
मध्यमेनाथ तर्जन्या अङ्गुष्ठाभ्यां विमृष्य च ।
दक्षिणं योजयेत् पाणिं वाममुष्टौ च साधकः ॥
दर्शयेद्दक्षिणे भागे मुण्डमुद्रेयमुच्यते ।
वरदाभयमुद्राञ्च वरदाभयवत् करे ॥
तर्जन्यनामिके मध्ये कनिष्ठादिक्रमेण तु ।
करयोर्योजयित्वैव कनिष्ठामूलदेशतः ॥
अङ्गुष्ठाग्रन्तु निःक्षिप्य महायोनिः प्रकीर्त्तिता ॥

अथ रश्मिवृन्ददेवता यथा । कालिकोपनिषदि ।

ओं काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ।
विप्रचित्ता उग्रा उग्रप्रभा दीप्ता नीला घना वलाका च
मात्रा मुद्रामिता चैव दशपञ्चमकोणगा ॥ इति ।

आसां ध्यानम् । यथा कालीतन्त्रे

सर्वाः श्यामा असिकरा मुण्डमालाविभूषणाः ।
तर्जनीं वामहस्तेन धारयन्त्यश्च संविताः ॥

इति पूर्वादिपञ्चदशकोणे ध्यात्वा आवाहयेत् । तद्यथा फेत्कारिण्याम् ।

ततः पूर्वादिकोणेषु वामावर्त्तेन विन्यसेत् ।

ततः पूर्वास्यस्तद्दले ब्राह्म्यादिकं ध्यात्वा आवाहयेत् । तद्यथा कुलसम्भवे ।

महीमण्डलतश्चापि ब्राह्मी नारायणी तथा ।
माहेश्वरी च चामुण्डा कौमारी चापराजिता ।
वाराही च तथा पूज्या नारसिंही तथैव च ॥

आसां ध्यानं यथा ।

ब्रह्माणीं हंससंरूढां स्वर्णवर्णां चतुर्भुजाम् ।
चतुर्वक्त्रां त्रिनेत्राञ्च ब्रह्मकूर्चञ्च पङ्कजम् ॥
दण्डपद्माक्षसूत्रञ्च दधतीं चारुहासिनीम् ।
जटाजूटधरां देवीं भावयेत् साधकोत्तमः ॥
नारायणीं महादीप्तां श्यामां गरुड़वाहिनीम् ।
नानालङ्कारसंयुक्तां चारुकेशां चतुर्भुजाम् ॥
घण्टां शङ्खं कपालञ्च चक्रं सन्दधतीं पराम् ।
मधुमत्तमदोल्लोलदृष्टिं सर्वाङ्गसुन्दरीम् ॥
माहेश्वरीं वृषारूढां शुभ्रां त्रिनयनान्विताम् ।
कपालं डमरुञ्चैव वरदाभयशूलकम् ॥
टङ्कञ्च दधतीं देवीं नानाभरणभूषिताम् ॥
चामुण्डामट्टहासां प्रकटितदशनां भीमवक्त्रां त्रिनेत्रां
नीलाम्भोजप्रभाभां प्रमुदितवपुषां नारमुण्डालिमालाम् ।
खड्गं शूलं कपालं नरशिरघटितं खेटकं धारयन्तीं
प्रेतारूढां प्रमत्तां मधुमदमुदितां भावयेच्चण्डरूपाम् ॥
कौमारीं कुङ्कुमप्रभां त्रिनेत्रां शिखिसंस्थिताम् ।
चतुर्भुजां शक्तिपाशमङ्कुशाभयधारिणीम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

नानालङ्कारसंयुक्तां प्रमत्तां परिचिन्तयेत् ॥
अपराजिताञ्च पीताभामक्षसूत्रवरप्रदाम् ।
कपालं मातुलाङ्गञ्च दधतीं परिचिन्तयेत् ॥
वाराहीं धूम्रवर्णाञ्च वराहवदनां शुभाम् ।
फलकखड्गमूषलहलवेदभुजैर्युताम् ।
नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः ॥

अत्र काम्या पूर्वा दिक् न त्वन्या विशेषवचनात् । यत्र रवेरुदयः किंवा पूज्यपूजकयोरन्तरा इति । आगमे सर्वदैवत-पूजने पूज्यपूजकयोरन्तर एव पूर्वा दिक् । तदुक्तं राघव-भट्टेन ।

यत्रैव भानुस्तु वियत्युदेति प्राचीति तां वेदविदो वदन्ति ।
अथान्तरा पूजकपूज्ययोश्च सदागमज्ञाः प्रवदन्ति तान्तु ॥

अन्यच्च । देवसाधकयोरन्तः पूर्वाशा दिगिहोच्यते ॥

अपिच । पूज्यपूजकयोरन्तः पूर्वाशैव निगद्यते ॥

तन्त्रान्तरेऽपि ।

होतुः पूर्वं पूर्वभागं प्रदिष्टं सव्यं भागं दक्षिणन्त्यागमज्ञैः ।
दक्षं विद्यादुत्तरं भागमग्रं प्रज्ञावद्भिः पश्चिमं भागमुक्तम् ॥

अग्रमिति संमुखमित्यर्थः ॥ यत्तु ।

पुरन्दरमुखो मन्त्री पूजयेत् त्रिपुरां यदि ।
देवीपश्चात्तदा प्राची प्रतीची त्रिपुरेश्वरः ॥

इति गुप्तार्णववचनम्, तत्त्रिपुराविषये बोद्धव्यम् । देवी-मात्रविषयकल्पने अन्यथा भवेत् । अथ मूलमन्त्रान्ते । श्रीमहा-कालसहितां श्रीदक्षिणकालिकां तर्पयामीति त्रिः सन्तर्प्य सायुधां सपरिवाराञ्च तर्पयेत् । ततोऽष्टादशोपचारैः षोड़शोप-चारैर्दशोपचारैः पञ्चोपचारैर्वा देवीं पूजयेत् । तदुक्तं स्वतन्त्रे ।

आवाहयेत् प्रतिदले मूलदेवीञ्च तर्पयेत् ।

तर्पयेत् कालिकां देवीं सायुधां सपरीकराम् ।
पाद्यादिभिर्मूलदेवीं संपूज्य तर्पयेत् पुनः ॥

अथोपचारा यथा । तदुक्तं फेत्कारिण्याम् ।

असनावाहने चार्घ्यं पाद्यमाचमनं तथा ॥
स्नानं वासोपवीतञ्च भूषणानि च सर्वशः ।
गन्धपुष्पं तथा धूपदीपावन्नञ्च तर्पणम् ॥
माल्यानुलेपनञ्चैव नमस्कारविसर्जने ।
अष्टादशोपचारैस्तु मन्त्री पूजां समाचरेत् ॥

मन्त्ररत्नावल्यान्तु ।

पाद्यार्घ्याचमनीयञ्च स्नानं वसनभूषणम् ।
गन्धपुष्पधूपदीपनैवेद्याचमनं ततः ॥
ताम्बूलमर्चना स्तोत्रं तर्पणञ्च नमस्क्रिया ।
प्रयोजयेदर्चनायामुपचारांस्तु षोड़शः ॥

अन्यच्च । अर्घ्यं पाद्यं निवेद्याथ तथैवाचमनीयकम् ।
मधुपर्काचमनञ्चैव तथा गन्धप्रसूनके ॥
धूपदीपौ च नैवेद्यं दशोपचारकं स्मृतम् ।
गन्धादिका नैवेद्यान्ता पूजा पञ्चोपचारिका ॥

अथ पूजायां विधेयो यथा । कालीकल्पे ।

श्रीपदं पूर्वमुद्धृत्य पादुकापदमुद्धरेत् ।
पूजयामि ततः पश्चात् पूजयेदङ्गदेवताः ॥
काल्यादयः पूजनीयाः क्रमेण परमेश्वरि ! ।
स्वाहा होमे तर्पणे च तर्पयामीति संस्मरेत् ॥

देवीदक्षिणे महाकालं पूजयेत् यथा । कुमारीकल्पे ।

देव्यास्तु दक्षिणे भागे महाकालं समर्चयेत् ॥

कालीकल्पेऽपि ।

महाकालं यजेद् यत्नात् पश्चाद्देवीं प्रपूजयेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ मन्त्रो यथा। ॐ क्षौं यां रां लां वां क्रौं महाकालभैरव! सर्वविघ्नान् नाशय नाशय ह्रीं श्रीं फट् स्वाहा अनेन पाद्यादिभिराराध्य त्रिस्तर्पयित्वा मूलदेवीं पूजयेत् तथा मूलान्ते च ततः पाद्यं महाकालसहित-श्रीदक्षिण कालिकायै नम इति पादयोः पाद्यं दद्यात्। केषाञ्चिन्मते तु। महाकालसहितपदसम्बलितदेवीनामप्रयोगो न भवतीति साम्प्रदायिकाः। अथ अर्घ्यं शिरसि दद्यात्। एवम आचमनीयं मधुपर्कञ्च। वमिति वरुणबीजान्ते मुखपङ्कजे दद्यात्। स्नानीयं नम इति स्नानीयं दत्त्वा शुद्धदुकूलेनाङ्गं प्रोन्मार्ज्य विचित्रपट्टवस्त्रकस्तूरीकुङ्कुमचन्दनसिन्दूरकज्जलमुक्त कुण्डलताड़ङ्कहारत्रयशङ्खकङ्कणाङ्गदग्रीवाभूषणकाञ्चीनूपुररत्नाङ्गुरीयकाद्याभरणानि विविधपद्मादिरचितमाल्यादीनि निवेद्य केवलं पुनराचमनीयं दद्यात्। तदुक्तम्।

पाद्यञ्च पादयोर्दद्यात् नामामन्त्रेण मन्त्रवित्।
शिरोमन्त्रेण देवेशि! अर्घ्यं दद्याच्छिरोपरि॥
आचमनं मधुपर्कञ्च स्वधामन्त्रेण देशिकः।
स्नानं गन्धं हृदा दद्यात् पुष्पाणि वौषड़ित्यपि॥
ततो निवेदयामीति दद्यात् सर्वं महेश्वरि!।

स्वधामन्त्रेण वरुणमन्त्रेण इत्यर्थः।

स्वधेत्याचमनीयञ्च त्रिवारं मुखपङ्कजे॥

तन्त्रान्तरे च।

नमः स्वाहा स्वधा चैव वौषड़िति यथाक्रमम्।

स्वाहा सन्निधिपाठाच्च आचमनीयं स्वधेति वकारमध्यपाठो युक्त एव भवति तन्न समीचीनम्। अत्रागमे प्रायः सङ्केतेनैव मन्त्रोद्धारः क्रियते एकमन्त्रोद्धारेऽपि कुत्रापि तत्तद्वरेण कुत्रापि पर्य्यायशब्देनापि तत्तन्मन्त्रोद्धारो दृष्ट इति

उकारमध्यपाठो युक्तः न तु वकारमध्यः। अन्यथा राघवभट्टधृतवचनविरोधापत्तेः। तद्यथा।

मधुपर्कं मुखे दद्यात् जलमन्त्रेण देशिकः। किञ्च।
वारुणेन तु मन्त्रेण मधुपर्कं मुखाम्बुजे॥ इति॥
न च वाच्यं मधुपर्कविषयमेवेदं वचनमिति।

मधुपर्काचमनयोरेकमन्त्रेण दानात् सुधेति पाठो युक्तः एवेति निश्चितम्। ततो मध्यमानामिकाङ्गुष्ठे गन्धं नम इति गन्धम् अङ्गुष्ठतर्जनीभ्यां पुष्पाणि वौषड़िति पुष्पैः संपूज्य पाद्यं स्वयम्भूकुसुमादिकञ्च वौषड़िति मन्त्रेण दत्त्वा धूपपात्रं फड़िति संप्रोक्ष्य नम इति इष्ट्वा पुरतो निधाय वामतर्जन्या संस्पृशन् धूपं निवेदयामीति श्रीपात्रामृतेन उत्सृज्य गजध्वनि मन्त्रमातः स्वाहेति घण्टां संपूज्य वामहस्तेन तां वादयन् मध्यमानामिकाङ्गुष्ठैर्धूपं दत्त्वा देवतागायत्रीं मूलमन्त्रञ्च जप्त्वा त्रिधा उत्तोलनं कृत्वा देवीं धूपयेत्। अथ सम्मुखे दीपभाजनं संस्थाप्य पूर्ववत् प्रोक्षणपूजने कृत्वा वाममध्यमया दीपपात्रं स्पृशन् दीपं निवेदयामीति निवेद्य घण्टां पूर्ववत् वादयन् मध्यमानामिकामध्ये दीपपात्रमङ्गुष्ठाग्रेण धृत्वा दर्शयेत्। ततो मधुद्रव्यं सम्मुखे कृत्वा श्रीं कालि! कालि! महाकालि! क्लीं क्लीं अमृतमासवं विधिवत् कुरु कुरु स्वाहा इति मन्त्रेण सप्तधा अभिमन्त्र्य च ग्रासमुद्रया पात्रमादाय दक्षिणपाणिना शुण्ठ्यादिकं गृहीत्वा कराभ्यां संयोज्य मूलमन्त्रान्ते शुण्ठ्यादिसहितमासवं निवेदयामीति दद्यात्। ततो नैवेद्यं स्वर्णादिपात्रे कृत्वा त्रिकोणमण्डलोपरि पुरतः संस्थाप्य हुमित्यवगुण्ठ्य यमिति वायुबीजेन संशोध्य रमिति वह्निबीजेन संदह्य वमिति वरुणबीजेन धेनुमुद्रया अमृतीकृत्य तदुपरि मूलं सप्तधा प्रजप्य वामाङ्गुष्ठेन नैवेद्यपात्रं स्पृशन् नैवेद्यं निवेदया-

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मौति दक्षिणहस्तं तत्त्वमुद्रया उत्सृजेत्। ततो जलगण्डूषं दत्त्वा प्राणादिपञ्चमुद्रां दर्शयन् वामहस्ते ग्रासमुद्रां दर्शयेत्। ततः पुनराचमनीयं दत्त्वा कर्पूरादियुक्तताम्बूलं वामाङ्गुष्ठेन धृत्वा ताम्बूलं निवेदयामीति दद्यात्। सर्वमर्घ्यजलेन उत्सृजेत् ततस्तत्त्वमुद्रया अर्घ्यामृतेन देवीं त्रिः संतर्प्य योनिमुद्रां दर्शयेत्। तदुक्तं तन्त्रान्तरे।

मध्यमानामिकाभ्यान्तु अङ्गुष्ठाग्रेण पार्वति !
दद्याच्च विमलं गन्धं मूलमन्त्रेण देशिकः॥
अङ्गुष्ठतर्जनीभ्यान्तु चक्रे पुष्पं निवेदयेत्।
यथा गन्धं तथा देवि ! धूपं दद्याद्विचक्षणः॥
मध्यमानामिकाभ्यान्तु मध्यपर्वणि देशिकः।
अङ्गुष्ठाग्रेण देवेशि ! धृत्वा दीपं निवेदयेत्॥
उत्तोलनं त्रिधा कृत्वा गायत्र्या मूलयोगतः।
तन्त्राख्यमुद्रया देवि ! नैवेद्यञ्च निवेदयेत्॥

मूलेन आचमनं ताम्बूलं तेन मुद्रया दद्यात्। सारदाटीकायाञ्च।

धूपभाजनमन्त्रेण प्रोक्ष्याभ्यर्च्य हृदात्मना।
मन्त्रेण पूजितां घण्टां वादयन् गुग्गुलुं दहेत्॥

अन्यत्रापि। गजध्वनि ततो मन्त्रमातःस्वाहेत्युदीर्य्य च।
अभ्यर्च्य वादयन् घण्टां सधूपैर्धूपयेत्ततः॥

तन्त्रान्तरे च। ततः समर्पयेत् धूपं घण्टावादनसंयुतम्।
एवं दीपदाने घण्टावादनमिति साम्प्रदायिकाः॥

अथ गन्धादिनिवेदनस्थानम्। यथा यामले।

निवेदयेत् पुरोभागे गन्धं पुष्पञ्च भूषणम्।
दीपं दक्षिणतो दद्यात् पुरतो न तु वामतः॥
वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे।

नैवेद्यं दक्षिणे चापि पुरतो न तु पृष्ठतः॥

दीपमिति घृतयुक्तञ्चेत् दक्षिणे तैलयुक्तञ्चेद्वामे इति साम्प्रदायिकाः। एवं सिता वर्त्तिश्चेत् दक्षिणतः रक्ता चेद्वामतः संमुखे तु न नियमः। नैवेद्यमिति सिद्धान्नं चेत् देवतानामे आमान्नं चेद्दक्षिणे इत्यपि बोद्धव्यम्।

अथ पुष्पनियमो यथा। मुण्डमालायाम्।

पुष्पाण्यपि तथा दद्यात् रक्तकृष्णसितानि च।
श्वेतं रक्तं जवापुष्पं करवीरं तथा प्रिये !॥
टगरं मल्लिका जाती मालती यूथिका तथा।
धुस्तूराशोकवकुलं श्वेतकृष्णापराजिता॥
वकपुष्पं विल्वपत्रं चम्पकं नागकेशरम्।
मल्लिका झिण्टिका काञ्ची रक्तं यत् परिकीर्त्तितम्।
अर्कपुष्पं जवापुष्पं वर्वरञ्च प्रियं भवेत्।
अष्टम्याञ्च विशेषेण तुष्टा भवति पार्वती॥
पद्मपुष्पेण रक्तेन सन्तुष्टाः सर्वदेवताः।
कृष्णं वा यदि वा रक्तं कालिका वरदा भवेत्॥
श्मशानधूस्तुरेणैव तुष्टा स्वप्नावती परा।
अन्यपुष्पैश्च विविधैः सन्तुष्टा देवि ! पार्वती॥
आमलक्यास्तु पत्रेण तुष्टा भवति पार्वती।
अष्टम्याञ्च चतुर्दश्यां नानापुष्पैः समर्चयेत्॥
श्मशाने रात्रिशेषे वा शनिभौमदिने तथा।

मत्स्यसूक्ते। सुगन्धिश्वेतलोहितकुसुमैरर्चयेद्दलैः॥
विल्वैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः।
ओड्रपुष्पैर्विशेषेण वज्रपुष्पेण मिश्रितम्॥
सर्वं पुष्पं प्रदातव्यं भक्तियुक्तेन चेतसा।
देवानामित्युपलक्षणं देवीनामिति बोद्धव्यम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तदुक्तं तन्त्रान्तरे।

देवीपूजा सदा कार्य्या जलजैः स्थलजैरपि।
विहितैर्वा निषिद्धैर्वा भक्तियुक्तेन चेतसा॥
पूजनीया सदा भक्त्या नृणां शीघ्रफलाप्तये॥

अथ पुष्पदानविधानम् यथा तदुक्तम्, सारदाटीकायाम्।

पुष्पं वा यदि वा पत्रं फलं नेष्टमधोमुखम्।
दुःखदं तत्समाख्यातं यथोत्पन्नं तथार्पणम्॥
अधोमुखं फलं नेष्टं पुष्पाञ्जलिविधौ न तत्।

अथ नैवेद्यं यथा। तदुक्तं मत्स्यसूक्ते।

पायसं क्षपरं दद्यात् शर्करागुड़संयुतम्।
गव्यं सुखे मधुपयस्तथान्यानि निवेदयेत्॥
शालमत्स्यञ्च पाठीनं गोधामांसमनुत्तमम्।
अन्नञ्च मधुना युक्तं यद्वाहद्याञ्च मन्त्रवित्॥

क्षपरं तिलतण्डुलमित्यर्थः। पाठीनं बोयालाख्यमत्स्यमित्यर्थः। अन्यत्रापि।

कन्दुपक्वं स्नेहपक्वं घृतसंयुक्तपायसम्।
मनःप्रियञ्च नैवेद्यं दद्याद्देव्यै पुनः पुनः॥

कन्दुपक्वं भृष्टतण्डुलगुड़युक्तादिकम्। स्नेहपक्वं लड्डुकादि। कुमारीकल्पेऽपि।

ताम्बूलञ्च सकर्पूरं नारिकेलं सशर्करम्।
पायसं सघृतञ्चैव आर्द्रकं सगुड़ं तथा॥
सतण्डुलं तिलञ्चैव दधि चैव सशर्करम्।
जम्बीरं पनसञ्चैव आम्रातकफलं तथा॥
कदलीं तिन्तिड़ीञ्चैव श्रीफलं फलमुत्तमम्।
करञ्जं वकुलञ्चैव तालं खर्जूरमेव च॥
अन्यानि च सुगन्धीनि स्वादूनि च फलानि च॥

मुण्डमालायामपि।

दधि क्षीरं गुड़ञ्चान्नं पायसं शर्करान्वितम्।
पायसं क्षौद्रमांसञ्च नारिकेलं समोदकम्॥
शशकं मेषकञ्चैव आर्द्रकञ्च सशर्करम्।
शालमत्स्यञ्च पाठीनं शकुलं गड़कं तथा॥
मद्गुरं चेलिषं दद्यात् मांसं माहिषमेव च।
पक्षिमांसं वरारोहे! डिम्बं नानासमुद्भवम्॥
कृष्णच्छागं महामांसं गोधिकां हरिणीं तथा।
जलजं मत्स्यमांसं च गण्डकीमांसमेव च॥
नानाव्यञ्जनदुग्धानि व्यञ्जनानि बहूनि च॥

नैवेद्यपात्रं यथा। यामले।

तैजसेषु च पात्रेषु सौवर्णे राजते तथा।
ताम्रे वा प्रस्तरे वापि पद्मपत्रेऽथवा पुनः॥
यज्ञदारुमये वापि नैवेद्यं कल्पयेत् बुधः।
सर्वाभावे तु माहेशि! स्वहस्तघटितं यदि॥
यद्योग्यमर्घ्यपात्रे तु तद्विधाय निवेदयेत्।
अन्यैस्तोयैर्यदुत्सृष्टमर्घ्यपात्रस्थितञ्च यत्॥
न गृह्णाति महादेवी दत्तं विधिशतैरपि।

अथ कृताञ्जलिः। श्रीदक्षिणकालिके! आवरणं ते पूजयामीति आज्ञां गृहीत्वा अग्नीशासुरवायव्यसंमुखे दिक्षु च देव्याः षड़ङ्गे वा षड़ङ्गदेवतां ध्यात्वा न्यासोक्तमन्त्रेण यजेत्। तदुक्तं कुलार्णवे। अग्नीशासुरवायव्यमध्यदिक्ष्वङ्गपूजनम्। इति। तन्त्रान्तरे च।

इष्ट्वा हृदयमाग्नेय्यामैशान्यान्तु शिरो यजेत्।
नैर्ऋत्याञ्च शिखा पूज्या वायव्यां कवचं यजेत्॥
अभ्यर्च्य पुरतो नित्यं दिक्षु वास्त्रमथार्चयेत्।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अपिच । वङ्क्षादिदिक्षु वा पूज्या तत्तदङ्गेषु च क्रमात् ॥

ध्यानं यथा ।

तुषारस्फटिकश्यामनीलकृष्णारुणार्चिषः ।
वरदाभयधारिण्यः प्रधानतनवस्त्रियः ॥

अथ गुरुपंक्तित्रयं पूजयेत् । तदुक्तं सारदाटीकायाम् ।

वायव्यादीशपर्य्यन्तं गुरुपंक्तिं समर्चयेत् ।
तदशक्तौ गुरुचतुष्टयं तदशक्तौ गुरुत्रयम् ॥

तद्दैवतऋषिमात्रं वा । अथ गुरुपंक्तिर्यथा । तदुक्तं भावचूड़ामणौ ।

भैरव उवाच ।

मातर्देवि ! महामाये बन्धमोक्षप्रवर्त्तिनि ! ।
इदानीं श्रोतुमिच्छामि गुरुक्रममनुत्तमम् ॥

देव्युवाच ।

गुरुक्रमस्तु बहुधा मन्त्रविस्तारगौरवात् ।
कालीनामप्यनादित्वात् तत् कथं कथयामि ते ॥
न ज्ञात्वा गुरुकुलं ह्येव नष्टमार्गो भविष्यसि ।
नष्टमार्गा नात्र विद्ये न तादृक् फलगोचरम् ॥
गुरूणां शिष्यभूतानां नास्ति चेत् सन्ततिक्रमः ।
मन्त्रतन्त्राश्च विद्याश्च निष्फला नात्र संशयः ॥
विंशतिं पुरुषान् वापि नवसप्तत्रयोऽपि वा ।
अज्ञात्वा गुरुवंशानां शिष्यश्च नष्टसन्ततिः ॥
स्ववंशादधिकं ज्ञेयं गुरुवंशं महाशुभम् ।
जनकादधिको ज्ञेयो मन्त्रदश्च महेश्वर ! ॥
तस्मात् सर्वत्र देवेश ! संक्षेपात् शृण तान् गुरून् ।
आदौ सर्वत्र देवेश ! मन्त्रदः परमो गुरुः ॥

परापरगुरुस्त्वं हि परमेष्ठिरहं ततः ।
सर्वतन्त्रेषु विद्यासु स्वयं प्रकृतिरूपिणी ॥
ततः पुरुषरूपश्च ततः स्वगुरुसन्ततिः ।
तेनैव हि मदंशाश्च मद्भक्ताश्च विशेषतः ॥
शैवमन्त्रेषु पुरतः सर्वत्र सिद्धिदायकः ।
दिव्यौघा गुरवो देव ! सिद्धौघा गुरवस्तथा ॥
मानवौघाः समासेन कथयामि तवाग्रतः ।
तत्रादौ कालिका देवी तस्याः शृण गुरुक्रमम् ॥
महादेवी महादेव स्त्रिपुरा चैव भैरवः ।
दिव्यौघाः गुरवः प्रोक्ताः सिद्धौघान् कथयामि ते ॥
ब्रह्मानन्दः पूर्णदेव श्चलच्चित्तश्च लोचनः ।
कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ॥
माया मायावती चैव मानवौघान् शृण प्रिये ! ॥
विमनः कुशलश्चैव भीमः शूरः सुधाकरः ।
मीनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥
मूलदेवो रन्तिदेवो विघ्नेश्वरहुताशनौ ।
समरानन्दसन्तोषौ कालिकागुरवः स्मृताः ॥

अथ देवीं प्रति भैरववाक्यम् ।

तदुक्तं तन्त्रार्णवे ।

दिव्या वसन्ति ये नित्यं सिद्धभूमाविहापि च ॥
मानवौघा मानवेषु मम रूपधराः सदा ।
आनन्दनाथशब्दान्ता गुरवः सर्वसिद्धिदाः ॥
स्त्रियोऽपि गुरुरूपाश्च अम्बान्ताः परिकीर्त्तिताः ।
मानवौघान्तिके देवि ! स्वगुरुं परिपूजयेत् ॥

अथवा प्रातःकृत्येषु यत्सामान्यगुरुकुलमुक्तं तदेवार्चयेत् । तद्यथा भावचूड़ामणौ ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथवा सर्वशास्त्रेषु गुरवः पूर्वसूचिताः ।
कुलचूड़ामणौ च ।
एकचित्तमना भूत्वा शृणु वत्स ! समाहितः ।
येषु येषु च मन्त्रेषु ये ये ऋषिगणाः स्मृताः ॥
ते ते पूज्याः सपर्य्यादौ संक्षेपाद्गदितं यया ।
अज्ञात्वा गुरुकुलं वा गुरुत्रितयमर्चयेत् ॥
चतुष्टयं वा सङ्कोचो न च कार्य्यस्ततःपरम् ।
गुरुः परमगुरुश्चैव परापरगुरुस्तथा ॥
परमेष्टि गुरुश्चैव कथिता गुरवस्तव ।
गुरुपूजां विना वत्स ! यदि पूजां समाचरेत् ॥
निष्फला मम सा पूजा ज्ञातव्या साधकोत्तमैः ।
निर्गुणं तत्तदेव स्यात् सगुणं कुलपूजनम् ॥
कुलावलोकनं चेत् स्यात् कुतः प्रोक्षणमार्जनम् ।
क्व च स्थानं क्व वा शुद्धिः क्व च न्यासविशोधनम् ॥
दीक्षाप्रभुः कुलीनः स्यात् कुलात्मा वटुकेश्वरः ।
स्वगेहे गुरुमानीय कुलरूपं गुरुं स्मरेत् ॥
गुरुक्रमञ्च कथितं गोपनीयं प्रयत्नतः ॥
न देयं यत्र कुत्रापि योगभ्रष्टे च शिष्यके ।
वैष्णवे शक्तितन्त्रे वा गाणपत्येऽथवा पुनः ।
निजं गुरुं परं ध्यात्वा ततो गुरुचतुष्टयम् ॥
पूजयित्वा यजेद्देवं न च सङ्कोचमाचरेत् ॥

श्रीमहादेव्यम्बायाः श्रीपादुकां पूजयामि नमः इति संपूज्य गुरुपात्रामृतेन त्रिः सकृद्वा तर्पयेत् । एवं महादेवानन्दनाथ-गुरुपादुकां पूजयामि नम इति संपूज्य पूर्ववत् पूजयेत् । एवं क्रमेण गुरुपंक्तित्रयं संपूज्य मानवौघान्त-स्वगुरुं गुरोर्गुरुं तद्गुरुं च पूजयेत् तर्पयेच्च । ततो रश्मिवृन्ददेवताः पूजयेत

यथा वाह्ये त्रिकोणस्य सम्मुखे ॐ कालिकायाः श्रीपादुकां पूजयामि नमः । इति पाद्यादिभिः संपूज्य योगिनीपात्रामृतेन तत्त्वमुद्रया तर्पयेत् । एवं देव्या वामे ॐ कपालिनीं दक्षे कुल्लां तदन्तस्त्रिकोणे ॐ कुरुकुल्लां ॐ विरोधिनीं ॐ विप्रचित्ताम् । तस्यान्तस्त्रिकोणे ॐ उग्रां ॐ उग्रप्रभां ॐ दीप्तां तदन्तस्त्रिकोणे ॐ मात्रां ॐ मुद्रां ॐ मितां पाद्यादिना त्रिः संपूज्य पूर्ववत्तर्पयेत् । ततोऽष्टदलपद्मे पूर्वादिक्रमेणाष्टशक्तीः पूजयेत् । यथा ॐ आं ब्रह्माण्याः श्रीपादुकां पूजयामि नमः इति पाद्यादिभिः संपूज्य तर्पयेत् । अग्नौ ॐ ईं नारायणीं नैऋते ॐ ऊं माहेश्वरीं नैऋत्यां ॐ ऋं चामुण्डां वारुणे ॐ लृं कौमारीं वायौ ॐ ऐं अपराजिताम् उत्तरे ॐ औं वाराहीम् ईशे अं अः नारसिंहीं पूर्ववत् संपूज्य तर्पयेच्च । उक्तं श्रुतौ द्वितीयचतुःषष्ठ्यष्टादशद्वादशचतुर्दशषोड़शस्वरेण प्रथममेव प्रणवेन आवाहनञ्च तेनैव पूजनं विदुः । मारीकल्पेऽपि ।

ब्रह्माद्याः पूजयेत् पत्रे पत्राग्रे भैरवान् यजेत् ।
लोकपालांस्तथा वाह्ये तदस्त्राणि च तद्वहिः ॥
अथ भैरवाः । यथा ज्ञानार्णवे ।
असिताङ्गो रुरुश्चण्डः क्रोधश्चोन्मत्तभैरवः ।
कपालो भीषणश्चैव संहारश्चाष्टमः स्मृतः ॥
एषां मन्त्रो यथा ।
क्ष्म्लवर्णा विन्दुसंयुक्ता वाङ्मायापूर्वभूषिता । इति ।

अत्र प्रयोगः । पूर्वादिवामावर्त्तन ऐं क्लीं अं असिताङ्गभैरव-श्रीपादुकां पूजयामि नमः ऐं क्लीं इं रुरुभैरव ऐं क्लीं उं चण्डभैरव ऐं क्लीं ऋं क्रोधभैरव ऐं क्लीं लृं उन्मत्तभैरव ऐं क्लीं एं कपालिभैरव ऐं क्लीं ओं भीषणभैरव ऐं क्लीं अं

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

संहारभैरव पूजयेत्तर्पयेच्च। ततो भूपूरे इन्द्रादिलोकपालान् यथा पूर्वादितः नां इन्द्र-श्रीपादुकां एवं वां वह्नि यां यम क्षां निर्ऋति वां वरुण यां वायु शां कुवेर हां ईशाननिर्ऋतिवरुणयोर्मध्ये क्रौं अनन्त इन्द्रेशानयोर्मध्ये आं ब्रह्मणः श्रीपादुकामित्यादि। तद्बहिः तदस्त्राणि पूजयेत्तर्पयेच्च। तथा वं वज्र-श्रीपादुकाम्। एवं शं शक्ति। दं दण्ड। खं खड्ग। पां पाश। अं अङ्कुश। गं गदा। शूं शूल। पं पद्म। चं चक्र श्रीपादुकामित्यादि। अथैवं क्रमेण सर्वावृतिदेवतानुलेपनगन्धपुष्पधूपदीपद्रव्यादिभिः संपूज्य त्रिः सकृद्वा पूजयेत् तर्पयेच्च। तदुक्तं कुलार्णवे।

त्रिवारं तर्पयेद्वापि सकृद्वापि यथेच्छया।

कालीतन्त्रे। सर्वासामपि दातव्या वलिपूजा तथैव च॥

अनुलेपनकं गन्धं धूपदीपौ च पालकम्।

त्रिस्त्रिः पूजा प्रकर्त्तव्या सर्वासामपि साधकैः॥

अतएव सर्वासां वलीनां शक्तीनां पूजने त्रिवारमवश्यमिति दर्शयेत्। ततो देव्या अस्त्रं पूजयेद् यथा। देवीवामोर्द्ध्वहस्ते खं खड्गम् अधो मुं मुण्डं दक्षोर्द्ध्वे अं अभयम् अधोवं वरं पूजयेत्तर्पयेच्च। ततः षड्ङ्गं विन्यस्य पूर्ववद्देवीं ध्यात्वा गन्धपुष्पाक्षतकुसुमधूपदीपं दत्त्वा पूर्ववद्धवण्टां वादयन् धूपं दीपं दर्शयेत्। ततः पानीयादिद्रव्यं दत्त्वा पूर्ववन्नैवेद्यादिकं निवेद्य त्रिस्तर्पयेत्। योन्यादिमुद्रां दर्शयेत्। ततः पुष्पाञ्जलित्रयेण पञ्चभिर्मां देवीं सायुधपरिवारमहाकालसहितश्रीपादुकां पूजयामि नम इति संपूज्य त्रिस्तर्पयेदिति। कालीतन्त्रेऽपि।

एवं पूजां पुरा कृत्वा मूलेनैव यथाविधि।

नैवेद्यादीन् यथाशक्त्या दद्याद्देव्यै पुनः पुनः॥

ततो वै दशवारन्तु दीपं दत्त्वा च साधकः।

पुष्पादिकं पुनर्दद्यान्मूलेनैव यथाविधि॥

कुमारीकल्पेऽपि।

ततो नीराजनं कुर्य्यात् दशवारं प्रदीपकैः।

अस्यार्थः आरात्रिकविधिना दीपान् प्रज्वाल्य देवतामस्तकान्तं नीत्वा परिभ्राम्य नीराजनं कुर्य्यादित्यं दशधा। आरात्रिकविधानन्तु श्रीतत्त्वचिन्तामणावनुसन्धेयम्। अथ पञ्चभाद्यैर्देवीं परितोषयेत्। तदुक्तम्।

पूजयेच्च महादेवीं सुरामांसभक्षणादिभिः।

अन्नैर्नानाविधैश्चापि तोषयेत् साधकोत्तमः॥

अथ मुण्डमालातन्त्रे। सुरादानप्रशंसा।

सुरादानेन देवेशि! महायोगीश्वरो भवेत्।

सुरा तु त्रिविधा देवि! स्फाटिकी डाकिनी तथा॥

काञ्चिकी स्फाटिकीदाने धनहृद्भिरनुत्तमा।

डाकिनीदानमात्रेण वैश्यः सर्वो भवेत् ध्रुवम्॥

काञ्चिकीसुरया देवि! योऽर्चयेत् परमेश्वरीम्।

गुटिकाञ्जनसञ्चारिमारणोच्चाटनादिभिः॥

महासिद्धीश्वरो भूत्वा वशेत् कल्पायुतं दिवि।

अर्घ्यं दत्ते महेशानि! महासिद्धिरनुत्तमा॥

अथोत्तरे त्रिकोणमालिख्य मांसतिलरक्तपुष्पभक्तानि कीलित्य तत्र संस्थाप्य ओं क्रीं श्रीं दक्षिणायै कालिकायै स्वाहा एष वलिर्नम इति उत्सृज्य नैर्ऋत्यां धारयेत्। तदुक्तम्।

पूजान्ते भोजनादौ वा वलिं दद्याच्च साधकः। इति।

वलिमुत्थाप्य नैवेद्यं नैर्ऋत्यां दिशि धारयेत्॥

ततः प्राणायामादिकं कृत्वा कामकलां विभाव्य शिरसि गुरुं ध्यात्वा हृदि देवीं भावयन् मनसा अष्टोत्तरसहस्रं रहस्य-

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मालया वर्णमालया करमालया वा प्रजप्य पुनः प्राणायामं विधाय अर्घ्यजलं पुष्पादिकं गृहीत्वा ।

गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् ।
सिद्धिर्भवतु मे देवि ! त्वत्प्रसादात् सुरेश्वरि ! ॥

इत्यनेन तेजोमयं जपफलं देव्या दक्षहस्ते समर्पयेत् ।

तदुक्तं कालीतन्त्रे ।

ततः सावहितो मन्त्री गुरुं नत्वा शिरःस्थितम् ।
देवीं ध्यात्वा चाष्टोत्तरसहस्रं प्रजपेन्मनुम् ॥
तेजोमयं जपफलं देव्या हस्ते समर्पयेत् ।
गुह्यातिगुह्यगोप्त्री त्वमिति मन्त्रेण मन्त्रवित् ॥

अथ रहस्यमाला यथा । तदुक्तं कालीतन्त्रे ।

दन्ताक्षमालया देवि ! राजदन्तेन मेरुणा ।

प्रजपेदित्यर्थः । तस्य द्वादशपटलेऽपि ।

दन्तेन कालिकायास्तु पूर्वोक्ता भुवि दुर्लभा ।

इति । मुण्डमालायाञ्च ।

नाड़ीभिर्ग्रथिता माला महासिद्धिप्रदा भवेत् ।

तत्रैव सर्वशक्तौ ।

नवाङ्गुल्यास्थिमाला च ग्रथिता पर्वभेदतः ।
सर्वसिद्धिप्रदा मोक्षदायिनी वरवर्णिनि ! ॥
नाड़ीसंग्रथनं कार्य्यं रक्तेन वाससा तथा ।
सदा गोप्या प्रयत्नेन मातुश्च जारवत् प्रिये ! ॥

अथ वर्णमाला यथा । विशुद्धेश्वरमहातन्त्रे ।

मालाविधानं परमं शृणु पार्वति ! तत्त्वतः ।
येनानुष्ठितमात्रेण मन्त्राः सिध्यन्ति तत्क्षणात् ॥
अनुलोमविलोमेन मन्त्रं जप्त्वा विधानतः ।
मन्त्रेणान्तरितं वर्णं वर्णेनान्तरितं मनुम् ॥

कुर्य्याद्वर्णमयीं मालां सर्वमन्त्रप्रदीपनीम् ।
चरमार्णं मेरुरूपं लङ्घयेन्न कदाचन ॥
रहस्यमेतत् परमं मयोक्तं ते यशस्विनि ! ।
त्वया गुप्ततरं कार्य्यं नाख्येयं यस्य कस्यचित् ॥

मतान्तरमुक्तं यामले यथा ।

सविन्दुवर्णमुच्चार्य्य पश्चात् मन्त्रं जपेत् सुधीः ।
क्षमेरुकं जल्पयित्वा जपेत्तन्नातिलङ्घयेत् ॥
अनुलोमविलोमस्थक्लृप्तया वर्णमालया ।
जपेन्मेरुं समाश्रित्य लङ्घनं तस्य नाचरेत् ॥
अष्टोत्तरजपादादौ वर्गाष्टकं प्रयोजयेत् ।

अकचटतपयश इत्ययं चाष्टवर्गः । मुण्डमालायाञ्च ।

मेरुहीना या माला मेरुलङ्घा च या भवेत् ।
अशुद्धातिप्रकाशाञ्च सा माला निष्फला भवेत् ॥

अथ करमाला यथा । तदुक्तम् । बृहत्स्वौक्रमे ।

तर्जन्यग्रे तथा मध्ये यो जपेत् स तु पापकृत् ।
अनायासास्त्वयं पर्व तर्जनीमूलपर्वणि ॥

जपेदित्यर्थः । मुण्डमालायाञ्च ।

अत्राङ्गुलिजपं कुर्य्यात् साङ्गुष्ठाङ्गुलिभिर्जपेत् ।
अङ्गुष्ठेन विना कर्म कृतं तदफलं भवेत् ॥
आरभ्यानामिकामध्यात् प्रादक्षिण्यक्रमेण तु ।
तर्जनीमूलपर्य्यन्तं करमाला विधीयते ॥
मेरुं प्रदक्षिणीकुर्वन् अनामामूलपर्वतः ।
मेरुलङ्घनदोषात्तु अन्यथा जायते फलम् ॥
मध्यमाक्षितया ग्राह्या अनामामूलमेव च ।
अनामामध्यपर्वात्र मेरुं कृत्वा न लङ्घयेत् ॥
तर्जन्यग्रे तथा मध्ये यो जपेत्तु भ्रमान्नरः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

चत्वारि तस्य नश्यन्ति आयुर्विद्यायशो बलम् ॥

हंसपारमेश्वरेऽपि ।

पर्वद्वयमनामायाः परिवर्त्तन वै क्रमात् ।

पर्वत्रयं मध्यमायास्तर्जन्येकं समाहरेत् ॥

शक्तिमाला समाख्याता सर्वतन्त्रप्रदीपिका ।

नित्यं जपं करे कुर्य्यात् न तु काम्यं कदाचन ॥

मुण्डमालातन्त्रे च ।

जपं नित्यं करे कुर्य्यात् न तु काम्यप्रबोधनात् ।

अयं क्रमो निशायां करणीयः ।

वलिपूजादिकं सर्वं निशायां क्रियते यदि ।

तत्तदक्षयतां याति कालीविद्याप्रसादतः ॥

कुलचूड़ामणौ च ।

रात्रौ पर्य्यटनं कुर्य्याद् रात्रौ शक्तिप्रपूजनम् ।

न करोति कथं देवीसाधकः कौलिकी भवेत् ॥

तदुक्तं कालिकापुराणे ।

छागन्तु वामतो दद्याम्महिषं वितरेत् पुनः ।

दक्षिणे वामतो दद्याद् अग्रतो देहणोर्णितम् ॥

नाभेरधस्ताद्रुधिरं पृष्ठभागस्य वा प्रिये ! ।

स्वगात्ररुधिरं दद्यान्न कदाचित्तु साधकः ॥

नोष्ठस्य चिबुकस्यापि नेन्द्रियाणां तथैव च ।

कण्ठाधो नाभितश्चोर्द्ध्वं हृद्भागस्य प्रयत्नतः ॥

पार्श्वयोश्चापि रुधिरं दुर्गायै विनिवेदयेत् ।

न च रोगादिकादङ्गान्नान्यघाताच्च भैरव ! ॥

सौवर्णे राजते पात्रे कांस्याधारे च मानवः ।

निधाय देव्यै दद्यात्तु तदुक्तं मन्त्रपूर्वकम् ॥

यद्यद् हृदयसंजातं मासं रक्तापिधानतः ।

तिलमुद्गप्रमाणं वा देव्यै दद्यात्तु भक्तितः ॥

षण्मासाभ्यन्तरे भक्तः काममिष्टमवाप्नुयात् ।

कुमारीकल्पेऽपि ।

नराश्छागा स्तथा मेषा महिषाः शशकास्तथा ।

एतेषाञ्चैव रक्तानि देयानि परमेश्वरि ! ॥

मुण्डमालायाञ्च ।

ईषद्रक्तं घृतेनाक्तं निशायां दिवसेऽपि वा ।

वलिं दद्याद्विशेषेण कृष्णपक्षे शुभे दिने ॥

छागे दत्ते भवेद्वाग्मी मत्स्ये दत्ते कवि र्ध्रुवम् ।

महिषे धनवृद्धिः स्याम्मृगे भोगफलं लभेत् ॥

खगे दत्ते समृद्धिः स्याद् गोधिकायां महाफलम् ॥

नरे दत्ते समृद्धिः स्यादिष्टसिद्धिरनुत्तमा ।

ललाटहस्तहृदयशिरोभ्रुमध्यदेशतः ॥

स्वदेहरुधिरे दत्ते रुद्रदेह इवापरः ।

चाण्डालवलिदानेन महासिद्धिः प्रजायते ॥

ईषद्रक्तमिति मत्स्यमांसविशेषणं तत्प्रकरणस्थलिखितवचनात् । नरवलिस्तु न विप्रेण विधेयः । तदुक्तं यामले ।

राजा नरवलिं दद्यान्न्योऽपि परमेश्वरि ! ।

तत्रापि न तु विप्रेण । ततो वक्ष्यमाणमन्त्रेण देवीं स्तुत्वा प्रदक्षिणत्रयं विधायाष्टप्रणामं कुर्य्यात् तदुक्तं कालीतन्त्रे ।

ततो वै शिरसि पुष्पं दत्त्वाष्टाङ्गं प्रणम्य च ।

अथ प्रदक्षिणं यथा ।

प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः ।

दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः ॥

त्रिधा च वेष्टयेत् सम्यक् कालिकायाः प्रदक्षिणम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सर्वान् कामानवाप्नोति पश्चान्मोक्षमवाप्नुयात् ॥

अष्टाङ्गप्रणामो यथा ।

दोर्भ्यां पद्भ्याञ्च पाणिभ्यामुरसा शिरसा दृशा ।
मनसा वचसा चेति प्रणामोऽष्टाङ्ग ईरितः ॥

अशक्तौ प्रणामः यथा ।

बाहुभ्याञ्च सजानुभ्यां शिरसा वचसा धिया ।
पञ्चाङ्गकः प्रणामः स्यादुदितः परिकीर्त्तितः ॥

ततः सामयिकैः सह पानादिकं कुर्य्यात् । यथा चक्राकारेण पंक्त्याकारेण वा भिन्नासने साधकैः सह शक्तिभिश्च युग्मायुग्मक्रमेण पद्मासनेनोपविश्य सामयिकललाटे चन्दनाक्षतं दत्त्वा शिवशक्तिबुद्ध्या पुष्पं दद्यात् । ततो यदि गुरुस्तिष्ठति तत्रादौ गन्धचन्दनपुष्पादिना तं प्रपूज्य तत् पात्रं तस्मै दत्त्वा प्रणमेत् । गुरोरभावे तत् पात्रं जले क्षिपेत् । ततः पात्रं शुद्धिसहितं शक्त्यै दत्त्वा सामयिकेभ्योऽपि ज्येष्ठानुक्रमेण वीरपात्रात् परामृतं शुद्धिसहितं दद्यात् । ततः सामयिकोऽपि भक्त्या हस्ताभ्यां गृहीत्वा मूलमन्त्रं तदुपरि अष्टधा जप्त्वा पूर्ववत् आनन्दभैरवानन्दभैरव्यौ सन्तर्प्य गुरुं देवताञ्च तर्पयेत् । ततस्तु शुद्धिं कुर्य्यात् । ततश्चक्रनायकस्तैः सह पात्रवन्दनञ्चरेत् ।

श्रीमद्भैरवशेखरप्रविलसच्चन्द्रामृतप्लावितं
चेत्राधीश्वरयोगिनीजनगणैः सिद्धैः समाराधितम् ।
आनन्दार्णवकं महात्मकमिदं यन्नत्रिखण्डामृतं
वन्दे श्रीप्रथमं कराम्बुजगतं पात्रं विशुद्धिप्रदम् ॥

इति अभिवन्द्य वामहस्तेन पात्रमुत्तोल्य वन्दनं कृत्वा गृह्णामीति गुरुशक्तिसाधकाज्ञां गृह्णीयात् । ते च जुषस्व इति ब्रूयुः । ततो मूलाधारात् कुण्डलिनीमिष्टदेवतास्वरूपां विभाव्य गुरुपादुकां स्मृत्वा शिवोऽहमिति विचिन्त्य हस्ताभ्यां पात्रं

गृहीत्वा मूलमन्त्रमुच्चरन् कुण्डलिनीमुखे देवतां तर्पयेत् । तदुक्तम् उदयाकरपद्धत्याम् ।

कृत्वा मन्त्रतनुं स्मरेद् गुरुपदं देवीकलां चिन्मयीं
पश्चात् पात्रवरं परामृतयुतं दीपैर्युतं प्रोज्जलैः ।
पुष्पादिष्वभिमन्त्रितं च नियतं सम्मोहकञ्चासवं
ये संचिन्त्य पिबन्ति यान्ति खलु ते भुक्तिञ्च मुक्तिं पराम् ॥

तन्त्रान्तरे च ।

सिन्दूरतिलकं भाले पाणौ च मदिरारसम् ।
कृत्वा परगुरुं ध्यायेत् तथा देवीञ्च चिन्मयीम् ॥ इति ।

ततः पात्रमाधारोपरि संस्थाप्य पूर्ववत् पात्रं गृहीत्वा पात्रवन्दनं कुर्य्यात् ।

हैमं मीनरसावहं दयितया दत्तञ्च पेयादिभिः
किञ्चिच्चञ्चलरक्तपङ्कजदृशा तस्यै समावेदितम् ।
वामे स्वादुविशुद्धिशुद्धिकरणं पाणौ विधायात्मके
वन्दे पात्रमहं द्वितीयमधुनानन्दैकसंवर्द्धनम् ॥

इत्यादिना पुनस्तेन च क्रमेण परामृतं गृहीत्वा पात्रवन्दनं यथा ।

सर्वाम्नायकलाकलापकलितं कौतूहलद्योतनं
चन्द्रोपेन्द्रमहेन्द्रशम्भुवरुणब्रह्मादिभिः सेवितम् ।
ध्यातं देवगणैः परं मुनिगणैर्मोक्षार्थिभिः सर्वदा
वन्दे पात्रमहं तृतीयमधुना स्वात्मावबोधक्षमम् ॥

इति तृतीयपात्रम् ।

मद्यं मीनरसावहं हरिहरब्रह्मादिभिः पूजितं
मुद्रामैथुनधर्मकर्मनिरतं चाराम्बतिक्ताश्रयम् ।
आचार्य्याष्टकसिन्धुभैरवकलामांसेन संशोधितं

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पायात् पञ्चमकारतत्त्वसहितं पात्रं चतुर्थं नमः ॥

इति चतुर्थपात्रम् ।

आधारे भुजगाधिराजवलये पात्रं महीमण्डलं
मद्यं सप्तसमुद्रवारिपिषितं चाष्टौ च दिग्दन्तिनः ।
सोऽहं भैरवमर्चयन् प्रतिदिनं तारागणैरन्वितैः
आदित्यप्रमुखैः सुरासुरगणै राज्ञाकरैः किन्नरैः ॥

इति पञ्चमपात्रम् ।

ततो यावन्न चलते दृष्टिर्यावन्न चलते मनः ।
तावत् पानं प्रकुर्वीत पशुपानमतःपरम् ॥

अथ अस्य प्रमाणं यथा । तदुक्तं रुद्रयामले ।

साधकेभ्यश्च शाक्तेभ्यो दद्यान्निर्माल्यचन्दनम् ।
सामयिकः समं कुर्य्यात् देवि ! पानादिभक्षणम् ॥

अन्यत्रापि । निवसेच्चक्ररूपेण पङ्क्त्याकारेण वा यथा ।

शक्तियुक्तो वसेद्वापि युग्मायुग्मविधानतः ॥
शिवशक्तिधिया सर्वं चक्रमध्ये समर्चयेत् ॥

तन्त्रान्तरे च । ततः पुष्पं समादाय गुरोः पात्रे निवेदयेत् ।

गुरवे च निवेद्याथ भूत्यै दत्त्वा स्वयं हरेत् ॥

भावचूड़ामणौ च ।

साक्षाद्यदि गुरुर्न स्यात्तदा तोये विसर्जयेत् ।

अत्र पात्रपरिमाणं यथा । तदुक्तं कुलसारे ।

नयनाग्निवाणसंख्यकर्षैस्तु परमेश्वरि ! ।
हेतुपात्रं प्रकर्त्तव्यमित्युक्तं कुलशासने ॥
इतोऽप्यधिकपात्रन्तु न कर्त्तव्यं हि साधकैः ॥

कर्षं लौकिकमित्यर्थः । तदुक्तं कुलोड्डीशे ।

गुञ्जा द्वादशमासः स्यात् तदष्टौ कर्षमुच्यते ॥

अथ उत्तरतन्त्रे ।

अनुज्ञां पुरतो लब्ध्वा गृह्णामीति स्वयं वदेत् ।
जुषस्वेत्यभ्यनुज्ञातो गुरुणा वा कुलौनकैः ॥
गृह्णीयाच्च स्वयं सिद्धो वज्रपद्मासनः सुधीः ॥

कुलार्णवे च । एकासननिविष्टा ये भुञ्जीरन्नैकभाजने ।

नैकपात्रे पिबेयुश्च ते यान्ति नरकाधमे ॥

एकपात्र इति सर्वैर्मिलित्वा एकपात्रेण पिबेत् न तु वारं वारं द्रव्यपाने भिन्नं भिन्नं पात्रं कुर्य्यात् । अनुष्ठानापत्तेः । न कुर्य्यात् पात्रशङ्करमिति वचनविरोधात् । सम्प्रदाय-विरोधाच्च ।

विना मद्येन या पूजा विना मांसेन तर्पणम् ।
विना शक्त्या च यत् पानं तत् सर्वं निष्फलं भवेत् ॥
स्वशक्तिं वीरशक्तिं वा दीक्षितां गुरुपूजनीम् ।
पाययित्वा पिबेद्द्रव्यमिति शाक्तस्य निर्णयः ॥
न पङ्क्त्यां च स्पृशेत् पात्रं न विन्दुं पातयेदधः ।
नैकहस्तेन दातव्यं न मुद्रावर्जितं पुनः ॥
नार्चयेदेकहस्तेन न पिबेदेकपाणिना ।
अन्योन्यवन्दनं कृत्वा पिबेत्तदमृतं पुनः ॥
सव्येनोद्धृत्य पात्रन्तु मुद्रां कृत्वापसव्यतः ।
विना सङ्केन योगेन न कुर्य्याद्द्रव्यसङ्गतिम् ॥
साधारं नोद्धरेत् पात्रमाधारे च विनिक्षिपेत् ।
पात्रं न चालयेत् स्थानात् न कुर्य्यात् पात्रशङ्करम् ॥
सशब्दं न पिबेद्द्रव्यं तथैव तं न पूरयेत् ।
न स्थूलं नैव सूक्ष्मञ्च पात्रं कुर्य्यात् मनोरमम् ॥
उच्छिष्टं न स्पृशेच्चक्रे कुलद्रव्याणि सुन्दरि ! ।
वारिः प्रक्षाल्य च करौ कुलद्रव्याणि दापयेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

निष्ठीवनमधोवायुं चक्रमध्ये विवर्जयेत् ।
चक्रमध्ये घटे भग्ने पात्रे च पतिते भुवि ॥
दीपनाशे च शान्त्यर्थं श्रीचक्रं कारयेत् सुधीः ।
स्वपात्रस्थितहेतुञ्च न दद्याद्भैरवाय च ॥
दत्ते च सिद्धिहानिः स्यात् क्रुद्धा भवति योगिनी ।
परीहासं प्रलापञ्च वितण्डां बहुभाषणम् ॥
औदासीन्यं भयं क्रोधं चक्रमध्ये विवर्जयेत् ।
नान्योन्यं ताड़येत् पात्रं न पात्रमानयेदधः ॥
गुरुशक्तिसुतानाञ्च गुरुज्येष्ठकनिष्ठयोः ।
उच्छिष्टं भक्षयेत् स्त्रीणां नान्योन्योच्छिष्टमर्पयेत् ॥
चक्रमध्ये च नियमं नान्यथा पतनं भवेत् ।
कनिष्ठानां स्वशिष्याणां दद्याच्चोच्छिष्टमेव हि ॥
दद्यात् स्नेहेन योऽन्येभ्योः स भवेदापदां पदम् ।
अन्यत्रापि । शक्त्युच्छिष्टं पिबेद्द्रव्यं वीरोच्छिष्टञ्च चर्वणम् ॥
पीत्वा पीत्वा पुनः पीत्वा पुनः पतति भूतले ॥
उत्थाय च पुनः पीत्वा पुनर्जन्म न विद्यते ।
ततः शान्तिस्तोत्रं पठेत् । तदुक्तं डामरे ।
पीत्वा पेयं जनैः सार्द्धं शान्तिस्तोत्रं ततः पठेत् ।
नश्यन्तु प्रेतकुष्माण्डाः नश्यन्तु दूषका नराः ॥
साधकानां शिवाः सन्तु आम्नायपरिपालिनाम् ।
जयन्ति मातरः सर्वाः जयन्ति योगिनीगणाः ॥
जयन्ति सिद्धिडाकिन्यो जयन्ति गुरुपङ्क्तयः ।
जयन्ति साधकाः सर्वे विशुद्धाः कौलिकाश्च ये ॥
समयाचारसम्पन्ना जयन्ति पूजका नराः ।
नन्दन्ति चाणिमासिद्धा नन्दन्ति कुलपालकाः ॥
इत्याद्या देवताः सन्तु तृप्यन्तु वास्तुदेवताः ।

चन्द्रसूर्य्यादयो देवास्तृप्यन्तु मम भक्तितः ॥
नक्षत्राणि ग्रहा योगाः करणा राशयश्च ये ।
सर्वे ते सुखिनो यान्तु सर्वा नद्यश्च पक्षिणः ॥
पशव स्तुरगाश्चैव पर्वताः कन्दरायुताः ।
ऋषयो ब्राह्मणाः सर्वे शान्तिं कुर्वन्तु सर्वदा ॥
शुभा मे विदिताः सन्तु मित्रास्तिष्ठन्तु पूजकाः ।
ये ये पापधियः स्वभूषणरताः स्वनिन्दकाः पूजने
दैवाचारविमत्तनष्टहृदया भ्रष्टाश्च ये साधकाः ।
दृष्ट्वा च क्रमपूर्वमन्दहृदया ये कौलिका दूषका
स्ते ते यान्तु विनाशमत्र समये श्रीभैरवस्याज्ञया ॥
ये द्वेष्टारः साधकानां सदैवाम्नायदूषकाः ।
डाकिनीनां मुखे यान्तु तृप्तास्तत्पिशितैस्तु ताः ॥
पशवो नाशमायान्तु मम निन्दाकराश्च ये ।
द्वेष्टारः साधकानाञ्च ते नश्यन्तु शिवाज्ञया ॥

ततो यथाविधिना शिवशक्तिसमायोगं कृत्वा देवीपादेषु आत्मानं समर्प्य श्रीपात्रमुत्तोल्य देव्या उपरि त्रिधा भ्रामयित्वा मूलमुच्चरन् श्रीदक्षिणकालिके पराङ्मुखार्घ्यं स्वाहा इति अर्घ्यं दत्त्वा तदुपरि पुनः संस्थाप्य संहारमुद्रया देवीं स्वहृदि समानीय श्रीदक्षिणकालिके पूजितासि क्षमस्वेति विसृज्य ऐशान्यां मण्डलिकां कृत्वा निर्माल्येन निर्माल्यवासिन्यै नमः इति मण्डले त्रिः संपूजयेत् । तदुक्तं कुमारीकल्पे ।

देवताग्रे तु संभोगे देवताप्रीणनं भवेत् ।
संभोगन्तु परं कृत्वा देवीं हृदि समानयेत् ॥
कृतकृत्यो भवेन्मन्त्री नात्र कार्य्या विचारणा ॥

अथ आत्मसमर्पणमन्त्रो यथा । इतः पूर्वं प्राणबुद्धिदेह-धर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थया स्वकायेन मनसा वाचा

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कर्मणा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत् स्मृतं यदुक्तं यत् कृतं तत्सर्वं ब्रह्मार्पणं भवतु स्वाहा। मदीयञ्च सकलं श्रीदक्षिण-कालिकाचरणे समर्पितमस्तु। श्रीं तत् सत्।

अथ कालीतन्त्रे च।

विसृज्य परया भक्त्या सन्निधापनमुद्रया।
उद्वास्य हृदये देवीं तन्मयो भवति ध्रुवम्॥
पुरश्चरणकालेऽपि पूजा चैषा प्रकीर्त्तिता।

भैरवतन्त्रेऽपि।

स्वहृदये च वह्निर्देवीं समर्प्य विधिवत् पुनः।
निर्माल्यं वै शुचौ देशे नैवेद्यं भक्षयेत्ततः॥

ततः श्रीपात्रामृतं स्वपात्रे कृत्वा स्वीकृत्य भूमौ पात्रं न्युब्जीकृत्य तदुपरि पुष्पं निक्षिप्य पात्रप्रक्षालनं कृत्वा गोपयेत्। तदुक्तम् तन्त्रान्तरे।

अर्घ्यादिवन्दनमाचर्य्य अर्घ्यामृतं पिबेत्ततः।
न्युब्जीकृत्य स्वयं पात्रं तत्र पुष्पं विनिक्षिपेत्।
प्रक्षाल्य गोपयेत् पात्रं तत्त्वचिन्तापरो बुधः॥

ततस्तदमृतस्निग्धभूमौ मायाबीजं विलिख्य कनिष्ठाङ्गुलिना तिलकं कुर्य्यादनेन।

यं यं स्पृशति पादेन यं यं पश्यति चक्षुषा।
स एव दासतां याति यदि शक्रसमो भवेत्॥

ततो यन्त्रलेपं मूर्ध्नि कृत्वा नैवेद्यं सर्वदेवाय साधकाय च दत्त्वा शेषं स्वीकृत्य सोऽहमिति भावयेत्। वाह्यतो वैष्णवाचारपरायणो निःशङ्को यथासुखं विहरेत्। तदुक्तं कुलचूड़ामणौ।

ब्रह्मरन्ध्रे गुप्तस्थाने यत्र लेपन्तु धारयेत्।
नास्तिकेभ्यो न पशुभ्यो न मूर्खेभ्यो न वा द्विजे॥

कुलीनाय च दातव्यं अथवा जलमध्यतः।
ततः सोऽहमिति ध्यात्वा वैष्णवाचारतत्परः॥
हरिनाम्ना जातभावो भावाखिलविचेष्टितः।
चौरवद्विचरेदेकः सदा सङ्गविवर्जितः॥

यामलेऽपि। नैवेद्यं त्रिपुरादेव्या वाञ्छन्ति विबुधाः सदा।

तस्माद्देयं सुरश्रेष्ठ! ब्राह्मणे वैष्णवेऽपि च॥
मह्यं शुक्राय सूर्य्याय गणेशाय यमाय च।
वह्नये वरुणायापि वायवे धनदाय च॥
ईशानाय महेशानि! साधकाय प्रदापयेत्॥

अत्र त्रिपुरापदमुपलक्षणमिति।

अथ देवीविसर्जनानन्तरं पानादिकं कुर्य्यात्। तदुक्तं कुलार्णवे।

दिव्यं देव्यग्रतः पानं वीरमेकान्तवासिनम्।

अन्यत्रापि। पानन्तु त्रिविधं प्रोक्तं दिव्यवीरपशुक्रमैः॥

दिव्यं देव्यग्रतो ध्यायेद् वीरं वीरासनस्थितम्।
तृतीयन्तु पशोः पानं पापकृत् शोकमोहकृत्॥

उदयाकरपद्धत्याम्।

असंस्कृतं वृथा पानं संस्कृतं भैरवः स्वयम्।
चक्रपूजाविधौ प्रोक्तं सर्वसिद्धिकरं शुभम्॥
असंस्कृतं पशोः पानं कलहोद्वेगकारकम्।
संस्कृतं सिद्धिजनकं प्रायश्चित्तादिदूषणम्॥
मन्त्राणां स्फुरणं तेन महापातकनाशनम्।
आयुःश्रीकान्तिसौभाग्यं भवेत् संस्कृतपानतः।
नष्टैश्वर्य्यं खेचरत्वं पतनं विधिवर्जनात्॥

इति श्यामारहस्ये सपर्य्यापर्य्यायस्तृतीयः परिच्छेदः।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ चतुर्थः परिच्छेदः ।

अथ स्तुतिः । यामले ।

कर्पूरं मध्यमान्त्यस्वरपरिरहितं सेन्दुवामाक्षियुक्तं
बीजं ते मातरेतत्त्रिपुरहरवधु ! त्रिः कृतं ये जपन्ति ।
तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् ॥१॥
ईशानं सेन्दुवामश्रवणपरिगतं बीजमन्यत् महेशि !
द्वन्द्वं ते मन्दचेता यदि जपति जनो वारमेकं कदाचित् ।
जित्वा वाचामधीशं धनदमपि चिरं मोहयन्नम्बुजाक्षी-
द्वन्द्वं चन्द्रार्द्धचूड़े ! प्रभवति हि महाघोरवालावतंसे ! ॥२॥
ईशो वैश्वानरस्थः शशधरविलसद्वामनेत्रेण युक्तं
बीजं ते द्वन्द्वमन्यद्विगलितचिकुरे ! कालिके ! ये जपन्ति ।
द्वेष्टारं घ्नन्ति ते च त्रिभुवनमपि ते वश्यभावं नयन्ति
सृक्कद्वन्द्वासृधाराप्रकटितवदने दक्षिणे ! कालिके ! ऽति ॥३॥
ऊर्द्ध्वं वामे कृपाणं करकमलतले छिन्नमुण्डं तथाधः
सव्ये चाभीर्वरञ्च त्रिजगदघहरे ! दक्षिणे कालिके च ।
जप्त्वैतन्नामवर्णं तव मनुविभवं भावयन्त्येतत् अम्ब !
तेषामष्टौ करस्थाः प्रकटितवदने सिद्धयस्त्र्यम्बकस्य ॥ ४ ।
वर्गाद्यं वह्नियुक्तं विधुरतिकलितं तत्त्रयं कूर्चयुग्मं
लज्जायुग्मञ्च पश्चात् स्मितमुखि ! तथषष्ठद्वयं योजयित्वा ।
मातर्ये ये जपन्ति स्मरहरमहिले ! भावयन्तः स्वरूपं
ते लक्ष्मीलास्यलीलाकमलदलदृशः कामरूपा भवन्ति ॥५॥
प्रत्येकं वा त्रयं वा द्वयमपि च परं बीजमत्यन्तगुह्यं
त्वन्नाम्ना योजयित्वा सकलमपि सदा भावयन्तो जपन्ति

तेषां नेत्रारविन्दे विहरति कमला वक्त्रशुभ्रांशुबिम्बे
वाग्देवी छिन्नमुण्डस्रगतिशयलसत्कण्ठि पीनस्तनाढ्ये ॥६॥
गतासूनां बाहुप्रकरकृतकाञ्चीपरिलस-
न्नितम्बां दिग्वस्त्रां त्रिभुवनविधात्रीं त्रिनयनाम् ।
श्मशानस्थे तल्पे शवहृदि महाकालसुरत-
प्रसक्तां त्वां ध्यायन् जननि ! जड़चेता अपि कविः ॥ ७ ॥
शिवाभिर्घोराभिः शवनिवहमुण्डास्थिनिकरैः
परं संकीर्णायां प्रकटितचितायां हरवधूम् ।
प्रविष्टां सन्तुष्टामुपरि सुरते नातियुवतीं
सदा त्वां ध्यायन्ति क्वचिदपि न तेषां परिभवः ॥ ८ ॥
वदामस्ते किंवा जननि ! वयमुच्चैर्जड़धियो
न धाता नापीशो हरिरपि न ते वेत्ति परमम् ।
तथापि त्वद्भक्तिर्मुखरयति चास्माकमपि ते
तदेतत् क्षन्तव्यं न खलु पशुबोधः समुचितः ॥ ९ ॥
समन्तादापीनस्तनजघनधृग्यौवनवती-
रताशक्तो नक्तं यदि जपति भक्तस्तव मनुम् ।
विवासास्त्वां ध्यायन् गलितचिकुरस्तस्य वशगाः
समस्ताः सिद्धौघाः भुवि चिरतरं जीवति कविः ॥ १० ॥
समाः सुस्थीभूतां जपति विपरीतां यदि सदा
विचिन्त्य त्वां ध्यायन्नतिशयमहाकालसुरताम् ।
तदा तस्य क्षौणीतलविहरमाणस्य विदुषः
कराम्भोजे वश्याः स्मरहरवधु ! महासिद्धिनिवहाः ॥ ११ ॥
प्रसूते संसारं जननि ! जगतीं पालयति च
समस्तं चित्यादि प्रलयसमये संहरति च ।
अतस्त्वं धातापि त्रिभुवनपतिः श्रीपतिरपि
महेशोऽपि प्रायः सकलमपि किं स्तौमि भवतीम् ॥ १२ ॥

CC-0. Prof. Satya Vrat Shastri Collection. Digtized by Muthulakshmi Research Academy

अनेके सेवन्ते भवदधिकगीर्वाणनिवहान्
विमूढास्ते मातः ! किमपि न हि जानन्ति परमम् ।
समाराध्यामाद्यां हरिहरविरिञ्चादिविबुधैः
प्रपन्नोऽस्मि स्वैरं रतिरसमहानन्दनिरताम् ॥ १३ ॥
धरित्रीकौलालं शुचिरपि समीरोऽपि गगनं
त्वमेका कल्याणी गिरिशरमणी कालि ! सकला ।
स्तुतिः का ते मातस्तव करुणया मामगतिकं
प्रसन्ना त्वं भूयाः भवमनु न भूयान्मम जनुः ॥ १४ ॥
श्मशानस्थः सुस्थो गलितचिकुरो दिक्पटधरः
सहस्रं त्वर्काणां निजगलितवीर्य्येण कुसुमम् ।
जपंस्तत् प्रत्येकं मनुमपि तव ध्याननिरतो
महाकालि ! स्वैरं स भवति धरित्रीपरिवृढः ॥ १५ ॥
गृहे सम्मार्जन्या परिगलितवीजं हि कुसुमं
सुमध्याङ्के नित्यं विरचयति चितायां कुजदिने ।
समुच्चार्य्य प्रेम्णा मनुमपि सकृत् कालि ! सततं
गजारूढो याति चितिपरिवृढः सत्कविवरः ॥ १६ ॥
स्वपुष्पैराकीर्णं कुसुमधनुषो मन्दिरमहो
पुरो ध्यायन् ध्यायन् यदि जपति मातस्तव मनुम् ।
स गन्धर्वश्रेणीपतिरिव कवित्वामृतनदी-
नदीनः पर्य्यन्ते परमदलीनः प्रभवति ॥ १७ ॥
त्रिपञ्चारे पीठे शवशिवहृदि स्मेरवदनां
महाकालेनोच्चैर्मदनरसलावण्यनिरताम् ।
समासक्तो नक्तं स्वयमपि रतानन्दनिरतो
नरो यो ध्यायेत् त्वां भवजननि ! स स्यात् स्मरहरः ॥ १८ ॥
स लोमास्थि स्वैरं पललमपि मार्जारमपि ते
परं चौष्ट्रं मैषं नरमहिषयोश्छागमपि वा ।

बलिं ते पूजाया मयि विरलवक्त्रे वितरतां
सतां सिद्धिः सर्वा प्रतिपदमपूर्वा प्रभवति ॥ १९ ॥
वशीमन्त्रं लक्षं प्रजपति हविष्याशनरतो
दिवा मातर्युष्मच्चरणयुगलध्याननिरतः ।
परं नक्तं नग्नो निधुवनविनोदेन च मनुं
जपेल्लक्षं स स्यात् स्मरहरसदृक्षः क्षितितले ॥ २० ॥
इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः
स्वरूपाख्यं पादाम्बुजयुगलपूजाविधियुतम् ।
निशार्द्धे वा पूजासमयमधि वा यस्तु पठति
प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः ॥ २१ ॥
कुरङ्गाक्षीवृन्दं तमनुसरति प्रेमतरलं
वशस्तस्य क्षौणीपतिरपि कुबेरप्रतिनिधिः ।
रिपुः कारागारं कलयति च तं केलिकलया
चिरं जीवन्मुक्तः प्रभवति स भक्तः प्रतिजनुः ॥ २२ ॥

इति महाकालविरचितं स्वरूपाख्यं स्तोत्रं सम्पूर्णम् ।

अथोत्तरतन्त्रे कवचं लिख्यते ।

कैलासशिखरारूढं भैरवं चन्द्रशेखरम् ।
वक्षःस्थले समासीना भैरवी परिपृच्छति ॥
भैरव्युवाच । देवेश ! परमेशान ! लोकानुग्रहकारक ! ।
कवचं सूचितं पूर्वं किमर्थं न प्रकाशितम् ॥
यदि मे महती प्रीतिस्तवास्ति कुलभैरव ! ।
कवचं कालिकादेव्याः कथयस्वानुकम्पया ॥

श्रीभैरव उवाच ।

अप्रकाश्यमिदं देवि ! नरलोके विशेषतः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

लक्षवारं वारितासि स्त्रीस्वभावाद्धि पृच्छसि ॥
देव्युवाच । सेवका बहवो नाथ ! कुलधर्मपरायणाः ।
यतस्ते त्यक्तजीवा सा शवोपरि चितोपरि ॥
तेषां प्रयोगसिद्ध्यर्थं स्वरक्षार्थं विशेषतः ।
पृच्छामि बहुशो देव ! कथयस्व दयानिधे ! ॥
भैरव उवाच ।
कथयामि शृणु प्राज्ञे ! कालिकाकवचं परम् ।
गोपनीयं पशोरग्रे स्वयोनिमपरे यथा ॥
सर्वविद्यामहाराज्ञि ! सर्वदेवनमस्कृते ! ॥

कालिकाकवचस्य भैरव ऋषिरुष्णिक्छन्दः अद्वैतरूपिण्यौदक्षिणकालिका देवता क्रीं बीजं हुं शक्तिः क्रीं कीलं सर्वार्थसाधनपुरःसरमन्त्रसिद्धौ विनियोगः ।

सहस्रारे महापद्मे कर्पूरधवलो गुरुः ॥
वामोरुस्थिततच्छक्तिः सदा सर्वत्र रक्षतु ।
परमेशः पुरः पातु परापरगुरुस्तथा ॥
परमेष्ठी गुरुः पातु दिव्यसिद्धिश्च मानवः ।
महादेवी सदा पातु महादेवः सदावतु ॥
त्रिपुरो भैरवः पातु दिव्यरूपधरः सदा ।
ब्रह्मानन्दः सदा पातु पूर्णदेवः सदावतु ।
चलचित्तः सदा पातु चेलाञ्चलश्च पातु माम् ॥
कुमारः क्रोधनश्चैव वरदः स्मरदीपनः ।
माया मायावती चैव सिद्धौघाः पान्तु सर्वदा ॥
विमलः कुशलश्चैव भीमसेनः सुधाकरः ।
मौनो गोरक्षकश्चैव भोजदेवः प्रजापतिः ॥
कुलदेवो रन्तिदेवो विघ्नेश्वरहुताशनः ।
सन्तोषः समयानन्दः पातु मां मानवाः सदा ॥

सर्वेऽप्यानन्दनाथान्ताः अम्बान्ता मातरः क्रमात् ।
गणनाथः सदा पातु भैरवः पातु मां सदा ॥
वटुको नः सदा पातु दुर्गा मां परिरक्षतु ।
शिरसः पादपर्यन्तं पातु मां घोरदक्षिणा ॥
तथा शिरसि मां काली हृदि मूले च रक्षतु ।
संपूर्णविद्यया देवी सदा सर्वत्र रक्षतु ॥
क्रीं क्रों क्रीं वदने पातु हृदि हुं हुं सदावतु ।
क्रीं क्रीं पातु सदाधारे दक्षिणे कालिके हृदि ।
क्रीं क्रीं क्रीं पातु मे पूर्वे हुं हुं दक्षे सदावतु ॥
क्रीं क्रीं मां पश्चिमे पातु हुं हुं पातु सदोत्तरे ॥
षष्ठे पातु सदा स्वाहा मूला सर्वत्र रक्षतु ।
षडङ्गे युवती पातु षडङ्गेषु सदैव माम् ॥
मन्त्रराजः सदा पातु ऊर्ध्वाधो दिग्विदिक्स्थितः ।
चक्रराजे स्थिताश्चापि देवताः परिपान्तु माम् ॥
उग्रा उग्रप्रभा दीप्ता पातु पूर्वे त्रिकोणके ।
नीला घना बलाका च तथापरत्रिकोणके ॥
मात्रा मुद्रामिता चैव तथा मध्यत्रिकोणके ।
काली कपालिनी कुल्ला कुरुकुल्ला विरोधिनी ॥
वह्निः षट्कोणके पान्तु विप्रचित्ता तथा प्रिये ! ।
सर्वाः श्यामाः खड्गधरा वामहस्ते न तर्जनाः ॥
ब्राह्मी पूर्वदले पातु नारायणी तथाग्निके ।
माहेश्वरी दक्षदले चामुण्डा राक्षसेऽवतु ॥
कौमारी पश्चिमे पातु वायव्ये चापराजिता ।
वाराही चोत्तरे पातु नारसिंही शिवेऽवतु ॥
ऐं क्रों असिताङ्गः पूर्वे भैरवः परिरक्षतु ।
ऐं क्रीं रुरुश्चाग्निकोणे ऐं क्रीं चण्डस्तु दक्षिणे ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

ऐं क्लीं क्रोधो नैर्ऋतेऽव्यात् ऐं क्लीं उन्मत्तकस्तथा ।
पश्चिमे ऐं ह्रीं मां कपालो वायुकोणके ॥
ऐं ह्रीं भीषणाख्यश्च उत्तरेऽवतु भैरवः ।
ऐं ह्रीं संहार ऐशान्यां मातृणामङ्गगाः शिवाः ॥
ऐं हेतुको वटुकः पूर्वदले पातु सदैव माम् ।
ऐं त्रिपुरान्तको वटुक आग्नेय्यां सर्वदाऽवतु ॥
ऐं वह्निवेतालो वटुको दक्षिणे मां सदाऽवतु ।
ऐं अग्निजिह्ववटुकोऽव्यात् नैर्ऋत्यां पश्चिमे तथा ॥
ऐं कालवटुकः पातु ऐं करालवटुकस्तथा ।
वायव्यां ऐं एकः पातु उत्तरे वटुकोऽवतु ॥
ऐं भीमवटुकः पातु ऐशान्यां दिशि मां सदा ।
ऐं ह्रीं ह्रीं हुं फट् स्वाहान्ताश्चतुःषष्टिमातरः ॥
ऊर्ध्वाधो दक्षवामाग्रे पृष्ठदेशे तु पातु माम् ।
ऐं हुं सिंहव्याघ्रमुखी पूर्वे मां परिरक्षतु ॥
ऐं कां कीं सर्पमुखी अग्निकोणे सदाऽवतु ।
ऐं मां मां मृगमेषमुखी दक्षिणे मां सदाऽवतु ॥
ऐं चौं चौं गजराजमुखी नैर्ऋत्यां मां सदाऽवतु ।
ऐं मं मं विड़ालमुखी पश्चिमे पातु मां सदा ॥
ऐं खौं खौं क्रोष्टुमुखी वायुकोणे सदाऽवतु ।
ऐं ह्रां ह्रां ह्रस्वदीर्घमुखी लम्बोदरमहोदरौ ॥
पातु मामुत्तरे कोणे ऐं ह्रीं ह्रीं शिवकोणके ।
ह्रस्वजङ्घतालजङ्घप्रलम्बौष्ठी सदाऽवतु ॥
एताः श्मशानवासिन्यो भीषणा विकृताननाः ।
पातु मां सर्वदा देव्यः साधकाभीष्टपूरिकाः ॥
इन्द्रो मां पूर्वतो रक्षेदाग्नेय्यामग्निदेवता ।
दक्षे यमः सदा पातु नैर्ऋत्यां नैर्ऋतिश्च माम् ॥

वरुणोऽवतु मां पश्चात् वायुर्मां वायवेऽवतु ।
कुबेरश्चोत्तरे पायात् ऐशान्यान्तु सदाशिवः ॥
ऊर्ध्वं ब्रह्मा सदा पातु अधश्चानन्तदेवता ।
पूर्वादिदिक्स्थिताः पान्तु वज्राद्याश्चायुधाश्च माम् ॥
कालिकाऽवतु शिरसि हृदये कालिकाऽवतु ।
आधारे कालिका पातु पादयोः कालिकाऽवतु ॥
दिक्षु मां कालिका पातु विदिक्षु कालिकाऽवतु ।
ऊर्ध्वं मे कालिका पातु अधश्च कालिकाऽवतु ॥
चर्मासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि मेऽवतु ।
इन्द्रियाणि मनश्चैव देहं सिद्धिञ्च मेऽवतु ॥
आकेशात् पादपर्य्यन्तं कालिका मे सदाऽवतु ।
वियति कालिका पातु पथि मां कालिकाऽवतु ॥
शयने कालिका पातु सर्वकार्य्येषु कालिका ।
पुत्रान् मे कालिका पातु धनं मे पातु कालिका ॥
यत्र मे संशयाविष्टास्ता नश्यन्तु शिवाज्ञया ।
इतीदं कवचं देवि ! ब्रह्मलोकेऽपि दुर्लभम् ॥
तव प्रीत्या मया ख्यातं गोपनीयं स्वयोनिवत् ।
तव नाम्नि स्मृते देवि ! सर्वयज्ञफलं लभेत् ॥
सर्वपापः क्षयं याति वाञ्छा सर्वत्र सिध्यति ।
नाम्नः शतगुणं स्तोत्रं ध्यानं तस्मात् शताधिकम् ॥
तस्मात् शताधिको मन्त्रः कवचं तच्छताधिकम् ।
शुचिः समाहितो भूत्वा भक्तिश्रद्धासमन्वितः ॥
संस्थाप्य वामभागे तु शक्तिं स्वामिपरायणाम् ।
रक्तवस्त्रपरीधानां शिवमन्त्रधरां शुभाम् ॥
या शक्तिः सा महादेवी हररूपश्च साधकः ।
अन्योऽन्यचिन्तनाद्देवि ! देवत्वमुपजायते ॥

Public Domain. Digtized by Muthulakshmi Research Academy

शक्तियुक्तो यजेद्देवीं चक्रे वा मनसापि वा ।
भोगैश्च मधुपर्काद्यैस्ताम्बूलैश्च सुवासितैः ॥
ततस्तु कवचं दिव्यं पठेदेकमनाः प्रिये ! ।
तस्य सर्वार्थसिद्धिः स्यान्नात्र कार्य्या विचारणा ॥
इदं रहस्यं परमं परं स्वस्त्ययनं महत् ।
यः सकृत्तु पठेद्देवि ! शृणुयाद्वा समाहितः ॥
स सर्वान् लभते कामान् परे देवीपुरं व्रजेत् ।
सकृद्यस्तु पठेद्देवि ! कवचं देवदुर्लभम् ॥
सर्वयज्ञफलं तस्य भवेदेव न संशयः ।
संग्रामे च जयेत् शत्रून् मातङ्गानिव केशरी ॥
नास्त्राणि तस्य शस्त्राणि शरीरे प्रभवन्ति च ।
तस्य व्याधिः कदाचित् न दुःखं नास्ति कदाचन ॥
गतिस्तस्यैव सर्वत्र वायुतुल्यः सदा भवेत् ।
दीर्घायुः कामभोगीशो गुरुभक्तः सदा भवेत् ॥
अहो कवचमाहात्म्यं पठमानस्य नित्यशः ।
विनापि नययोगेन योगीशसमतां व्रजेत् ॥
भूर्जत्वचि समालिख्य चक्रं तन्त्रविनिर्मितम् ।
मध्यत्रिकोणे संलिख्य साध्यसाधकयोर्लिपिम् ॥
उद्धरेन्मूलमन्त्रञ्च मातृकार्णेन वेष्टयेत् ।
लघुमिश्रेण चन्द्रेण चन्दनाभ्यां सुरेश्वरि ! ॥
एतन्मन्त्रं महेशानि ! सुरासुरसुदुर्लभम् ।
गोरोचनाकुङ्कुमाभ्यां तद्बाह्ये कवचं लिखेत् ॥
श्वेतसूत्रेण संवेष्ट्य लाक्षया परिमण्डयेत् ।
पञ्चामृतैः पञ्चगव्यैः स्नापयित्वा शुभेऽहनि ॥
संपूज्य देवतारूपं गुटिकां सर्वकामदाम् ।
प्राणप्रतिष्ठामन्त्रेण प्राणं तत्र नियोजयेत् ॥

अन्तर्योनिं ततो ध्यात्वा तत्र संस्थापयेत् बुधः ।
एषा तु गुटिका देवि ! कण्ठलग्नाऽखिलप्रदा ॥
शीर्षे वश्यकरी देवि ! नाभौ स्तम्भनकारिणी ।
बद्धा वामभुजे ह्येषा वैरिपक्षक्षयङ्करी ॥
जठरे रोगदमनी पुत्रदा हृदि संस्थिता ।
विद्याकरी ललाटस्था शिखायान्तु यशःप्रदा ॥
सर्वकामप्रदा देवी सर्वरोगक्षयङ्करी ।
दक्षिणे बाहुमूले वै यदि तिष्ठति सर्वदा ॥
तदा सर्वार्थसिद्धिः स्याद् यद्यन्मनसि वर्त्तते ।
स्नेहात्तु कवचस्यास्य पठनाद्धारणात् प्रिये ! ॥
सर्वान् कामानवाप्नोति तव स्नेहात् प्रकाशितम् ।
गुरोः पादप्रसादेन सद्विद्या यदि लभ्यते ॥
तथैव कवचं देवि ! ना जप्त्वा गुरुपाददुकाम् ।
तत्फलं नाशमाप्नोति परे नरकमाप्नुयात् ॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
न शक्नोमि प्रभावन्तु कवचस्यास्य वर्णितुम् ॥
यस्मै कस्मै न दातव्यं कवचञ्च सुदुर्लभम् ।
न देयं परशिष्येभ्यः कृपणेभ्यः सुरेश्वरि ! ॥
शिष्याय भक्तियुक्ताय सेवकाय तथैव च ।
गुरुभक्तिविहीनाय परदाररताय च ॥
निन्दकाय कुलीनाय दाम्भिकाय च सुन्दरि ! ।
यो ददाति निषिद्धेभ्यः कवचं मन्मुखात् श्रुतम् ॥
तस्य नश्यन्ति देवेशि ! आयुःकीर्त्तियशःश्रियः ।
न हिंसन्ति सदा देवि ! योगिन्यो मातृमण्डलात् ॥
परे नरकमाप्नोति जन्मकोटिशतानि च ।
देयं शिष्याय शान्ताय गुरुभक्तिपराय च ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सर्वलक्षणयुक्ताय तत्तन्मन्त्रयुताय च ॥

इत्युत्तरतन्त्रे कालीप्रस्तावे कालीभैरवसंवादे
श्रीमद्दक्षिणकालिकाकवचं सम्पूर्णम् ।

विरूपाक्ष उवाच ।

नमामि गुरुमक्षोभ्यं मन्त्रशक्तिसमन्वितम् ।
प्रसन्नं ज्ञानमज्ञानं हेतुं बुद्धिप्रकाशकम् ॥
गजेन्द्रवदनं नौमि रक्तं विघ्नविदारकम् ।
पाशाङ्कुशवराभीतिलसद्भुजचतुष्टयम् ॥
भैरवः सर्वदा पातु ऋषिर्मे शिरसोपरि ।
मुखे छन्दः सदा पातु त्रिष्टुप् च विजयात्मकम् ॥
गुणत्रयमयी शक्तिः परशक्तिस्तु ईड़िता ।
ब्रह्मस्वरूपिणी पातु हृदये मम कालिका ॥
बीजस्वरूपिणी पातु क्रीङ्कारी शक्तिरूपिणी ।
ह्रं शक्तिः सर्वदा पातु सर्वरक्षास्वरूपिणी ॥
महाकालः सदा पातु महाभीमपराक्रमः ।
ददातु मम कामानि सर्वसिद्धीश्वरो यतः ॥
आदि ऌवर्णपर्य्यन्ताः हृदये मम मातृकाः ।
एघान्ते ङादि चान्ताश्च रक्षन्तु बाहुयुग्मके ॥
नभोमध्यगता वर्णा मादिक्षान्तास्तथैव च ।
सबिन्दवः सदा पान्तु जङ्घयोरुभयोर्मम ॥
भूतप्रेतपिशाचाद्या विघ्नदेहास्तथा पुनः ।
पृथग्भावाः समध्याश्च वर्णा रक्षन्तु मां सदा ॥
समस्तरोमकूपेषु मर्मस्थानेषु सन्धिषु ।
नाड़ीधातुविकारेषु रक्षन्तु मम मातृकाः ॥
शक्तिराधाररूपा या सा पातु परमेश्वरी ।
अवर्णः सर्वदा पातु सर्वदेवमयः स्वयम् ॥

फणागताऽवनिः पातु समुद्रः पातु मां सदा ।
रत्नद्वीपः सदा पातु रक्षन्तु कल्पपादपाः ॥
श्मशानपीठकः पातु पातु मां मानवेदिका ।
सदाशिवमहाप्रेतशवो मां परिरक्षतु ॥
द्वारदेशे द्वारपाला योगिन्यः पान्तु मां सदा ।
सिद्धयोऽष्टौ सदा पान्तु पूर्वादिवसुदिग्गताः ॥
कालीं कपालिनीं कुल्लां कुरुकुल्लां तथैव च ।
विरोधिनीं विप्रचित्तां नमामि सर्वसिद्धये ॥
एतास्तु वशयोगिन्यो वह्निः षट्कोणके स्थिताः ।
रक्षन्तु मां सदा देव्यो मातरो भक्तवत्सलाः ॥
उग्रामुग्रप्रभां दीप्तां नमाम्यात्मविभूतये ।
सर्वसिद्धिं प्रयच्छन्तु पान्तु मां पुत्रवत् सदा ॥
नीलां घनां बलाकाञ्च प्रणमामि समुत्सुकः ।
सर्वविघ्नान् समुत्सार्य्य रक्षन्तु कलुषार्णवात् ॥
मात्रामुद्रामितानाञ्च नमामि चरणाम्बुजम् ।
देवीप्रेमसखीनाञ्च शरणं यामि सिद्धये ॥
एताः पञ्चदशे कोणे एकैका वरदा सदा ।
तर्जनीं वामहस्तेन खड्गं दक्षिणपाणिना ॥
मुण्डमालाधराः शीर्षे नीलाञ्जनचयोपमाः ।
शत्रुभ्यः सिद्धिदाश्चण्डाः पान्तु मां कालिकाप्रियाः ॥
वह्निःपद्मदलान्ते तु ब्रह्माण्याद्यष्टशक्तयः ।
रक्षन्तु मे प्रयच्छन्तु सर्वसिद्धिं दयान्विताम् ॥
ब्रह्माणी पातु मां पूर्वे सर्वाः शिववरप्रदाः ।
वह्नौ नारायणी पातु सर्वकामार्थसिद्धिदा ॥
माहेशी दक्षिणे पातु सर्वमङ्गलकारिणी ।
चामुण्डा नैर्ऋते पातु सर्वशत्रुप्रमर्दिनी ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कौमारी पश्चिमे पातु शक्तिहस्ता विसूदिनी ।
अपराजिता च वायव्यां पातु मां जयदा शुभा ॥
उत्तरे पातु वाराही वरदा घोररूपिणी ।
नारसिंही सदा पातु ऐशान्यां भयनाशिनी ॥
एतास्तु वरविद्यायाः शक्तयश्चाष्टदेवताः ।
ब्रह्मविष्णुशिवादीनां तेजोभिन्नकलेवरा ॥
सूर्य्येन्दुवह्निपीठे तु बैन्दवे परमेश्वरी ।
नमामि दक्षिणामूर्त्तिं कालिकां परभैरवीम् ॥
भिन्नाञ्जनचयप्रख्यां प्रवीनशवसंस्थिताम् ।
गलच्छोणितधाराभिः स्मेराननसरोरुहाम् ॥
पीनोन्नतकुचद्वन्द्वां पीनवक्षोनितम्बिनीम् ।
दक्षिणे मुक्तकेशां च दिगम्बरविनोदिनीम् ॥
महाकालसमाविष्टां स्मेरानन्दोपरि स्थिताम् ।
सुखसान्द्रस्मितामोदमोदिनीं मदविह्वलाम् ॥
आरक्तसुखसान्द्रादिनेत्रालीभिर्विराजिताम् ।
शवद्वयकृतोत्तंसां सिन्दूरतिलकोज्ज्वलाम् ॥
पञ्चाशन्मूर्त्तिघटितमालां शोणितलोहिताम् ।
नानामणिविशोभाढ्यां नानालङ्कारशोभिताम् ॥
शवास्थिकृतकेयूरशङ्खकङ्कणमण्डिताम् ।
शववक्षःसमारूढां लेलिहानां शवं क्वचित् ॥
शवमांसकृतग्रासां साट्टहासां मुहुर्मुहुः ।
खड्गमुण्डधरां वामे सव्येऽभयवरप्रदाम् ॥
दन्तुराञ्च महारौद्रीं चण्डनादातिभीषणाम् ।
शिवाभिर्घोररावाभिर्वेष्टितां भयनाशिनीम् ॥
माभैर्माभैः स्वभक्तेषु जल्पन्तीं घोरनिस्वने ।
यूयं किमिच्छथ ब्रूथ ददामीति प्रभाषिणीम् ॥

त्वं गतिः शरणं देवि ! त्वं माता परमेश्वरि ! ।
पाहि मां करुणासान्द्रे ! नमस्ते परमेश्वररि ! ॥
नमस्ते कालिके ! देवि ! नमस्ते भक्तवत्सले ! ।
मूर्खतां हर मे देवि ! प्रतिभाप्रतिदायिके ! ॥
गद्यपद्यमयीं वाणीं तर्कव्याकरणादिकाम् ।
अनधीतगतां विद्यां देहि दक्षिणकालिके ! ॥
जयं देहि सभामध्ये धनं देहि धनागमे ।
देहि मे चिरजीवित्वं कालिके ! रक्ष दक्षिणे ! ॥
राज्यं देहि यशो देहि पुत्रान् दारान् धनं तथा ।
देहान्ते देहि मे मुक्तिं जगन्मात ! नमोऽस्तु ते ॥
मङ्गला भैरवी दुर्गा कालिका त्रिदशेश्वरी ।
उमा हैमवती कन्या कल्याणी भैरवेश्वरी ॥
काली ब्राह्मी च माहेशी कौमारी माधुसूदनी ।
वाराही वासनी चण्डा त्वां जगुर्मुनयो मुदा ॥
उग्रतारेति तारेति शिवेत्येकजटेति च ।
लोकोत्तरेति बालेति गीयते कृतिभिः सदा ॥
यथा काली तथा तारा तथा छिन्ना च कुल्लुका ।
एकमूर्त्तिश्चतुर्भिश्च देवि ! त्वं कालिकापरा ॥
एकद्वित्रिविधा देवि ! कोटिधाऽनन्तरूपिणी ।
अङ्गाङ्गकैर्नामभेदैः कालिकेति प्रगीयते ॥
शम्भुः पञ्चमुखेनैव गुणान् वक्तुं क्षमो न ते ।
चापलं यत् कृतं सर्वं क्षमस्व शुभदा भव ॥
प्राणान् रक्ष यशो रक्ष पुत्रदारधनं तथा ।
सर्वकाले सर्वदेशे पाहि दक्षिणकालिके ! ॥
यः संपूज्य पठेद्रक्षां दिवा वा सन्ध्ययोस्तथा ।
अवाप्य महतीं प्रज्ञां सर्वकामांस्ततो लभेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

यद्यद् प्रार्थयते चित्ते तत्तदाप्नोति का कथा ।
स्वयं लक्ष्मीर्वसेद्देहे मुक्तिः करगता पुनः ॥
इति रुद्रजामले उत्तरतन्त्रे दक्षिणकालिकाकवचं
समाप्तम् ।

अथ स्तोत्रम् । महाकालभैरव उवाच ।
स्तवराजं शृणु राम ! सर्वकालमनोहरम् ।
यस्य स्मरणमात्रेण कालिका संप्रसीदति ॥
यद्भक्तस्त्वं यदेवासि भृगुवंशसमुद्भव ! ।
गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥
कालीस्तोत्रं मम प्रेयः कस्मैचिन्न प्रकाशितम् ।
कथ्यते त्वदनुरोधात् सर्वपापप्रणाशनम् ॥
शृणु राम ! शृणु राम ! शृणु राम ! सदैव हि ।
गोपनीयं गोपनीयं गोपनीयं न संशयः ॥
गणरात्रे मुक्तकेशो नग्नः शक्तिसुसङ्गतः ।
रक्तचन्दनसिन्दूरैस्तथा पञ्चोपचारकैः ॥
मत्स्यमांससुरादयैश्च ताम्बूलैश्च विशेषतः ।
पूजयित्वा महाकालीं महाकालरतातुराम् ॥
तीर्थपानं विधायादौ ताम्बूलं भक्षयेत्ततः ।
भगलिङ्गामृतं मध्ये निवेदयेत् सुसाधकः ॥
जपित्वा च महामन्त्रं कालीरूपं मनोहरम् ।
मनसा चिन्तयेत् कालीं पठन् स्तोत्रन्तु साधकः ॥
रक्षोयक्षपिशाचेभ्यो नित्यं रक्षाकरं परम् ।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥
दक्षिणे कालिके ! मातर्मुण्डमालाविभूषिते ! ।
भक्तत्राणव्यग्रचित्ते ! यमजाड्यं विनाशय ॥
ज्वलच्चिताग्निमध्यस्थे ! परिवारसमन्विते ! ।

त्वत्पदाम्भोजमापन्नं रक्ष मां पुत्रवत् सदा ॥
महामेघच्छविन्यासे ! मुक्तकेशि ! चतुर्भुजे ! ।
पाण्डित्यं कविताञ्चैव मह्यं देहि महेश्वरि ! ॥
वामोर्द्ध्वे च महाखड्गं विधारयसि शङ्करि ! ।
अधोलसच्छिन्नमुण्डे ! मम विघ्नं विनाशय ॥
अभयं दक्षिणे चोर्द्ध्वे तथाधःपाणिना वरम् ।
कण्ठसंसक्तमुण्डालि ! महाकालि ! नमोऽस्तु ते ॥
सततं त्वत्स्वरूपं ये स्मरन्ति साधकोत्तमाः ।
तेषां समस्तशास्त्रेषु गतिरव्याहता सदा ॥
चिन्तयामि च त्वन्नाम रक्ष मां सर्वतः सदा ।
दिगम्बरीं करालास्यां घोरदंष्ट्रां भयानकाम् ॥
कर्णमूले शवयुग्मां स्थूलतुङ्गपयोधराम् ।
महारौद्रीं महाघोरां श्मशानालयवासिनीम् ॥
शवपाणिसमूहैश्च कृतकाञ्चीं हसन्मुखीम् ।
ओष्ठप्रान्तगलद्रक्तधाराविस्फुरिताननाम् ॥
मुण्डालीसंस्रवद्रक्तैः सर्वाङ्गे चारुचर्चिताम् ।
शिवाभिर्घोररावाभिश्चतुर्दिक्षु समन्विताम् ॥
पूजाकाले पठेद् यस्तु सद्भावपुलको बुधः ।
स भवेत् कालिकापुत्र इति ख्यातिमुपागतः ॥
रजस्वलाभगं पश्यन् जप्त्वा कालीमहामनुम् ।
स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् ॥
अष्टोत्तरशतं जप्त्वा योनिमामन्त्र्य मन्त्रवित् ॥
संगम्य पठनादस्य सर्वविद्येश्वरो भवेत् ।
मातेव दक्षिणा तस्य सर्वत्र हितकारिणी ।
तस्य देहे सदा काली वसेद्राम ! न संशयः ॥
पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

षण्मार्गस्य रोधकायं गुर्वभक्ताय सर्वदा ॥
शृणु वत्स ! प्रयत्नेन स्तवमेनं न दर्शयेत् ।
प्रमादाद्दर्शनाद्वापि तस्य सिद्धिर्भवेन्न हि ॥
इति कालिकापरमरहस्ये कालीहृदये महाकालभैरव-
परशुरामसंवादे श्रीदक्षिणकालिकास्तवः समाप्तः ।

तन्त्रान्तरोक्तकवचम् यथा—। भैरव उवाच ।

कालिका या महाविद्या कथिता भुवि दुर्लभा ।
तथापि हृदये शल्यमस्ति देवि ! कृपां कुरु ॥
कवचन्तु महादेवि ! कथयस्वानुकम्पया ।
यदि नो कथ्यते मातर्विमुञ्चामि तदा तनुम् ॥
देव्युवाच । शङ्कापि जायते वत्स ! तव स्नेहात् प्रकाश्यते ।
न वक्तव्यं न दातव्यमतिगुह्यतरं महत् ॥
कालिका जगतां माता शोकदुःखविनाशिनी ।
विशेषतः कलियुगे महापातकहारिणी ॥
काली मे पुरतः पातु पृष्ठतश्च कपालिनी ।
कुल्ला मे दक्षिणे पातु कुरुकुल्ला तथोत्तरे ॥
विरोधिनी शिरः पातु विप्रचित्ता च चक्षुषी ।
उग्रा मे नासिकां पातु कर्णौ चोग्रप्रभा तथा ॥
वदनं पातु मे दीप्ता नीला च चिबुकं तथा ।
घना ग्रीवां सदा पातु बलाका बाहुयुग्मकम् ॥
मात्रा पातु करद्वन्द्वं वक्षो मुद्रा सदावतु ।
मिता पातु स्तनद्वन्द्वं योनिमण्डलदेवताः ॥
ब्राह्मी मे जठरं पातु नाभिं नारायणी तथा ।
ऊरू माहेश्वरी पातु चामुण्डा पातु लिङ्गकम् ॥
कौमारी च कटीं पातु जङ्घायुग्मं तथैव च ।
अपराजिता च पादौ मे वाराही पातु चाङ्गुलीः ॥

ADYAR LIBRARY
Rare
1896
Par
SR
(a)
Th.C

सन्धिस्थानं नारसिंही पत्रस्था देवताऽवतु ।
रक्षाहीनञ्च यत् स्थानं वर्जितं कवचेन तु ॥
तत् सर्वं रक्ष मे देवि ! कालिके घोरदक्षिणे ! ।
ऊर्ध्वमधस्तथा दिक्षु पातु देवी स्वयं वपुः ॥
हिंस्रेभ्यः सर्वदा पातु साधकञ्च जलाधिकात् ।
दक्षिणा कालिका देवी व्यापकं मे सदावतु ॥
इदं कवचमज्ञात्वा यो भजेद्घोरदक्षिणाम् ।
न पूजाफलमाप्नोति विघ्नस्तस्य पदे पदे ॥
कवचेनावृतो नित्यं यत्र तत्रैव गच्छति ।
तत्र तत्राभयं तस्य न क्षोभं विद्यते क्वचित् ॥

इति दक्षिणकालिकाकवचं समाप्तम् ।

अथ सहस्रनामस्तोत्रम् यथा—। श्रीशिव उवाच ।

कथितोऽयं महामन्त्रः सर्वमन्त्रोत्तमोत्तमः ।
यामासाद्य मया प्राप्तमैश्वर्यपदमुत्तमम् ॥
संयुक्तः परया भक्त्या यथोक्तविधिना भवान् ।
कुरुतामर्चनं देव्यास्त्रैलोक्यविजिगीषया ॥
श्रीराम उवाच । प्रसन्नो यदि मे देव ! परमेश ! पुरातन ! ।
रहस्यं परमं देव्याः कृपया कथय प्रभो ! ॥
विनार्चनं विना होमं विना न्यासं विना बलिम् ।
विना गन्धं विना पुष्पं विना नित्योदितां क्रियाम् ॥
प्राणायामं विना ध्यानं विना भूतविशोधनम् ।
विना दानं विना जापं येन काली प्रसीदति ॥
शिव-उवाच । पृष्टं त्वयोत्तमं प्राज्ञ ! भृगुवंशसमुद्भव ! ।
भक्तानामपि भक्तोऽसि त्वमेव साधयिष्यसि ॥
देवीं दानवकोटिघ्नीं लीलया रुधिरप्रियाम् ।
सदा स्तोत्रप्रियामुग्रां कामकौतुकलालसाम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सर्वदानन्दहृदयामासवोत्सवमानसाम् ।
माध्वीकमत्स्यमांसानुरागिणीं वैष्णवीं पराम् ॥
श्मशानवासिनीं प्रेतगणनृत्यमहोत्सवाम् ।
योगप्रभावां योगेशीं योगीन्द्रहृदयस्थिताम् ॥
तामुग्रकालिकां राम ! प्रसादयितुमर्हसि ।
तस्याः स्तोत्रं परं पुण्यं स्वयं काल्या प्रकाशितम् ॥
तव तत् कथयिष्यामि श्रुत्वा वत्सावधारय ।
गोपनीयं प्रयत्नेन पठनीयं परात्परम् ॥
यस्यैककालपठनात् सर्वे विघ्नाः समाकुलाः ।
नश्यन्ति दहने दीप्ते पतङ्गा इव सर्वतः ॥
गद्यपद्यमयी वाणी तस्य गङ्गाप्रवाहवत् ।
तस्य दर्शनमात्रेण वादिनो निष्प्रभां गताः ॥
तस्य हस्ते सदैवास्ति सर्वसिद्धिर्न संशयः ।
राजानोऽपि च दासत्वं भजन्ते किं परे जनाः ? ॥
निशीथे मुक्तकेशस्तु नग्नः शक्तिसमाहितः ।
मनसा चिन्तयेत् कालीं महाकालेन लालिताम् ॥
पठेत् सहस्रनामाख्यं स्तोत्रं मोक्षस्य साधनम् ।
प्रसन्ना कालिका तस्य पुत्रत्वेनानुकम्पते ॥
यथा ब्रह्मामृतैर्ब्रह्मकुसुमैः पूजिता परा ।
प्रसीदति तथानेन स्तुता काली प्रसीदति ॥

अस्य श्रीदक्षिणकालिकासहस्रनामस्तोत्रस्य महाकालभैरव-ऋषिस्त्रिष्टुप्छन्दः श्मशानकाली देवता धर्मार्थकाममोक्षार्थे विनियोगः ।

ओं श्मशानकालिका काली भद्रकाली कपालिनी ।
गुह्यकाली महाकाली कुरुकुल्ला विरोधिनी ॥
कालिका कालरात्रिश्च महाकालनितम्बिनी ।

कालभैरवभार्या च कुलवर्त्मप्रकाशिनी ॥
कामदा कामिनी कन्या कमनीयस्वरूपिणी ।
कस्तूरीरसलिप्ताङ्गी कुञ्जरेश्वरगामिनी ॥
ककारवर्णसर्वाङ्गी कामिनी कामसुन्दरी ।
कामार्त्ता कामरूपा च कामधेनुः कलावती ॥
कान्ता कामस्वरूपा च कामाख्या कुलकामिनी ।
कुलीना कुलवत्यम्बा दुर्गा दुर्गतिनाशिनी ॥
कौमारी कुलजा कृष्णा कृष्णदेहा कृशोदरी ।
कृशाङ्गी कुलिशाङ्गी च क्रीङ्कारी कमला कला ॥
करालास्या करालो च कुलकान्तापराजिता ।
उग्रा उग्रप्रभा दीप्ता विप्रचित्ता महाबला ॥
नीला घना मेघनादा मात्रा मुद्रा मितामिता ।
ब्राह्मी नारायणी भद्रा सुभद्रा भक्तवत्सला ॥
माहेश्वरी च चामुण्डा वाराही नारसिंहिका ।
वज्राङ्गी वज्रकङ्काला नृमुण्डस्रग्विणी शिवा ॥
मालिनी नरमुण्डालीगलद्रक्तविभूषणा ।
रक्तचन्दनसिक्ताङ्गी सिन्दूरारुणमस्तका ॥
घोररूपा घोरदंष्ट्रा घोरा घोरतरा शुभा ।
महादंष्ट्रा महामाया सुदती युगदन्तुरा ॥
सुलोचना विरूपाक्षी विशालाक्षी त्रिलोचना ।
शारदेन्दुप्रसन्नास्या स्फुरत्स्मेताम्बुजेक्षणा ॥
अट्टहासा प्रफुल्लास्या स्मेरवक्त्रा सुभाषिणी ।
प्रफुल्लपद्मवदना स्मितास्या प्रियभाषिणी ॥
कोटराक्षी कुलश्रेष्ठा महती बहुभाषिणी ।
सुमतिः कुमतिश्चण्डा चण्डमुण्डातिवेगिनी ॥
प्रचण्डा चण्डिका चण्डी चर्चिता चण्डवेगिनी ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सुकेशी मुक्तकेशी च दीर्घकेशी महाकचा ॥
प्रेतदेहकर्णपूरा प्रेतपाणिसुमेखला ।
प्रेतासना प्रियप्रेता प्रेतभूमिकृतालया ॥
श्मशानवासिनी पुण्या पुण्यदा कुलपण्डिता ।
पुण्यालया पुण्यदेहा पुण्यश्लोका च पावनी ॥
पूता पवित्रा परमा परा पुण्यविभूषणा ।
पुण्यनाम्नी भीतिहरा वरदा खड्गपाशिनी ॥
नृमुण्डहस्ता शान्ता च छिन्नमस्ता सुनासिका ।
दक्षिणा श्यामला श्यामा शान्ता पीनोन्नतस्तनी ॥
दिगम्बरी घोररावा सृक्कान्तरक्तवाहिनी ।
घोररावा शिवासङ्गा निःसङ्गा मदनातुरा ॥
मत्ता प्रमत्ता मदना सुधासिन्धुनिवासिनी ।
अतिमत्ता महामत्ता सर्वाकर्षणकारिणी ॥
गीतप्रिया वाद्यरता प्रेतनृत्यपरायणा ।
चतुर्भुजा दशभुजा अष्टादशभुजा तथा ॥
कात्यायनी जगन्माता जगतीपरमेश्वरी ।
जगद्बन्धुर्जगद्धात्री जगदानन्दकारिणी ॥
जगज्जीववती हैमवती माया महालया ।
नागयज्ञोपवीताङ्गी नागिनी नागशायिनी ॥
नागकन्या देवकन्या गान्धारी किन्नरी सुरी ।
मोहरात्री महारात्री दारुणाभा सुरासुरी ॥
विद्याधरी वसुमती यक्षिणी योगिनी जरा ।
राक्षसी डाकिनी वेदमयी वेदविभूषणा ॥
श्रुतिस्मृतिमहाविद्या गुह्यविद्यापुरातनी ।
चिन्ताचिन्ता स्वधा स्वाहा निद्रा तन्द्रा च पार्वती ॥
अर्पणा निश्चला लोला सर्वविद्यातपस्विनी ।

गङ्गा काशी शची सीता सती सत्यपरायणा ॥
नीतिः सुनीतिः सुरुचिस्तुष्टिः पुष्टिर्धृतिः क्षमा ।
वाणी बुद्धिर्महालक्ष्मीर्लक्ष्मीर्नीलसरस्वती ॥
स्रोतस्वती स्रोतवती मातङ्गी विजया जया ।
नदी सिन्धुः सर्वमयी तारा शून्यनिवासिनी ॥
शुद्धा तरङ्गिणी मेधा लाकिनी बहुरूपिणी ।
सदानन्दमयी सत्या सर्वानन्दस्वरूपिणी ॥
सुनन्दा नन्दिनी स्तुत्या स्तवनीया स्वभाविनी ।
रङ्गिणी टङ्किनी चित्रा विचित्रा चित्ररूपिणी ।
पद्मा पद्मालया पद्ममुखी पद्मविभूषणा ॥
शाकिनी हाकिनी क्षान्ता राकिणी रुधिरप्रिया
भ्रान्तिर्भवानी रुद्राणी मृडानी शत्रुमर्दिनी ॥
उपेन्द्राणी महेशानी ज्योत्स्ना चेन्द्रस्वरूपिणी ।
सूर्य्यात्मिका रुद्रपत्नी रौद्री स्त्री प्रकृतिः पुमान् ॥
शक्तिः सूक्तिर्मतिमती भुक्तिर्मुक्तिः पतिव्रता ।
सर्वेश्वरी सर्वमाता शर्वाणी हरवल्लभा ॥
सर्वज्ञा सिद्धिदा सिद्धा भाव्या भव्या भयापहा ।
कर्त्री हर्त्री पालयित्री शर्वरी तामसी दया ॥
तमिस्रा यामिनीस्था च स्थिरा धीरा तपस्विनी ।
चार्वङ्गी चञ्चला लोलजिह्वा चारुचरित्रिणी ॥
त्रपा त्रपावती लज्जा निर्लज्जा क्रौं रजोवती ।
सत्त्ववती धर्मनिष्ठा श्रेष्ठा निष्ठुरवादिनी ॥
गरिष्ठा दुष्टसंहर्त्री विशिष्टा श्रेयसी घृणा ।
भीमा भयानका भीमनादिनी भीः प्रभावती ॥
वागीश्वरी श्रीर्यमुना यज्ञकर्त्री यजुःप्रिया ।
ऋक्सामाथर्वनिलया रागिणी शोभनस्वरा ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कलकण्ठी कम्बुकण्ठी वेणुवीणापरायणा ।
वंशिनी वैष्णवी स्वच्छा धात्री त्रिजगदीश्वरी ॥
मधुमती कुण्डलिनी ऋद्धिः सिद्धिः शुचिस्मिता ।
रम्भोर्वशी रतीरामा रोहिणी रेवती रमा ॥
शङ्खिनी चक्रिणी कृष्णा गदिनी पद्मिनी तथा ।
शूलिनी परिघास्त्रा च पाशिनी शार्ङ्गपाणिनी ॥
पिनाकधारिणी धूम्रा शरभी वनमालिनी ।
वज्रिणी समरप्रीता वेगिनी रणपण्डिता ॥
जटिनी बिम्बिनी नीला लावण्याम्बुधिचन्द्रिका ।
बलिप्रिया सदापूज्या पूर्णा दैत्येन्द्रमाथिनी ॥
महिषासुरसंहर्त्री वासिनी रक्तदन्तिका ।
रक्तपा रुधिराक्ताङ्गी रक्तखर्परहस्तिनी ॥
रक्तप्रिया मांसरुचिरासवासक्तमानसा ।
गलच्छोणितमुण्डालिकण्ठमालाविभूषणा ॥
शवासना चितान्तस्था माहेशी वृषवाहिनी ।
व्याघ्रत्वगम्बरा चीनचेलिनी सिंहवाहिनी ॥
वामदेवी महादेवी गौरी सर्वज्ञभाविनी ।
बालिका तरुणी वृद्धा वृद्धमाता जरातुरा ॥
सुभ्रुर्विलासिनी ब्रह्मवादिनी ब्राह्मणी मही ।
स्वप्नावती चित्रलेखा लोपामुद्रा सुरेश्वरी ॥
अमोघाऽरुन्धती तीक्ष्णा भोगवत्यनुवादिनी ।
मन्दाकिनी मन्दहासा ज्वालामुख्यसुरान्तका ॥
मानदा मानिनी मान्या माननीया मदोद्धता ।
मदिरा मदिरोन्मादा मेध्या नव्या प्रसादिनी ॥
सुमध्यानन्तगुणिनी सर्वलोकोत्तमोत्तमा ।
जयदा जित्वरा जेत्री जयश्रीर्जयशालिनी ॥

सुखदा शुभदा सत्या सभासंक्षोभकारिणी ।
शिवदूती भूतिमती विभूतिर्भीषणानना ॥
कौमारी कुलजा कुन्ती कुलस्त्री कुलपालिका ।
कीर्त्तिर्यशस्विनी भूषा भूष्या भूतपतिप्रिया ॥
सगुणा निर्गुणा धृष्टा निष्ठा काष्ठा प्रतिष्ठिता ।
धनिष्ठा धनदा धन्या वसुधा स्वप्रकाशिनी ॥
उर्वी गुर्वी गुरुश्रेष्ठा सगुणा त्रिगुणात्मिका ।
महाकुलीना निष्कामा सकामा कामजीवना ॥
कामदेवकला रामाभिरामा शिवनर्त्तकी ।
चिन्तामणिकल्पलता जाग्रती दीनवत्सला ॥
कार्त्तिकी कीर्त्तिका कृत्या अयोध्या विषमा समा ।
सुमन्त्रा मन्त्रिणी घूर्णा ह्लादिनी क्लेशनाशिनी ॥
त्रैलोक्यजननी हृष्टा निर्मांसा मनोरूपिणी ।
तडागनिम्नजठरा शुष्कमांसास्थिमालिनी ॥
अवन्ती मथुरा माया त्रैलोक्यपावनीश्वरी ।
व्यक्ताव्यक्तानेकमूर्त्तिः शर्वरी भीमनादिनी ॥
क्षेमङ्करी शङ्करी च सर्वसम्मोहकारिणी ।
ऊर्द्ध्वतेजस्विनी क्लिन्ना महातेजस्विनी तथा ॥
अद्वैता भोगिनी पूज्या युवती सर्वमङ्गला ।
सर्वप्रियङ्करी भोग्या धरणी पिशिताशना ॥
भयङ्करी पापहरा निष्कलङ्का वशङ्करी ।
आशा तृष्णा चन्द्रकला निद्रान्या वायुवेगिनी ॥
सहस्रसूर्य्यसङ्काशा चन्द्रकोटिसमप्रभा ।
वह्निमण्डलसंस्था च सर्वतत्त्वप्रतिष्ठिता ॥
सर्वाचारवती सर्वदेवकन्याधिदेवता ।
दक्षकन्या दक्षयज्ञनाशिनी दुर्गतारिका ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

दृज्या पूज्या विभीर्भूतिः सत्कीर्त्तिर्ब्रह्मरूपिणी ।
रम्भोरुश्चतुरा राका जयन्ती करुणा कुहुः ॥
मनस्विनी देवमाता यशस्या ब्रह्मचारिणी ।
ऋद्धिदा वृद्धिदा वृद्धिः सर्वाद्या सर्वदायिनी ॥
आधाररूपिणी ध्येया मूलाधारनिवासिनी ।
आज्ञा प्रज्ञापूर्णमनाश्चन्द्रमुख्यनुकूलिनी ॥
वावदूका निम्ननाभिः सत्या सन्ध्या दृढ़व्रता ।
आन्वीक्षिकी दण्डनीतिस्त्रयी त्रिदिवसुन्दरी ॥
ज्वलिनी ज्वालिनी शैलतनया विन्ध्यवासिनी ।
अमेया खेचरी धैर्य्या तुरीया विमलातुरा ॥
प्रगल्भा वारुणीच्छाया शशिनी विस्फुलिङ्गिनी ।
भुक्तिः सिद्धिः सदाप्राप्तिः प्राकाम्या महिमाणिमा ॥
इच्छासिद्धिर्विसिद्धा च वशित्वोर्द्ध निवासिनी ।
लघिमा चैव गायत्री सावित्री भुवनेश्वरी ॥
मनोहरा चिता दिव्या देव्युदारा मनोरमा ।
पिङ्गला कपिला जिह्वारसज्ञा रसिका रसा ॥
सुषुम्नेड़ा भोगवती गान्धारी नरकान्तका ।
पाञ्चाली रुक्मिणी राधाराध्या भीमाधिराधिका ॥
अमृता तुलसी वृन्दा कैटभी कपटेश्वरी ।
उग्रचण्डेश्वरी वीरा जननी वीरसुन्दरी ॥
उग्रतारा यशोदाख्या दैवकी देवमानिता ।
निरञ्जना चित्रदेवी क्रोधिनी कुलदीपिका ॥
कुलवागीश्वरी वाणी मातृका द्राविणी द्रवा ।
योगेश्वरी महामारी भ्रामरी विन्दुरूपिणी ॥
दूती प्राणेश्वरी गुप्ता बहुला चामरी प्रभा ।
कुब्जिका ज्ञानिनी ज्येष्ठा भूशुण्डी प्रकटातिथिः ॥

द्रविणी गोपनी माया कामवीजेश्वरी क्रिया ।
शाम्भवी केकरा मेना मूषलास्त्रा तिलोत्तमा ॥
अमेयविक्रमा क्रूरा सम्पत्शाला त्रिलोचना ।
सुस्थी हव्यवहा प्रीतिरुष्मा धूम्रार्चिरङ्गदा ॥
तपिनी तापिनी विश्वा भोगदा धारिणी धरा ।
त्रिखण्डा बोधिनी वश्या सकला शब्दरूपिणी ॥
वीजरूपा महामुद्रा योगिनी योनिरूपिणी ।
अनङ्गकुसुमानङ्गमेखलानङ्गरूपिणी ॥
वज्रेश्वरी च जयिनी सर्वद्वन्द्वक्षयङ्करी ।
षड़ङ्गयुवती योगयुक्ता ज्वालांशुमालिनी ॥
दुराशया दुराधारा दुर्जया दुर्गरूपिणी ।
दुरन्ता दुष्कृतिहरा दुर्ध्येया दुरतिक्रमा ॥
हंसेश्वरी त्रिकोणस्था शाकम्भर्य्यनुकम्पिनी ।
त्रिकोणनिलया नित्या परमामृतरञ्जिता ॥
महाविद्येश्वरी श्वेता भेरुण्डाकुलसुन्दरी ।
त्वरिता भक्तिसंसक्ता भक्तवश्या सनातनी ॥
भक्तानन्दमयी भक्तभाविका भक्तशङ्करी ।
सर्वसौन्दर्य्यनिलया सर्वसौभाग्यशालिनी ॥
सर्वसंभोगभवना सर्वसौख्यनिरूपिणी ।
कुमारीपूजनरता कुमारीव्रतचारिणी ॥
कुमारीभक्तिसुखिनी कुमारीरूपधारिणी ।
कुमारीपूजकप्रीता कुमारीप्रीतिदा प्रिया ॥
कुमारीसेवकासङ्गा कुमारीसेवकालया ।
आनन्दभैरवी वाला भैरवी वटुभैरवी ॥
श्मशानभैरवी कालभैरवी पुरभैरवी ।
महाभैरवपत्नी च परमानन्दभैरवी ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

सुधानन्दभैरवी च उन्मादानन्दभैरवी ।
मुक्तानन्दभैरवी च तथा तरुणभैरवी ॥
ज्ञानानन्दभैरवी च अमृतानन्दभैरवी ।
महाभयङ्करी तीव्रा तीव्रवेगा तपस्विनी ॥
त्रिपुरा परमेशानी सुन्दरी पुरसुन्दरी ।
त्रिपुरेशी पञ्चदशी पञ्चमी पुरवासिनी ॥
महासप्तदशी चैव षोड़शी त्रिपुरेश्वरी ।
महाङ्कुशस्वरूपा च महाचक्रेश्वरी तथा ॥
नवचक्रेश्वरी चक्रेश्वरी त्रिपुरमालिनी ।
राजराजेश्वरी धीरा महात्रिपुरसुन्दरी ॥
सिन्दूरपूररुचिरा श्रीमत्त्रिपुरसुन्दरी ।
सर्वाङ्गसुन्दरी रक्ता रक्तवस्त्रोत्तरीयिणी ॥
जवा यावकसिन्दूररक्तचन्दनधारिणी ।
जवायावकसिन्दूररक्तचन्दनरूपधृक् ॥
चामरीवालकुटिलनिर्मलश्यामकेशिनी ।
वज्रमौक्तिकरत्नाढ्यकिरीटमुकुटोज्ज्वला ॥
रत्नकुण्डलसंसक्तस्फुरद्गण्डमनोरमा ।
कुञ्जरेश्वरकुम्भोत्थमुक्तारञ्जितनासिका ॥
मुक्ताविद्रुममाणिक्यहाराढ्यस्तनमण्डला ।
सूर्य्यकान्तेन्दुकान्ताढ्यस्पर्शाश्मकण्ठभूषणा ॥
वीजपूरस्फुरद्वीजदन्तपङ्क्तिरनुत्तमा ।
कामकोदण्डकाभुग्नभ्रूकटाक्षप्रवर्षिणी ॥
मातङ्गकुम्भवक्षोजा लसत्कोकनदेक्षणा ।
मनोज्ञशष्कुलीकर्णा हंसीगतिविविड़म्बिनी ॥
पद्मरागाङ्गदज्योतिर्दोश्चतुष्कप्रकाशिनी ।
नानामणिपरिस्फूर्जच्छुद्रकाञ्चनकङ्कना ॥

नागेन्द्रदन्तनिर्माणवलयाङ्कितपाणिनी ।
अङ्गुरीयकचित्राङ्गी विचित्रक्षुद्रघण्टिका ॥
पट्टाम्बरपरीधाना कलमञ्जीरशिञ्जिनी ।
कर्पूरागुरुकस्तूरीकुङ्कुमद्रवलेपिता ॥
विचित्ररत्नपृथिवीकल्पशाखितलस्थिता ।
रत्नद्वीपस्फुरद्रक्तसिंहासनविलासिनी ॥
षट्चक्रभेदनकरी परमानन्दरूपिणी ।
सहस्रदलपद्मान्तश्चन्द्रमण्डलवर्त्तिनी ॥
ब्रह्मरूपशिवक्रोड़नानासुखविलासिनी ।
हरविष्णुविरिञ्चीन्द्रग्रहनायकसेविता ॥
शिवा शैवा च रुद्राणी तथैव शिववादिनी ।
मातङ्गिनी श्रीमती च तथैवानन्दमेखला ॥
डाकिनी योगिनी चैव तथोपयोगिनी मता ।
माहेश्वरी वैष्णवी च भ्रामरी शिवरूपिणी ॥
अलम्बुषा वेगवती क्रोधरूपा सुमेखला ।
गान्धारी हस्तिजिह्वा च ईड़ा चैव शुभङ्करी ॥
पिङ्गला ब्रह्मदूती च सुषुम्ना चैव गन्धिनी ।
आत्मयोनिर्ब्रह्मयोनिर्जगद्योनिरयोनिजा ॥
भगरूपा भगस्थात्री भगिनी भगरूपिणी ।
भगात्मिका भगाधाररूपिणी भगमालिनी ॥
लिङ्गाख्या चैव लिङ्गेशी त्रिपुराभैरवी तथा ।
लिङ्गगीतिः सुगीतिश्च लिङ्गस्था लिङ्गरूपधृक् ॥
लिङ्गमाना लिङ्गभवा लिङ्गलिङ्गा च पार्वती ।
भगवती कौशिकी च प्रेमा चैव प्रियंवदा ॥
गृध्ररूपा शिवारूपा चक्रिणी चक्ररूपधृक् ।
लिङ्गाभिधायिनी लिङ्गप्रिया लिङ्गनिवासिनी ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

लिङ्गस्था लिङ्गिनी लिङ्गरूपिणी लिङ्गसुन्दरी ।
लिङ्गगीतिर्महाप्रीता भगगीतिर्महासुखा ॥
लिङ्गनामसदानन्दा भगनामसदागतिः ।
लिङ्गमालाकण्ठभूषा भगमालाविभूषणा ॥
भगलिङ्गामृतप्रीता भगलिङ्गामृतात्मिका ।
भगलिङ्गार्चनप्रीता भगलिङ्गस्वरूपिणी ॥
भगलिङ्गस्वरूपा च भगलिङ्गसुखावहा ॥
स्वयम्भूकुसुमप्रीता स्वयम्भूकुसुमार्चिता ।
स्वयम्भूकुसुमप्राणा स्वयम्भूकुसुमोत्थिता ।
स्वयम्भूकुसुमस्नाता स्वयम्भूपुष्पतर्पिता ॥
स्वयम्भूपुष्पघटिता स्वयम्भूपुष्पधारिणी ।
स्वयम्भूपुष्पतिलका स्वयम्भूपुष्पचर्चिता ॥
स्वयम्भूपुष्पनिरता स्वयम्भूकुसुमग्रहा ।
स्वयम्भूपुष्पयज्ञांशा स्वयम्भूकुसुमात्मिका ॥
स्वयम्भूपुष्पनिचिता स्वयम्भूकुसुमप्रिया ।
स्वयम्भूकुसुमादानलालसोन्मत्तमानसा ॥
स्वयम्भूकुसुमानन्दलहरीस्निग्धदेहिनी ।
स्वयम्भूकुसुमाधारा स्वयम्भूकुसुमाकुला ॥
स्वयम्भूपुष्पनिलया स्वयम्भूपुष्पवासिनी ।
स्वयम्भूकुसुमस्निग्धा स्वयम्भूकुसुमात्मिका ॥
स्वयम्भूपुष्पकरिणी स्वयम्भूपुष्पपाणिका ।
स्वयम्भूकुसुमध्याना स्वयम्भूकुसुमप्रभा ॥
स्वयम्भूकुसुमज्ञाना स्वयम्भूपुष्पभोगिनी ।
स्वयम्भूकुसुमोल्लासा स्वयम्भूपुष्पवर्षिणी ॥
स्वयम्भूकुसुमोत्साहा स्वयम्भूपुष्परूपिणी ।
स्वयम्भूकुसुमोन्मादा स्वयम्भूपुष्पसुन्दरी ॥

स्वयम्भूकुसुमाराध्या स्वयम्भूकुसुमोद्भवा ।
स्वयम्भूकुसुमव्यग्रा स्वयम्भूपुष्पपूर्णिता ॥
स्वयम्भूपूजकप्रज्ञा स्वयम्भूहीटमातृका ।
स्वयम्भूदाटरचित्री स्वयम्भूरक्ततारिका ॥
स्वयम्भूपूजकग्रस्ता स्वयम्भूपूजकप्रिया ।
स्वयम्भूवन्दकाधारा स्वयम्भूनिन्दकान्तका ॥
स्वयम्भूप्रदसर्वस्वा स्वयम्भूप्रदपुत्रिणी ।
स्वयम्भूप्रदसस्मेरा स्वयम्भूप्रदशरीरिणी ।
सर्वकालोद्भवप्रीता सर्वकालोद्भवात्मिका ॥
सर्वकालोद्भवोद्भावा सर्वकालोद्भवोद्भवा ।
कुण्डपुष्पसदाप्रीतिर्गोलपुष्पसदारतिः ॥
कुण्डगोलोद्भवप्राणा कुण्डगोलोद्भवात्मिका ।
स्वयम्भूवा शिवा धात्री पावनी लोकपावनी ॥
कीर्त्तिर्यशस्विनी मेधा विमेधा शुक्रसुन्दरी ।
अश्विनी कृत्तिका पुष्या तेजस्का चन्द्रमण्डला ।
सूक्ष्मासूक्ष्मा वलाका च वरदा भयनाशिनी ॥
वरदाभयदा चैव मुक्तिबन्धविनाशिनी ।
कामुका कामदा कान्ता कामाख्या कुलसुन्दरी ॥
दुःखदा सुखदा मोक्षा मोक्षदार्थप्रकाशिनी ।
दुष्टादुष्टमतिश्चैव सर्वकार्य्यविनाशिनी ॥
शुक्राधारा शुक्ररूपा शुक्रसिन्धुनिवासिनी ।
शुक्रालया शुक्रभोगा शुक्रपूजासदारतिः ॥
शुक्रपूज्या शुक्रहोमसन्तुष्टा शुक्रवत्सला ।
शुक्रमूर्त्तिः शुक्रदेहा शुक्रपूजकपुत्रिणी ॥
शुक्रस्था शुक्रिणी शुक्रसंस्पृहा शुक्रसुन्दरी ।
शुक्रस्नाता शुक्रकरी शुक्रसेव्यातिशुक्रिणी ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

महाशुक्रा शुक्रभवा शुक्रवृष्टिविधायिनी ।
शुक्राभिधेया शुक्रार्हा शुक्रवन्दकवन्दिता ॥
शुक्रानन्दकरी शुक्रसदानन्दाभिधायिका ।
शुक्रोत्सवा सदाशुक्रपूर्णा शुक्रमनोरमा ॥
शुक्रपूजकसर्वस्वा शुक्रनिन्दकनाशिनी ।
शुक्रात्मिका शुक्रसम्पत् शुक्राकर्षणकारिणी ॥
शारदा साधकप्राणा साधकासक्तमानसा ।
साधकोत्तमसर्वस्वा साधकाभक्तरक्षपा ॥
साधकानन्दसन्तोषा साधकानन्दकारिणी ।
आत्मविद्या ब्रह्मविद्या परब्रह्मस्वरूपिणी ॥
त्रिकूटस्था पञ्चकूटा सर्वकूटशरीरिणी ।
सर्ववर्णमयी वर्णजपमालाविधायिनी ॥

श्रीशिव उवाच ।

इति श्रीकालिकानामसहस्रं शिवभाषितम् ।
गुह्याद्गुह्यतरं साक्षात् महापातकनाशनम् ॥
पूजाकाले निशीथे च सन्ध्ययोरुभयोरपि ।
लभते गाणपत्यं स यः पठेत् साधकोत्तमः ॥
यः पठेत् पाठयेद्वापि शृणोति श्रावयेदथ ।
सर्वपापविनिर्मुक्तः स याति कालिकापुरम् ॥
श्रद्धयाऽश्रद्धया वापि यः कश्चिन्मानवः स्मरेत् ।
दुर्गं दुर्गशतं तीर्त्वा स याति परमां गतिम् ॥
बन्ध्या वा काकबन्ध्या वा मृतवत्सा च याङ्गना ।
श्रुत्वा स्तोत्रमिदं पुत्रान् लभते चिरजीविनः ॥
यं यं कामयते कामं पठन् स्तोत्रमनुत्तमम् ।
देवीपादप्रसादेन तत्तदाप्नोति निश्चितम् ॥
स्वयम्भूकुसुमैः शुक्रैः सुगन्धिकुसुमान्वितैः ।

जवायावकसिन्दूररक्तचन्दनसंयुतैः ॥
मत्स्यमांसादिभिर्धीरो मधुभिः साज्यपायसैः ।
भक्त्योपनीतैर्मन्त्रेण शोधितैः सह पञ्चमैः ॥
पञ्चोपचारनैवेद्यैर्बलिभिर्बहुशोणितैः ।
धूपदीपैर्महादेवीं पूजयित्वा मनोहरैः ॥
जप्त्वा महामनुस्तोत्रं पठेद् भक्तिसमन्वितः ।
अनन्यचेताः स्थिरधीर्मुक्तकेशो दिगम्बरः ॥
शवारूढश्चितास्थो वा श्मशानालयमागतः ।
शून्यालयगतो वापि शय्यास्थो वा शिवात्मकः ॥
स भवेत् कालिकापुत्र इति ख्याति मुपागतः ।
सर्वविद्यावतां श्रेष्ठो धनेन च धनाधिपः ॥
वायुतुल्यबलो लोके दुर्जयः शत्रुमर्दनः ।
सर्वसङ्कटमुत्तीर्णः सर्वसिद्धिसमन्वितः ॥
मधुमत्या स्वयं देव्या सेव्यमानः स्मरोपमः ।
महेश इव योगीन्द्रः सर्वसत्त्वपुरस्कृतः ॥
कामिनीकामरूपोऽसौ सर्वाकर्षणकारकः ।
जलसूर्येन्दुवायूनां स्तम्भको राजवल्लभः ॥
यशस्वी सत्कविर्धीमान् सन्मन्त्री कोकिलस्वरः ।
बहुपुत्री गजाश्वानामीश्वरो धार्मिकः कृती ॥
मार्कण्डेय इवायुष्मान् जरापलितवर्जितः ।
नवयौवनयुक्तः स्यादपि वर्षसहस्रभाक् ॥
बहु किं कथ्यते तस्य पठतः स्तोत्रमुत्तमम् ।
न किञ्चिद्दुर्लभं लोके यद्यत् मनसि वर्त्तते ॥
ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
सर्वमाशु भवत्येव स्तवस्यास्य प्रसादतः ॥
रजस्वलाभगं पश्यन् जप्त्वा कालीं महामनुम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

स्तवेनानेन संस्तुत्य साधकः किं न साधयेत् ॥
परदारपरो वापि जप्त्वा मन्त्रं पठन् स्तवम् ।
कुबेर इव वित्ताढ्यो जायते साधकोत्तमः ॥
अष्टोत्तरशतं जप्त्वा योनिमामन्त्र्य तत्त्ववित् ।
संगम्य पठनादस्य सर्वविद्येश्वरो भवेत् ॥
दिगम्बरो मुक्तकेशः शय्यास्थो मैथुनी नरः ।
जप्त्वा स्तुत्वा महाकालीं खेचरो जायतेऽचिरात् ॥
शुक्रोत्सारणकाले च जपपूजापरायणः ।
श्मशानकालिकां स्तुत्वा वाणीव सत्कविर्भवेत् ॥
आलोकयन् चिन्तयन् वा विवस्त्रां परयोषिताम् ।
जप्त्वा स्तुत्वा महाकालीं सर्वपापैः प्रमुच्यते ॥
सुरतेषु मनुं जप्त्वा स्तुत्वा भगवतीं शिवाम् ।
सर्वपापैः परित्यक्तो मानवः स्यात् शुकोपमः ॥
कुहूपूर्णेन्दुसंक्रान्तिचतुर्दश्यष्टमीषु च ।
नवम्यां मङ्गलदिने पठेत् स्तोत्रं सुसाधकः ॥
भौमावास्यां निशीथे च चतुष्पथगतो नरः ।
मांसभक्तबलिं दत्त्वा सदग्धमीनशोणितम् ॥
अष्टोत्तरशतं जप्त्वा पठन्नामसहस्रकम् ।
सोऽदर्शनो भवेदाशु देवगन्धर्वसेवितः ॥
येन तेन प्रकारेण कालीस्तुतिपरायणः ।
स्तम्भयेदखिलान् लोकान् राजानमपि मोहयेत् ॥
आकर्षयेद्देवकन्यां वशयेदपि केशवम् ।
मारयेदखिलान् दुष्टानुच्चाटयति शात्रवान् ॥
नरमार्जारमहिषच्छागमूषिकशोणितैः ।
साखिमांसैः समधुभिः सौवीरैः दुग्धपायसैः ॥
योनिलक्षणतो येन भगलिङ्गामृतेन च ।

शुक्रैः पूजाजपान्ते तु कालीं सन्तर्प्य साधकः ॥
सहस्रनामभिर्दिव्यैः स्तौति भक्तिपरायणः ।
मातेव दक्षिणा तस्य सर्वत्र हितकारिणी ॥
परनिन्दापरद्रोहपरदारपराय च ।
खलाय परतन्त्राय भ्रष्टायासाधकाय च ॥
शिवाभक्ताय दुष्टाय दूषकाय दुरात्मने ।
हरिभक्तिविहीनाय परदारपराय च ॥
पूजाजपविहीनाय स्त्रीसुरानिन्दकाय च ।
न स्तवं दर्शयेद्देवि ! सन्दर्श्य शिवहा भवेत् ॥
कुलीनाय महोत्साय दुर्गाभक्तिपराय च ।
वैष्णवाय विशुद्धाय भक्तियुक्ताय मन्त्रिणे ॥
अद्वैतानन्दरूपाय निवेदितरताय च ।
दद्यात् स्तोत्रं महाकाल्याः साधकाय शिवाज्ञया ॥
गुरुविष्णुमहेशानामभेदेन महेश्वरीम् ।
स्वमन्त्रां भावयेत् मन्त्री महेशः स्यान्न संशयः ॥
स शाक्तः शिवभक्तश्च स एव वैष्णवोत्तमः ।
संपूज्य स्तौति यः कालीमद्वैतभावमावहन् ॥
देव्यानन्देन सानन्दो देवीभक्तेन भक्तिमान् ।
स एव धन्यो यस्यार्थे महेशो व्यग्रमानसम् ॥
कामयित्वा यथाकामं स्तवमेन मुदीरयेत् ।
सर्वरोगविनिर्मुक्तो जायते मदनोपमः ॥
चक्रं वा स्तव मेनं वा धारयेदङ्गसङ्गतम् ।
विलिख्य विधिवत् साधुः स एव कालिका तनुः ॥
देव्यै निवेदितं यद्यत् तस्यांशं भक्षयेन्नरः ।
दिव्यदेहधरो भूत्वा देव्याः पार्श्वचरो भवेत् ॥
नैवेद्यनिन्दकं दृष्ट्वा नृत्यन्ति योगिनीगणाः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

रक्तपानोद्यताः सर्वे मांसास्थिचर्वणोद्यताः ॥
तस्मान्निवेदितं देव्यै दृष्ट्वा श्रुत्वा च मानवः ।
न निन्देत् मनसा वाचा सर्वव्याधिपराङ्मुखः ॥
आत्मानं कालिकात्मानं भावयन् स्तौति यः शिवाम् ।
शिवोपमं गुरुं ध्यात्वा स एव श्रीसदाशिवः ॥

यस्यालये तिष्ठति नून मेतत्
स्तोत्रं भवान्या लिखितं विधिज्ञैः ।
गोरोचनालक्तककुङ्कुमाक्त-
सिन्दूरकर्पूरमधुद्रवेण ॥
न तस्य चौरस्य भयं न दस्यो-
र्मनोरथो नाशनिवह्निभीतिः ।
उत्पातवायो रपि नात्र शङ्का
लक्ष्मीः स्वयं तत्र वसेदलोला ।
स्तोत्रं पठन्नेतदनन्तपुण्यं
कालीपदाम्भोजपरो मनुष्यः ।
विधानपूजाफलमेव सम्यक्
प्राप्नोति संपूर्णमनोरथोऽसौ ॥

मुक्ताः श्रीचरणारविन्दविमुखाः स्वर्गामिनो भोगिनो
ब्रह्मोपेन्द्रशिवात्मिकार्चनसुखं लोकेप्सिनो लेभिरे ।
श्रीमत्सद्गुरुभक्तिपूर्वकमहाकालीपदध्यायिनो
भुक्तिर्मुक्ति स्वयं स्तुतिपरा मुक्तिः करस्थायिनी ॥

इति कालिकाकुलसर्वस्वे हररामसंवादे कालिका-
सहस्रनामस्तोत्रं समाप्तम् ।

इति श्यामारहस्ये चतुर्थः परिच्छेदः ।

अथ पञ्चमः परिच्छेदः ।

अथ मन्त्रसिद्ध्यर्थमादौ पुरश्चरणविधिर्लिख्यते ।

तदुक्तं कालीतन्त्रे ।

आदौ पुरश्चिक्रियां कुर्वन् नियमेन यथाविधि ।
लक्षमेकं जपेद्विद्यां हविष्याशी दिवा शुचिः ॥
रात्रौ ताम्बूलपूरास्यः शय्यायां लक्षमानतः ।
ततः सिद्धमनुर्मन्त्री प्रयोगार्हो न चान्यथा ॥
जीवहीनो यथा देही सर्वकर्मसु न क्षमः ।
पुरश्चरणहीनोऽपि तथा मन्त्रप्रदायकः ॥
तस्मादादौ पुरश्चर्यां कुर्यात् साधकसत्तमः ।
नानाचारं न कर्त्तव्यं नोच्चारणमितस्ततः ॥
भूतहिंसा न कर्त्तव्या पशुहिंसा विशेषतः ।
बलिदानं विना देव्या हिंसा सर्वत्र वर्जिता ॥
अन्यमन्त्रपुरस्कारं निन्दाञ्चैव विवर्जयेत् ।
प्रयोगञ्च ततः कुर्यात् सर्वमेव च दुर्लभम् ॥
स्वतन्त्रेऽपि । दिवा लक्षं शुचिर्भूत्वा हविष्याशी जपेन्नरः ।
ततस्तु तद्दशांशेन होमयेद्धविषा प्रिये ! ॥
तीर्थतोयेन पयसा मधुना सर्पिषा दिवा ।
मधुना वासिता मिश्रतोयेन परमेश्वरि ! ॥
देवीञ्चाभिषिञ्चेत्तोयैस्तर्पणञ्च दशांशतः ।
तद्दशांशं हविष्यान्नं भोजयेद्भक्तितः प्रिये ! ॥
कालीमन्त्रविच्च विद्वान् दक्षिणां गुरवे ददेत् ।
पाशवं कथितं कल्पं शृणुष्वैवं ततः प्रिये ! ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

फेत्कारिणीयेऽपि ।

भक्ष्यादिनियमाहारः सकृद्रात्रौ विधीयते ।
दिवा चैव जपं कुर्य्यात् पौरश्चारणिको द्विजः ॥
शाकयावकभक्ष्याशी चरुणा सह सर्पिषा ।
दध्ना मूलफलैर्वापि कुर्य्याद्दर्शनमन्वहम् ॥
ब्रह्मचर्य्यं तथैवोक्तं स्नानं द्विवसनं तथा ।
पूर्वाह्णे देवतायाश्च पूजां कृत्वा विशेषतः ॥
सर्वे मन्त्राः प्रयोक्तव्याः प्रायश्च प्रणवादिकाः ।

वाराहीतन्त्रे च ।

न चात्र सिद्धिमाप्नोति हीने च प्रणवान्तरे ।
ठद्वयान्ते ठद्वयश्च नमोऽन्ते च नमो न च ॥
वाक् चैव कामः शक्तिश्च प्रणवः श्रीश्च कथ्यते ।
तदाद्येषु च मन्त्रेषु प्रणवं नैव योजयेत् ॥
वैष्णवे प्रणवं दद्यात् शैवे शक्तिं नियोजयेत् ।
शक्तौ कामं गणेशे च रमाबीजं न्यसेत् पुरः ॥
सूर्य्ये चैव तदान्येषां तार्त्तीयं विनियोजयेत् ।
प्रणवाद्यं गृहस्थानां तच्छून्यं निष्फलं भवेत् ॥
आद्यन्तयोर्वनस्थानां यतीनां महतामपि ।
अनन्यचेता आसीनो वाग्यतो विहिताशनः ॥
जप्तव्या मूलमन्त्राश्च गुरुवन्दनपूर्वकम् ।

ताराप्रदीपे च ।

कूर्मचक्रमुखं वीक्ष्य चासनं तत्र कल्पयेत् ।
चैनाजिनकुशेष्वेव सुचित्रकम्बलेषु वा ॥
आसनानि प्रकल्प्याथ संविशेत् साधकोत्तमः ।
शरेर्वा कुशदर्भे वा न चर्मणि तथा पुनः ॥
महाशङ्खोपरि स्थित्वा साधयेद्वा प्रयत्नतः ।

अन्यत्रापि । देवतागुरुमन्त्राणामैक्यं सम्भावयन् धिया ॥
जपेदेकमनाः प्रातःकालमध्यन्दिनावधि ।
यावत्संख्यं समारब्धं तत् कर्त्तव्यमवश्यकम् ॥
यदि न्यूनाधिकं कुर्य्याद् व्रतभ्रष्टो भवेन्नरः ।

मुण्डमालायाम् ।

प्रातःकालं समारभ्य जपेन्मध्यन्दिनावधि ।
प्रथमेऽहनि यज्जप्तं तज्जप्तव्यं दिने दिने ॥
न्यूनाधिकं न जप्तव्यं आसमाप्तेः सदा जपेत् ।
संख्यापूर्णो निजद्रव्यैर्जपसंख्यादशांशतः ॥
यथोक्तकुण्डे जुहुयाद् यथाविधि समाहितः ।
अथवा प्रत्यहं जप्त्वा जुहुयात्तद्दशांशतः ।
ततो होमदशांशन्तु जले संपूज्य देवताम् ॥
तर्पणादिकं कार्य्यमित्यादि । कुलसम्भवेऽपि ।
स्नातः शुक्लाम्बरधरः शुचिः प्रयतमानसः ।
दिवा चैवं प्रकर्त्तव्यं सर्वकामार्थसिद्धये ॥

ताराप्रदीपे च ।

विविच्य विधिवद्विद्वान् मण्डलं सुमनोहरम् ।
तस्मिन् कलसमारोप्य क्वाथतोयैः प्रपूरयेत् ॥
निक्षिप्य नवरत्नानि तत्र गन्धाष्टकं पुनः ।
आवाह्य पूजयेत्तत्र देवीमावरणैः सह ॥
कलसाग्रे जपेत् मन्त्रं संख्यया पूरणावधि ।
ततः पूर्णे समागत्य गुरुदेवो विधानतः ॥
अभिषिञ्चेत् शिष्यमूर्ध्नि कलसोदरवारिभिः ।
ततः शिष्यः प्रयत्नेन धनाद्यैस्तोषयेद्गुरुम् ॥
तथैवं विधिना लक्षं प्रजप्य तद्दशांशहोमं तद्दशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्मणभोजनं कारयेत् । तदशक्तौ

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

होमादिसंख्याद्विगुणजपो विप्रेण कार्य्यः। क्षत्रियेण त्रिगुण-
जपः वैश्येन चतुर्गुणजपः। शूद्रेण पञ्चगुणजपः कार्य्यः।
तदुक्तं कुलप्रकाशे

यद्यदङ्गं विहीयेत तत्संख्याद्विगुणं जपम्।
कुर्वीत त्रिचतुःपञ्चसंख्यया साधकोत्तमः॥

अन्यत्रापि। होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः।

इतरेषाञ्च वर्णानां त्रिगुणादिः समीरितः॥
गुरुं सन्तोषयेदेवं मन्त्राः सिध्यन्ति मन्त्रिणः।

मुण्डमालायाञ्च--

होमाद्यशक्तो देवेशि! कुर्य्यात्तु द्विगुणं जपम्।
यदि पूज्याद्यशक्तः स्यात् द्रव्याभावेन सुन्दरि!॥
केवलं जपमात्रेण पुरश्चर्य्या विधीयते॥

अथात्र ब्राह्मणभोजनमवश्यमेव। तदुक्तं कुलप्रकाशे—

एकमङ्गं विहीयेत मन्त्रसिद्धिमवाप्नुयात्।
अन्नैश्चतुर्विधैर्देवि! पदार्थैः षड्रसैरपि॥
सुभोजितेषु विप्रेषु सर्वं हि सफलं भवेत्।
सम्यक्सिद्धैकमन्त्रस्य पञ्चाङ्गोपासनैव हि॥
सर्वे मन्त्राश्च सिध्यन्ति तत् प्रसादात् कुलेश्वरि!।

अन्यत्रापि। सर्वदा भोजयेद्विप्रान् कृतसाङ्गत्वसिद्धये।

विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेत् सदा॥

तन्त्रान्तरेऽपि। कृत्वा मन्त्रजपं मन्त्री पुरस्काराय संयतः।

दशांशं जुहुयादग्नौ यथोक्तविधिना तु यः॥
यद्वा जपचतुर्थांशं स्वाहान्तं मूलमुच्चरन्।
ततो होमदशांशन्तु स्वाहान्तं तर्पयेज्जलैः॥
तर्पणस्य दशांशेन नमोऽन्तं मूलमुच्चरन्।
अभिषिञ्चेत् स्वमूर्द्धानं जलैः कुम्भाख्यमुद्रया॥

फेत्कारिण्यां—स्वाहान्तेनैव मन्त्रेण कुर्य्याद्धोमं बलिं तथा।

मन्त्रान्ते नाम संयोज्य तर्पयामीति तर्पणम्॥

इति पाशवकल्पः। अथ एकवीराकल्पे विशेषो यथा। तदुक्तं कुलचूड़ामणौ।

पुरश्चरणकालेऽपि परयोषां प्रपूज्य च।
दीक्षितां वस्त्रपुष्पाद्यैर्भोज्यैः पायससम्भवैः॥
आरम्भकाले नियतं स्वयं पक्वान्नभोजनम्।
नानाविधं पिष्टकञ्च नानारससमन्वितम्॥
दुग्धं दधि घृतं तक्रं नवनीतं सशर्करम्।
उपलाखण्डचूर्णञ्च नानाविधरसायनम्॥
नारिकेलं कपित्थञ्च नागरङ्गं सुदर्शनम्।
लिम्पाकं बीजपूरञ्च दाड़िमीफलमुत्तमम्॥
नागरङ्गफलञ्चैव नानागन्धविलेपनम्।
चन्दनं मृगनाभिञ्च श्रीखण्डं नवपल्लवम्॥
टङ्कनं लोध्रकञ्चैव जलजं वनजं तथा।
नानाशैलसमुद्भूतं नानालङ्कारभूषितम्॥
शून्यगेहे समानीय अर्घ्योदकविभूषितम्।
अमृतीकरणं कृत्वा शक्तीश्चाभिमुखं नयेत्॥

शक्तिर्यथा। तदुक्तं तत्रैव।

ब्राह्मणी क्षत्रिया वैश्या शूद्रा च कुलभूषणा।
वेश्या नापितकन्या च रजकी योगिनी तथा॥
विशेषवैदग्धयुताः सर्वा एव कुलाङ्गनाः।

अथ दीक्षिताष्टशक्तीः क्रमेण संस्थाप्य पूर्ववद्घटार्घ्य-पात्रादिकं स्थापयित्वा अर्घ्योदकेन तामभ्युक्ष्य अमृतमन्त्रेण धेनु-मुद्रया अमृतीकृत्य अष्टशक्तिरूपभेदं ज्ञात्वा ब्राह्मण्याद्यष्टशक्तीनां संज्ञादिनामकरणं क्रमेण कृत्वा आसनादिकं गन्धपुष्पं दद्यात्।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तदुक्तं तत्रैव। अष्टकन्यारूपभेदं विलोक्यामर्षचेष्टितम्।
ब्राह्मण्याद्यष्टशक्तीनां नामभिः कृतसंज्ञकाः॥
आसनञ्च ततो दत्त्वा स्वागतञ्च पुनः पुनः।
अर्घ्यं पाद्यञ्च पानीयं मधुपर्कं जलं तथा॥
स्नापयेद्गन्धपुष्पाद्यैः केशसंस्कारमाचरेत्।
धूपयित्वा ततः केशान् कौशेयञ्च निवेदयेत्॥
ततः स्नानान्तरे पीठमास्तीर्य्य पादुकाद्वयम्।
दत्त्वा तत्र समासीनां नानालङ्कारभूषणैः॥
भूषयित्वाऽनुलेपञ्च गन्धं माल्यं निवेदयेत्॥

ततस्तां तां शक्तिं पूजाप्रकरणोक्तक्रमेण ध्यात्वा तासां मूर्ध्नि ब्रह्माण्यादिमातृः समावाह्य जीवन्यासादिकं गन्धपुष्पधूपदीपान् नानाद्रव्यानुरञ्जनादिकं दत्त्वा तासां सव्यकर्णे क्रमेण स्तोत्रं पठेत्। तदुक्तं तत्रैव।

तां तां शक्तिं समावाह्य मूर्ध्नि तासां समानयेत्।
भोज्यं मण्डपमध्ये तु स्वर्णपात्रे सुशोभने॥
चर्व्यं चोष्यं लेह्यं पेयं भक्ष्यं भोज्यं निवेदयेत्।
अदीक्षिता या स्त्रास्तत्र ततो मायां निवेदयेत्।
तासां सर्वेषु कर्णेषु ततस्तोत्रं समाचरेत्॥
मातर्देवि! नमस्तेऽस्तु ब्रह्मरूपधरेऽनघे!।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे॥
महेशि! वरदे! देवि! परानन्दस्वरूपिणि!।
कृपया हर विघ्नं मे मन्त्रसिद्धिं प्रयच्छ मे॥
कौमारि! सर्वविद्येशे! कुमारक्रीडने! परे!।
कृपयेत्यादि। विष्णुरूपधरे! देवि! विनतासुतवाहिनि!॥
कृपयेत्यादि। वाराहि! वरदे! देवि! दंष्ट्रोद्धृतवसुन्धरे!।
कृपयेत्यादि। शक्ररूपधरे! देवि! शक्रादिसुरपूजिते!॥

कृपयेत्यादि। चामुण्डे! मुण्डमालासृक्चर्चिते! विघ्ननाशिनि!।
कृपयेत्यादि। महालक्ष्मिर्महामाये! क्षोभसन्तापनाशिनि!॥
कृपयेत्यादि। पितृमातृमये देवि! पितृमातृवहिष्कृते!।
एके! बहुविधे! देवि! दिव्यरूपे! नमोऽस्तु ते॥
एतत् स्तोत्रं पठेद् यस्तु कर्मारम्भेषु संयतः।
बहुविघ्नान् समालोक्य तस्य विघ्नो न जायते॥
कुलीनस्य द्वारदेवाः कथितास्तव पुत्रक!।
दीक्षाकाले नित्यपूजासमये नार्चयेद्यदि॥
तस्य पूजाफलं वत्स! नीयते यक्षराक्षसैः।
आचम्य मुखवासादिताम्बूलञ्च निवेदयेत्॥
ततो दद्यात् पुनर्माल्यं गन्धचन्दनपङ्कितम्।
विसृज्य प्रदक्षिणीकृत्य वरं प्रार्थ्य सुखी भवेत्॥
अन्या यदि न गच्छन्ति निजकन्या निजानुजा।
अग्रजा मातुलानी वा माता वा तत्पत्निका॥
वयसो जातितो वापि हीना वा परमा कला।
पूज्या कुलवरैः सर्वैर्निजाहङ्कारवर्जितैः॥
सर्वाभावे एकतरा पूजनीया प्रयत्नतः।
संस्कृतासंस्कृता वापि सपतिर्निष्पतिश्च या॥
पूर्वाभावे परा पूज्या मदंशयोषितो यतः।
एकश्चेत् कुलशास्त्रज्ञः पूजार्हस्तत्र भैरव!॥
सर्वे सुरादयः पूज्याः सत्यं ब्रह्मशिवादयः।
एका चेत् युवती तत्र पूजिता चावलोकिता॥
सर्वा एव परादेव्यः पूजिताः कुलभैरवः!।
आदावन्ते च मध्ये च लक्षपूर्त्तौ विशेषतः॥
न पूजयति चेत् कान्तां तदा विघ्नैर्विलुप्यते।
पूर्वार्जितफलं नास्ति का कथा परजन्मनि॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तस्मात् सर्वप्रयत्नेन यदीच्छेदात्मनो हितम्।
ममापि क्रोधसन्तापशमनं विघ्ननाशम्॥
यत्नतः पूजनीयाः स्युः कुलाकुलजनाः सुत!।

अथैतेन क्रमेण लक्षजपादौ मध्ये अन्ते च शक्तीः पूजयेत्। ततो रात्रौ प्रथमप्रहरगते पञ्चमेनैव देवीं संपूज्य गुरुं शिरसि हृदि देवीञ्च ध्यात्वा शिवोऽहमिति भावयन् जपं कुर्य्यात् तृतीयप्रहरं यावत्। तदुक्तं मुण्डमालायाम्।

गते तु प्रथमे यामे तृतीयप्रहरावधि।
निशायाञ्च प्रजप्तव्यं रात्रिशेषे जपेन्न हि॥

स्वतन्त्रेऽपि।

रात्रौ मांसासवैर्देवीं पूजयित्वा विधानतः।
ततो नग्नां स्त्रियं नग्नो रमन् क्लेदयुतोऽपि वा॥
जपेल्लक्षं ततो देवि! होमयेत् ज्वलितानले।
योनिकुण्डे स्थिते सर्पिर्मांसमत्स्ययुतं भृशम्॥
दशांशं तर्पयेन्मद्यैर्मांसमिश्रैः सुसाधकः।
तर्पणस्य दशांशन्तु अभिषिच्य जगन्मयीम्॥
दशांशं भोजयेत् साधु साधकं कालिकाप्रियम्।
मद्यं मांसञ्च मत्स्यञ्च चर्वणञ्च प्रदापयेत्॥
ततस्तु तोषयेद्भक्त्या गुरुं स्वर्णादिभिः प्रिये!।
एतत् कल्पद्रयाद्देवि! मन्त्रैः सिध्यति निश्चितम्॥
विना पीत्वा सुरां भुक्त्वा मांसं गत्वा रजस्वलाम्।
यो जपेद्दक्षिणां देवीं तस्य दुःखं पदे पदे॥

कालीतन्त्रेऽपि।

तर्पणस्य विधिं वक्ष्ये येन कार्य्याणि साधयेत्।
तर्पयेच्च पयोभिश्च रक्तधारायुतैस्तथा॥
मज्जाभिश्च तथा तद्वत् स्वकीयेन कचेन च।

आकर्षितायाः कन्यायाः कुलप्रक्षालनेन च॥
मेषमाहिषरक्तेन नररक्तेन चैव हि।
मूषमार्जाररक्तेन तर्पयेत् परदेवताम्॥
एवं तर्पणमात्रेण साक्षात् सिद्धीश्वरो भवेत्।
कविता जायते तस्य द्राक्षारसपरम्परा॥
बृहस्पतिसमो भूत्वा दिविवद्भुवि मोदते।
न तस्य पापपुण्यानि जीवन्मुक्तो भवेद्ध्रुवम्॥

उत्तरतन्त्रेऽपि।

योनिरूपं हि कुण्डं वै कृत्वा वितस्तिमात्रतः।
कृष्णविस्तारितस्तावत् कृत्वा चापि तथाप्यधः॥
तत्र कार्य्या हि मन्त्रेण अग्निस्थापनिका क्रिया।
महाकालाय देवाय दद्याच्च प्रथमाहुतिम्॥
एवमाद्येन मांसेन भक्तेन रुचिरेण च।
कृष्णपुष्पेण साज्येन सरक्तेन विशेषतः॥
आमिषादिभिरप्येवं श्मशाने जुहुयात् सुधीः॥

कुलसम्भवेऽपि।

रात्रौ नग्नो मुक्तकेशो मैथुनेनापि तत्त्वतः।
प्रकर्त्तव्यं प्रयत्नेन सर्वकामार्थसिद्धये॥
द्विजानां चैव सर्वेषां दिवा विधिरिहोच्यते॥
शूद्राणाञ्च तथा प्रोक्तं रात्राविष्टं महाफलम्।
यद्यत् कामयते कामं तत्तदाप्नोति नित्यशः॥
कालिकाश्रुतौ च। अथ हैनां कालिकामनुजापी यः सदा।
श्रद्धाज्ञानवैराग्ययुक्तः शाम्भवदीक्षासु रतः।
शाक्तेषु वा दिवा ब्रह्मचारी रात्रौ नग्नो मैथुनासक्तमानसः।

जपपूजादिनियमो योषित्सु प्रियकरः सुभगोदकेन तर्पणम्। तैरेव पूजनं सर्वदा कालीरूपमात्मानं विभावयेत्। स

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शाक्तो भवति। सर्वहत्यां तरते। अथ पञ्चमसर्वयोषिदाकारेण सर्वमाप्नोति विद्यां पशुं धनं धान्यं सर्वशक्तिञ्च कवित्वञ्च नान्यः परमः पन्था विद्यतेऽतो मोक्षाय ज्ञानाय धर्माय तत्सर्वं भूतं भव्यं यत्किञ्चिद्दृश्यादृश्यमानं स्थावरजङ्गमं तत्सर्वम्। कालिकातन्त्रे तु, तत् प्रोक्तं वैदिकश्रुति मनुजापी स पाप्मानं तरति। स तु अगम्यागमनं तरति। स भ्रूणहत्यां सर्वपापं तरति। सर्वसुखमाप्नोति सर्वं जानाति सर्वन्यासी तरति भवति स विविक्तो भवति सर्ववेदाध्यायी भवति स सर्वजापी भवति स सर्वशास्त्रार्थवेत्ता भवति सर्वयज्ञाधिकारी भवति। अरयो मित्रभूता भवन्ति। इत्याह भगवान् शिवः। निर्विकल्पेन मनसा यः सर्वं करोति अथैवं पुरश्चरणशीलः प्रयोगार्हो भवति। अथादौ शक्तिशुद्धिर्विलिख्यते। अदीक्षिताङ्गनासङ्गात् निन्दाश्रुतेः। तदुक्तं भावचूडामणौ—

अदीक्षिताङ्गनासङ्गात् सिद्धिहानिः प्रजायते।
तत्कथाश्रवणे श्रद्धा तत्तल्पागमनं यदि।
स कुलीनः कथं देवीं पूजयेत् परमेश्वरीम्॥

श्रीक्रमेऽपि।

संशोधनमनाचर्य्य स्त्रीषु मर्त्यासु साधकः।
कृतेऽपि सिद्धिहानिः स्यात् क्रुद्धा भवति चण्डिका॥

तस्मात् शक्तिशुद्धिः कार्य्या। तदुक्तं कौलतन्त्रे।

अभिषेकाद् भावशुद्धिर्मन्त्रस्योच्चारणात् शुचिः।
रतिकाले महेशानि! दीक्षादानेन कन्यका॥
सुरया रेतसा वापि जलेन मनुनाथवा॥
सम्भोगेऽभिषिञ्चेन्नारीं रण्डां वा मन्त्रवर्जिताम्।
आदौ वालां समुच्चार्य्य त्रिपुराञ्च समुच्चरेत्॥
नमः शब्दं समुच्चार्य्य इमां कान्तां ततो वदेत्।

पवित्रीकुरु शब्दान्ते मम शक्तिं कुरु प्रिये!॥
वह्निजायां समुच्चार्य्य शुद्धिमन्त्रं सुरेश्वरि!।
अनेन मनुना देवि! अभिषिक्ताः स्त्रियः सदा।
रममाणो भवेन्नित्यं सर्वसिद्धिमवाप्नुयात्॥
इह लोके परं भोगं भुक्त्वा सिद्धिमवाप्नुयात्॥

अन्यत्रापि। आनीय कन्यकां दिव्यां घृणालज्जाविवर्जिताम्।
स्वकान्तां परकान्तां वा दीक्षितां यौवनान्विताम्॥
पूजकः पूजयेन्नित्यं वामपार्श्वे निवेश्य च।
स्वीयकल्पोक्तविधिना न्यासजालं प्रविन्यसेत्॥
ततो जपेत् स्त्रियं गच्छन् देवीं त्रिभुवनेश्वरीम्।

शक्तौ विशेषो यथा कुमारीतन्त्रे।

नटी कपालिनी वेश्या रजको नापिताङ्गना॥
ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका।
मालाकारस्य कन्यापि नवकन्याः प्रकीर्त्तिताः॥
एतासु काञ्चिदानीय ततस्तद्योनिमण्डले।
पूजयित्वा महादेवीं ततो मैथुनमारभेत्॥
धर्माधर्महविर्दीप्ते आत्माग्नौ मनसा सुचा।
सुषुम्नावर्त्मना नित्यमचक्रवृत्तौ जुहोम्यहम्॥
स्वाहान्तोऽयं महामन्त्र आरम्भे परिकीर्त्तितः।
ततो जपेत् स्त्रियं गच्छन् देवीं त्रिभुवनेश्वरीम्॥
प्रकाशाकाशहस्ताभ्यामवलम्ब्य महीसुचम्।
धर्माधर्मकलास्नेहपूर्णमग्नौ जुहोम्यहम्॥
स्वाहान्तोऽयं महामन्त्रः शुक्रत्यागे प्रकीर्त्तितः।

अथास्य प्रयोगः। निशायां शक्तिं पूर्वोक्तां स्ववामभागे समानीय तस्या गात्रे स्वकल्पोक्तन्यासान् विधाय, अदीक्षिता चेत्तदा पूर्वोक्ताभिषेकमन्त्रेण तीर्थादिना अभिषेकं कृत्वा तस्याः

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कर्णे अभेदबुद्ध्या मन्त्रमुच्चारयेदिति शक्तिशुद्धिः। ततो मकार-पञ्चमेन देवीं संपूज्य मूलान्ते धर्माधर्मेत्यादि पठन् मातृपीठे पिष्टमुखं दत्त्वा जपं कुर्य्यात्। ततो मूलान्ते प्रकाशाकाशे-त्यादि पठन् तत्त्वमुत्सृजेत्। अथवा मातृपीठे पिष्टमुखं दत्त्वा जपं कुर्य्यात्। सावरणां देवीं ध्यात्वा शिवोऽहमिति भावयन् उभयोः सङ्गमं कृत्वा पूर्ववज्जपादिकं कुर्य्यादित्यपर-प्रकारः।

इति श्यामारहस्ये पञ्चमः परिच्छेदः।

अथ षष्ठः परिच्छेदः।

अथ मन्त्रभेदाः निरूप्यन्ते। तदुक्तं सिद्धेश्वरतन्त्रे।

अथ वक्ष्यामि ते देवीं कालिकां भवदुःखहाम्।
यां ज्ञात्वा साधको भोगान् भुक्त्वा मोक्षमवाप्नुयात्॥
मूकोऽपि कवितामेति धनेन च धनाधिपः।
बलेन पवनः साक्षात् रूपेण च मनोहरः॥
मन्त्रोद्धारं शृणुष्वेमं गुह्याद् गुह्यतरं प्रिये!।
खान्तादिवह्निमारूढं वामनेत्रेण संयुतम्॥
चन्द्रार्द्धविन्दुना मूर्ध्नि भूषितं परमेश्वरि!।
खान्तादि वामनेत्रस्थं वह्निचन्द्रसमन्वितम्॥
बीजरत्नमिदं प्रोक्तं साक्षात् कल्पद्रुमं प्रिये!।
मादनं चन्द्रबीजस्थं भूतस्वरसमन्वितम्॥
चन्द्रार्द्धविन्दुभूषाढ्यं सम्पूर्णं सिद्धिदं मनुम्।
अस्यैवाशेषमाहात्म्यं वक्तुं नाहं महेश्वरि!॥
तथापि कथ्यते देवि! संक्षेपादस्य यत्फलम्।

मोक्षार्थी लभते मोक्षं कैवल्यं परमं पदम्॥
देवीरूपं जगत् पश्येत् द्वैधं तत्त्वं विवर्जयेत्॥

अथ मन्त्रान्तरं तत्रैव तदुक्तम्।

मन्त्रान्तरं प्रवक्ष्यामि शृणु पार्वति! सादरम्।
यस्याराधनमात्रेण सर्वसिद्धीश्वरो भवेत्॥
अप्रकाश्यं परं गुह्यं न देयं यस्य कस्यचित्।
न कुत्रापि समाख्यातं तव स्नेहादिहोच्यते॥
पूर्वोक्तमन्त्रराजस्य शेषवर्णद्वयं प्रिये!।
संहारसृष्टिमार्गेण बन्धुभ्योऽपि न दर्शयेत्॥
मन्त्रस्य स्मरणादेव सकृदप्यस्य सुन्दरि!।
कोटिजन्मार्जितं पापं तत्क्षणादेव नश्यति॥
न कुत्रापि समाख्यातं तव स्नेहादिहोच्यते।
पूर्वोक्तमन्त्रराजस्य शेषवर्णद्वयं प्रिये!॥
संहारसृष्टिमात्रेण मूकः काव्यं करोति च।
तस्य दर्शनमात्रेण वादिनो मूकसंकुलाः॥
द्वन्द्वभावं परित्यज्य किमन्यद्बहुजल्पितैः।
यद्यत् प्रार्थयते चित्ते तत्तदाप्नोति नित्यशः॥
ऋषिः स्याद्भैरवो देवोऽनुष्टुप्छन्दः प्रकीर्त्तितम्।
देवता कालिका प्रोक्ता चतुर्वर्गफलप्रदा॥
ध्यानमस्याः प्रवक्ष्यामि शृणु पार्वति! सादरम्॥
नीलेन्दीवरसन्निभां त्रिनयनामापीनतुङ्गस्तनीम्
भास्वन्मौलिकिरीटभोगिलसनां वीणां भुजैर्बिभ्रतीम्।
खड्गं मुण्डवराभयां स्मितमुखीं मोहान्धकारापहाम्
ध्यायेत् सम्यगनाकुलेन मनसा प्रेतासनां कालिकाम्॥
एवं ध्यानपरो देवि! सर्वान् कामानवाप्नुयात्।
उक्तपीठे महेशानि! ततः पूजां समाचरेत्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

रात्रौ द्वितीययामे च अशक्तौ दिवसेऽपि च ।
हेमादिपात्रमादाय कुर्यान्मन्त्रं विचक्षणः ॥
अष्टपत्रं लिखेत् पद्मं चतुर्द्वारसुशोभितम् ।
तन्मध्ये त्रिस्त्रिकोणं स्यात्तन्मध्ये विलिखेन्मनुम् ॥

अथ दक्षिणावत् प्रातःकृत्यादि व्यापकन्यासं समाचरेत् । तत्र विशेषो यथा तत्रैवोक्तम् ।

आचान्तो मूलमन्त्रेण शिखां बद्ध्वा तु मन्त्रतः ।
स्वाहान्तं मूलमुच्चार्य्य सर्ववश्यकरीति च ॥
मनुमानेन देवेशि ! शिखाबन्धनमाचरेत् ।
तत उक्त्वा मूलमन्त्रं सर्वशुद्धिं समानय ॥
अनेन मनुना देवि ! स्थानशुद्धिं समाचरेत् ।
षड्दीर्घयुक्तेनाद्येन षड्ङ्गानि न्यसेद्बुधः ॥

ततो यन्त्रं निधाय दक्षिणावत् पीठपूजां कुर्यात् किन्तु पीठाशक्तौ विशेषः । तदुक्तं तत्रैव ।

ब्रह्माणीं मङ्गलां दुर्गां जयन्तीं विजयां जयाम् ॥
वाराहीं भुवनेशीञ्च प्रागादिषु च दिक्षु च ।
संपूज्य गन्धपुष्पैस्तु देवीं ध्यायेत् समाहितः ॥
गन्धाद्यैरर्चयेन्मन्त्री आत्मानं देवतामयम् ।
श्वासमार्गक्रमेणैव यन्त्रमध्ये तु साधकः ॥
समानीय ततो देवीं तत्रावाह्य च मुद्रया ।
प्राणप्रतिष्ठां कृत्वा तु पाद्यादिभिस्तथार्चयेत् ॥
अनुलेपं प्रयत्नेन दद्याद्गन्धादिभिर्युतम् ।
नानाविधञ्च नैवेद्यं पायसं शर्करायुतम् ॥
दद्यात् प्रयत्नतो मन्त्री बलिञ्चैव विधानतः ।
षड्ङ्गानि प्रपूज्याथ तथैवावरणं यजेत् ॥
त्रिकोणे पूजयेद्देवीं कामाख्यां भद्रकालिकाम् ।

त्रिपुराञ्च समभ्यर्च्य वामावर्त्तक्रमेण तु ॥
उग्रचण्डां प्रचण्डाञ्च भैरवीञ्चापरे त्रिके ।
माहेश्वरीं महादुर्गां वैष्णवीञ्चापरे त्रिके ॥
ततोऽष्टदलपत्रे तु ब्राह्म्याद्याः पूजयेत् क्रमात् ।
पद्माद्बहिः समभ्यर्च्य भैरवाष्टकमेव च ॥
तद्बहिश्चापि देवेशि ! दिक्पालांस्तु समर्चयेत् ।
स्वाहान्तेनैव मूलेन देवीं सावरणां ततः ॥
पद्माद्यैरर्चयित्वा तु यथाशक्ति जपं चरेत् ।
एवं पूजापरो देवि ! साधको विजितेन्द्रियः ॥

एवं क्रमेण लक्षं प्रजप्य तद्दशांशं होमादिकं कुर्यात् । तत् प्रमाणमेकाक्षर्य्याः कल्पेऽपि लिखितमेव । तत्तु अग्रे लिखिष्यामः । अथान्यः प्रकारः । तदुक्तं कालिकाश्रुतौ । अथ वा विद्यां प्रथममेकं द्वयं त्रयं वा नामत्रयपुटितं वा कृत्वा जपेत् । गतिस्तस्यास्तीति नान्यस्य इह गतिः । ओं सत्यं सत् ।

अथ हैनं गुरुं परितोष्य गोभूहिरण्यादिभिर्गृह्णीयात् वराजम् । गुरुः शिष्याय सत्कुलीनाय विद्याभक्ताय शुश्रूषान्वं दत्त्वा स्वयं परिपूज्य निशायां विहरेत् । एकाकी वगेहे लक्षं तदर्द्धं वा जप्त्वा मन्त्रं दद्यात् । ओं तत् सत् । ं नान्यप्रकारेण सिद्धिर्भवतीह कालिकामनोर्वा भावनेति र्वा मनोर्वा सर्वस्य दुर्गामनोर्वा स्वयं शिवोपरि । ओं तत् इति सर्वाविद्यामिति पूर्वोक्तद्वाविंशत्यक्षर्य्याः प्रथमबीजं बीजद्वयं वा बीजत्रयं वा केवलनाम वा बीजत्रयपुटितं नाम जपेदित्यर्थः ।

कालीहृदयविद्याञ्च सिद्धविद्यां महोदयाम् ।
पुरा येन यथा जप्त्वा सिद्धिमापुर्दिवौकसः ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कामाक्षरं वह्निसंस्थमिन्दिरानादविन्दुभिः ।
मन्त्रराजमिदं ख्यातं दुर्लभं पापचेतसाम् ॥
सुलभं पुण्यचित्तानां साधकानां महात्मनाम् ।
त्रिगुणा तु विशेषेण सर्वशास्त्रे प्रबोधिका ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशी पूजा न हि सारस्वतप्रदा ॥
आकर्षण-वशीकारमारणोच्चाटनं तथा ।
शान्तिपुष्ट्यादिकर्माणि साधयेदनयाचिरात् ॥
किं वक्तव्यमजेनापि वर्णितुं नैव शक्यते ।
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥
ध्यानपूजादिकं सर्वं ससाधनपुरष्क्रियाम् ।
अनिरुद्धसरस्वत्याः समानां समुदीरयेत् ॥

अथ कुलचूडामणौ ।

ब्रह्मा सरस्वती गुप्तो देवतासुखसंयुता ।
वीजव्यक्तिसमाकीर्णः कालीमन्त्र उदाहृतः ॥
एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव ! ।
जप्त्वा कर्षयति स्वैरं स्थावरं जङ्गमादिकम् ॥
एषा गुह्या महाकाली गुह्याद् गुह्यतरा स्मृता ।

सिद्धेश्वरतन्त्रे च ।

शृणु देवि ! प्रवक्ष्यामि एकाक्षरमनुं प्रिये ! ।
यस्य विज्ञानमात्रेण जीवन्मुक्तश्च साधकः ॥
गुह्याद् गुह्यतरं मन्त्रं न देयं प्राणसंशये ।
खान्तं हि वह्निमारूढं सव्येतरदृगन्वितम् ।
चन्द्रबिन्दुसमायुक्तं परं गुह्यं महेश्वरि ! ॥

त्रिपुराञ्च समभ्यर्च्य वामावर्त्तक्रमेण तु ॥
उग्रचण्डां प्रचण्डाञ्च भैरवीञ्चापरे त्रिके ।
माहेश्वरीं महादुर्गां वैष्णवीञ्चापरे त्रिके ॥
ततोऽष्टदलपत्रे तु ब्राह्म्याद्याः पूजयेत् क्रमात् ।
पद्माद्बहिः समभ्यर्च्य भैरवाष्टकमेव च ॥
तद्बहिश्चापि देवेशि ! दिक्पालांस्तु समर्चयेत् ।
स्वाहान्तेनैव मूलेन देवीं सावरणां ततः ॥
पद्माद्यैरर्चयित्वा तु यथाशक्ति जपं चरेत् ।
एवं पूजापरो देवि ! साधको विजितेन्द्रियः ॥

एवं क्रमेण लक्षं प्रजप्य तद्दशांशं होमादिकं कुर्य्यात् । तत् प्रमाणमेकाक्षर्याः कल्पेऽपि लिखितमेव । तत्तु अग्रे लिखिष्यामः । अथान्यः प्रकारः । तदुक्तं कालिकाश्रुतौ । अथ वीं विद्यां प्रथममेकं द्वयं त्रयं वा नामत्रयपुटितं वा कृत्वा जपेत् । गतिस्तस्यास्तीति नान्यस्य इह गतिः । ओं सत्यं सत् ।

अथ चैनं गुरुं परितोष्य गोभूहिरण्यादिभिर्गृह्णीयात् मन्त्रराजम् । गुरुः शिष्याय सत्कुलीनाय विद्याभक्ताय शुश्रूषान्वं दत्त्वा स्वयं परिपूज्य निशायां विहरेत् । एकाकी गृहे लक्षं तदर्द्धं वा जप्त्वा मन्त्रं दद्यात् । ओं तत् सत् । एवं नान्यप्रकारेण सिद्धिर्भवतीह कालिकामनोर्वा भावनेति पूर्वा मनोर्वा सर्वस्य दुर्गामनोर्वा स्वयं शिवोपरि । ओं तत् सत् इति सर्वाविद्यामिति पूर्वोक्तद्वाविंशत्यक्षर्याः प्रथमबीजं बीजद्वयं वा बीजत्रयं वा केवलनाम वा बीजत्रयपुटितं नाम जपेदित्यर्थः ।

कालीहृदयविद्याञ्च सिद्धविद्यां महोदयाम् ।
पुरा येन यथा जप्त्वा सिद्धिमापुर्दिवौकसः ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कामाक्षरं वह्निसंस्थमिन्दिरानादविन्दुभिः ।
मन्त्रराजमिदं ख्यातं दुर्लभं पापचेतसाम् ॥
सुलभं पुण्यचित्तानां साधकानां महात्मनाम् ।
त्रिगुणा तु विशेषेण सर्वशास्त्रे प्रबोधिका ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशी पूजा न हि सारस्वतप्रदा ॥
आकर्षण-वशीकारमारणोच्चाटनं तथा ।
शान्तिपुष्ट्यादिकर्माणि साधयेदनयाचिरात् ॥
किं वक्तव्यमजेनापि वर्णितुं नैव शक्यते ।
जिह्वाकोटिसहस्रैस्तु वक्त्रकोटिशतैरपि ॥
अनया सदृशी विद्या अनया सदृशो जपः ।
अनया सदृशं ज्ञानं न भूतं न भविष्यति ॥
ध्यानपूजादिकं सर्वं ससाधनपुरष्क्रियाम् ।
अनिरुद्धसरस्वत्याः समानां समुदीरयेत् ॥

अथ कुलचूड़ामणौ ।

ब्रह्मा सरस्वती गुप्तो देवतासुखसंयुता ।
बीजव्यक्तिसमाकीर्णः कालीमन्त्र उदाहृतः ॥
एकं वा द्विगुणं वापि त्रिगुणं वापि भैरव ! ।
जप्त्वा कर्षयति स्वैरं स्थावरं जङ्गमादिकम् ॥
एषा गुह्या महाकाली गुह्याद् गुह्यतरा स्मृता ।

सिद्धेश्वरतन्त्रे च ।

शृणु देवि ! प्रवक्ष्यामि एकाक्षरमनुं प्रिये ! ।
यस्य विज्ञानमात्रेण जीवन्मुक्तश्च साधकः ॥
गुह्याद् गुह्यतरं मन्त्रं न देयं प्राणसंशये ।
खान्तं हि वह्निमारूढं सव्येतरदृगन्वितम् ।
चन्द्रबिन्दुसमायुक्तं परं गुह्यं महेश्वरि ! ॥

ये जपन्ति परां देवीं नियमेन च संस्थिताः ॥
देवास्तांस्तु नमस्यन्ति किं पुनर्मानवादयः ।
बृहस्पतिसमो वाग्मी धनैर्धनपतिर्भवेत् ॥
कामतुल्यश्च नारीणां रिपूणां स यमोपमः ।
तस्य पादाम्बुजद्वन्द्वं राज्ञां किरीटभूषणम् ।
तस्य भूतिं विलोक्यैव कुबेरोऽपि तिरस्कृतः ॥
य एनां चिन्तयेद्देवीं नियतः पिटकानने ।
तस्य चाज्ञाकराः सर्वे सिद्धयोऽष्टौ भवन्ति हि ॥
तस्यैव जननी धन्या पिता तस्य सुरोपमः ।
संप्रदाये च वक्ता स य एनां वेत्ति तत्त्वतः ॥
अस्य विज्ञानमात्रेण कुलकोटीः समुद्धरेत् ।
नन्दन्ति पितरः सर्वे गाथां गायन्ति ते मुदा ॥
अपि नः स कुले कश्चित् कुलज्ञानी भविष्यति ।
स धन्यः स च विज्ञानी स कविः स च पण्डितः ॥
स कुलीनः स च कृती स वशी स च साधकः ।
स ब्राह्मणः स वेदज्ञः सोऽग्निहोत्री स दीक्षितः ॥
स तीर्थसेवी पीठानां स निवासी स सर्वदः ।
स सोमपायी स व्रती स यज्वा स परन्तपः ॥
स सन्न्यासी स योगी च स मुक्तो ब्रह्मविच्च सः ।
स वैष्णवः स शैवश्च स सौरः स च गाणपः ॥
स च विज्ञानवेत्ता च य एनां वेत्ति तत्त्वतः ।
तस्मात् सर्वप्रयत्नेन सर्वावस्थासु सर्वदा ॥
एनां ध्यात्वा जपेन्मन्त्री सुखमोक्षमवाप्नुयात् ॥
विद्यारत्नं प्रवक्ष्यामि श्रुत्वा कर्णावतंसवत् ।
मायाद्वन्द्वं कूर्चयुग्मं मैत्रान्तं मादनत्रयम् ॥
मायाबिन्दीश्वरयुतं दक्षिणे कालिके पदम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

संहारक्रमयोगेन वीजसप्तकमुद्धरेत् ॥
एकविंशत्यक्षराढ्यस्तारादयः कालिकामनुः ।
पूर्वोक्तमन्त्रराजस्य कुर्य्यात् पूजां विचक्षणः ॥
भैरवतन्त्रेऽपि । मायाद्वयं कूर्चयुग्मं मैत्रान्तं मादनत्रयम् ।
मायावह्नीश्वरयुतं दक्षिणे कालिके पदम् ॥
संहारक्रमयोगेन वीजसप्तकमुद्धरेत् ।
एकविंशत्यक्षराढ्यस्तारादयो विश्वपूजितः ॥
आकाशं वामकर्णेन युतं विन्दुविभूषितम् ।
चतुर्थवीजमाख्यातं त्रैलोक्यवशकारणम् ॥
स्वाहान्तश्च त्रयोविंशत्यक्षरो मन्त्रराजकः ।
विंशत्यर्णा महाविद्या स्वाहा प्राणविवर्जिता ॥
ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरेत् ॥

सिद्धसारस्वततन्त्रेऽपि ।

शृणु देवि ! प्रवक्ष्यामि कालिकामन्त्रमुत्तमम् ।
मायाद्वयं कूर्चयुग्मं मैत्रान्तं मादनत्रयम् ॥
मायाविन्द्वीश्वरयुतं दक्षिणे कालिके पदम् ।
संहारक्रमयोगेन वीजसप्तममुद्धरेत् ॥
द्वाविंशत्यक्षरी विद्या वह्निजायान्विता शुभा ।
कालिकाया महाविद्या सिद्धिदा भुवनत्रये ॥
मायावीजैः षड्ङ्गानि महादेव्याः प्रकल्पयेत् ।
भैरवो हि ऋषिश्छन्दोऽनुष्टुप् काली च देवता ॥

अथ अन्यप्रकारम् । तदुक्तं कालीतन्त्रे ।

अथ वक्ष्ये महाविद्यां सिद्धविद्यां महोदयाम् ।
ईश्वरेण पुरा प्रोक्तां देवीहृदयसंस्थिताम् ॥
अस्या ज्ञानप्रभावेण कलयामि जगत्त्रयम् ।
प्रणवं पूर्वमुच्चार्य्य हृल्लेखावीजमुद्धरेत् ॥

रतिवीजं समुद्धृत्य प्रपञ्चमभगान्वितम् ।
ठद्वयेन समायुक्ता विद्याराज्ञी प्रकीर्त्तिता ॥
अनया सदृशी विद्या कालीतन्त्रे सुगोपिता ।
वीजञ्च वीजमस्याश्च हृल्लेखा शक्तिरुच्यते ॥
षड्दीर्घमायावीजेन प्रणवाद्येन कल्पयेत् ।
अष्टाङ्गकं ततोन्यस्य ध्यात्वा देवीं शिवो भवेत् ॥
खड्गोद्भिन्नेन्दुविम्बस्रवदमृतरसप्लाविताङ्गी त्रिनेत्रा
सव्ये पाणौ कपालाङ्गलदसृजमथो मुक्तकेशी पिबन्ती ।
दिग्वस्त्रा वद्धकाञ्ची मणिमयमुकुटाद्यैः संयुता दीप्तजिह्वा
पायान्नीलोत्पलाभा रविशशिविलसत्कुण्डला लीढ़पादा ॥
जपेद्विंशतिसाहस्रं सहस्रैकेण संयुतम् ।
होमयेत्तद्दशांशेन मृदुपुष्पेण मन्त्रवित् ॥
त्रिकोणं कुण्डमासाद्य सिद्धविद्यः शिवो भवेत् ।
पूजनञ्च प्रयोगञ्च दक्षिणावदुपाचरेत् ॥
एकाक्षर्य्या महाकल्पसमानं सर्वमेव वा ।
रक्तपद्मस्य होमेन साक्षाद्वैश्रवणो भवेत् ॥
विल्वपत्रस्य होमेन राज्यं भवति निश्चितम् ।
रक्तप्रसूनहोमेन वशयेदखिलं जगत् ॥
पीतपुष्पस्य होमेन स्तम्भयेत् विश्वमप्यथ ।
मालतीपुष्पहोमेन साक्षाद्वाक्पतिसन्निभः ॥
कृष्णपुष्पस्य होमेन शत्रून् मारयतेऽचिरात् ।
अत्र सर्वस्य होमेन संख्या स्यादयुतं किल ॥
अस्याः स्मरणमात्रेण महापातककोटयः ।
सद्यः प्रलयमायान्ति साधकः खेचरो भवेत् ॥

अथ कालिकामन्त्रान्तरं तदुक्तं स्वतन्त्रे ।

श्मशानकालिकामन्त्रं शृणुष्वावहिता शिवे ! ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वाणीं मायां ततो लक्ष्मीं कामवीजं ततःपरम् ॥
कालिका संपुटत्वेन चतुष्कं वीजमालिखेत् ।
एकादशार्णा देवेशि ! चतुर्वर्गप्रदायिनी ॥
ऋषिर्भैरुर्वृहच्छन्दो देवता कालिका परा ।
श्मशानाद्या च यां माये वीजशक्ती महेश्वरि । ॥
कीलकं कामवीजन्तु शृणु पूजाविधिं प्रिये ! ।
चतुर्द्विस्त्रिश्चतुर्वर्णैर्विद्यामन्त्रं षड्ङ्गकम् ॥
विन्यस्य ध्यानं कुर्वीत कालिकायाः समाहितः ।
अञ्जनाद्रिनिभां देवीं श्मशानालयवासिनीम् ॥
त्रिनेत्रां मुक्तकेशीञ्च शुष्कमांसातिभीषणाम् ।
पिङ्गाक्षीं वामहस्तेन मद्यपूर्णकपालकम् ॥
सद्यः कृत्तशिरो दक्षहस्तेन दधतीं शिवाम् ।
स्मितवक्त्रां सदा चाममांसचर्वणतत्पराम् ॥
नानालङ्कारभूषाङ्गीं नृत्योन्मत्तां सदासवैः ।
एवं ध्यात्वा जपेद्देवीं श्मशाने तु विशेषतः ॥
गृहे वापि गृहस्थश्च मत्स्यैर्मांसैः सुशोभनैः ।
नग्नो भूत्वा महापूजां कुर्य्याद्रात्रौ विशेषतः ॥
पद्मं चाष्टदलं वृत्तं तद्बाह्ये धरणीतलम् ।
चतुर्द्वारसमायुक्तं मध्ये मूलं समालिखेत् ॥
दलेष्वष्टासु विलिखेत् कवर्गाद्यष्टवर्गकम् ।
धरण्यां विलिखेदाद्यं चतुष्कञ्च चतुष्ककम् ॥
पूर्वादि चोत्तरान्ताशां मध्ये देवीं प्रपूजयेत् ।
ब्राह्म्याद्याः पूजयेन्मातृदलेष्वष्टासु पूर्ववत् ।
भैरवानसिताङ्गाद्यान् धरण्यां पूजयेत् प्रिये ! ॥
अथ पुरश्चरणनियमो यथा—। तदुक्तं स्वतन्त्रे ।
वर्णलक्षं जपेन्मन्त्रं तद्दशांशेन होमयेत् ।

कन्दर्पसदृशः श्रीमान् येन देवी समर्चिता ॥
सर्वभाग्ययुतो लोके कुलज्ञानी भविष्यति ।
तेषां मध्येऽपि यः कोऽपि कालीसाधनतत्परः ॥
त्यजसि त्वं न कदाचित् पुमांसं परमं प्रियम् ।
मादृशन्तु क्वचित् काले त्यजसि त्वं शुचिस्मिते ! ॥
किन्तु कालीज्ञानिनञ्च त्यक्ष्यसि न कदाचन ।
न हि कालीसमा पूजा न हि कालीसमं फलम् ॥
न हि कालीसमं ज्ञानं न हि कालीसमं तपः ।
ये गुणाः परमेशस्य पञ्चकृत्यविधायिनः ॥
ते गुणाः सन्ति सर्वेऽपि कालीतत्त्वस्य ज्ञानिनः ।
कालिकाहृदयज्ञानी कालीसाधनतत्परः ॥
देववत् मानुषो भूत्वा लभेत् मुक्तिं चतुर्विधाम् ।
इति ते कथितं सम्यक् कालिकातत्त्वमुत्तमम् ॥
अनेन सम्यगास्थाय सर्वकामफलं लभेत् ॥
इति श्यामारहस्ये विद्यामाहात्म्यकथनं नाम
सप्तमः परिच्छेदः ।

अथ अष्टमः परिच्छेदः ।

अथ आचारक्रमो लिख्यते तदुक्तं कालीतन्त्रे ।
ईश्वर उवाच ।
अथाचारं प्रवक्ष्यामि यत्कृतेऽमृतमश्नुते ।
सर्वभूतहिते युक्तः समयाचारपारगः ॥
अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः ।
परायां देवतायाञ्च सर्वकर्मनिवेदकः ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अन्यमन्त्रार्चनश्रद्धा मन्यमन्त्रप्रपूजनम् ।
कुलस्त्रीवीरनिन्दाञ्च तथा वेश्योपसङ्गमम् ॥
स्त्रीषु रोषं प्रहारञ्च वर्जयेत् मतिमान् सदा ।
स्त्रीमयञ्च जगत् सर्वं चिन्तयेत् साधकोत्तमः ॥
स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियः ।
जपस्थाने महाशङ्खं निवेश्योर्द्ध्वं जपं चरेत् ॥
स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात् कुलजां शुभाम् ॥
भक्ष्यं स्ताम्बूलमद्यांश्च भक्ष्यद्रव्यान् यथारुचीन् ।
मांसमत्स्यदधिक्षीद्रपयःशाकाद्यमैक्षवम् ॥
भक्ताद्यशेषभक्ष्याणि दत्त्वा तत्र जपं चरेत् ।
दिक्कालनियमो नास्ति स्थित्यादिनियमस्तथा ॥
न जपे कालनियमो नार्चादिषु वलिष्वपि ।
स्वेच्छानियम उक्तो हि महामन्त्रस्य साधने ॥
वस्त्रासनस्थानदेह स्पर्शादिगेहबाधनात् ।
नास्त्यशुद्धिरिह क्वापि निर्विकल्पं मनश्चरेत् ॥
सुगन्धिश्वेतलौहित्यकुसुमैरर्चयेत् ततः ।
वन्यैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ॥
पेयं चर्व्यं तथा चोष्यं भक्ष्यं भोगं गृहं सुखम् ।
सर्वञ्च युवतीरूपं भावयेद् यतमानसः ॥
कुलजां युवतीं वीक्ष्य नमस्कुर्य्यात् समाहितः ।
यदि भाग्यवशेनैव कुलदृष्टिस्तु जायते ॥
तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत् ।
वालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा ॥
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् ।
तासां प्रहारं निन्दाञ्च कौटिल्यमप्रियं तथा ॥
सर्वथा न च कर्त्तव्यमन्यथा सिद्धिरोधकृत् ।

कन्दर्पसदृशः श्रीमान् येन देवी समर्चिता ॥
सर्वभाग्ययुतो लोके कुलज्ञानी भविष्यति ।
तेषां मध्येऽपि यः कोऽपि कालीसाधनतत्परः ॥
त्यजसि त्वं न कदाचित् पुमांसं परमं प्रियम् ।
मादृशन्तु क्वचित् काले त्यजसि त्वं शुचिस्मिते ! ॥
किन्तु कालीज्ञानिनञ्च त्यक्ष्यसि न कदाचन ।
न हि कालीसमा पूजा न हि कालीसमं फलम् ॥
न हि कालीसमं ज्ञानं न हि कालीसमं तपः ।
ये गुणाः परमेशस्य पञ्चकृत्यविधायिनः ॥
ते गुणाः सन्ति सर्वेऽपि कालीतत्त्वस्य ज्ञानिनः ।
कालिकाहृदयज्ञानी कालीसाधनतत्परः ॥
देववत् मानुषो भूत्वा लभेत् मुक्तिं चतुर्विधाम् ।
इति ते कथितं सम्यक् कालिकातत्त्वमुत्तमम् ॥
अनेन सम्यगास्थाय सर्वकामफलं लभेत् ॥

इति श्यामारहस्ये विद्यामाहात्म्यकथनं नाम
सप्तमः परिच्छेदः ।

अथ अष्टमः परिच्छेदः ।

अथ आचारक्रमो लिख्यते तदुक्तं कालीतन्त्रे ।

ईश्वर उवाच ।

अथाचारं प्रवक्ष्यामि यत्कृतेऽमृतमश्नुते ।
सर्वभूतहिते युक्तः समयाचारपारगः ॥
अनित्यकर्मसंत्यागी नित्यानुष्ठानतत्परः ।
परायां देवतायाञ्च सर्वकर्मनिवेदकः ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अन्यमन्त्रार्चनश्रद्धा मन्यमन्त्रप्रपूजनम् ।
कुलस्त्रीवीरनिन्दाञ्च तथा वेश्योपसङ्गमम् ॥
स्त्रीषु रोषं प्रहारञ्च वर्जयेत् मतिमान् सदा ।
स्त्रीमयञ्च जगत् सर्वं चिन्तयेत् साधकोत्तमः ॥
स्त्रीद्वेषो नैव कर्त्तव्यो विशेषात् पूजनं स्त्रियः ।
जपस्थाने महाशङ्खं निवेश्योर्द्ध्वं जपं चरेत् ॥
स्त्रियं गच्छन् स्पृशन् पश्यन् विशेषात् कुलजां शुभाम् ॥
भक्ष्यं स्ताम्बूलमद्यांश्च भक्ष्यद्रव्यान् यथारुचीन् ।
मांसमत्स्यदधिक्षौद्रपयःशाकाद्यमैक्षवम् ॥
भक्ताद्यशेषभक्ष्याणि दत्त्वा तत्र जपं चरेत् ।
दिक्कालनियमो नास्ति स्थित्यादिनियमस्तथा ॥
न जपे कालनियमो नार्चादिषु वलिष्वपि ।
स्वेच्छानियम उक्तो हि महामन्त्रस्य साधने ॥
वस्त्रासनस्थानदेह स्पर्शादिगेहबाधनात् ।
नास्त्यशुद्धिरिह क्वापि निर्विकल्पं मनश्चरेत् ॥
सुगन्धिश्वेतलौहित्यकुसुमैरर्चयेत् ततः ।
वन्यैर्मरुवकाद्यैश्च तुलसीवर्जितैः शुभैः ॥
पेयं चर्व्यं तथा चोष्यं भक्ष्यं भोगं गृहं सुखम् ।
सर्वञ्च युवतीरूपं भावयेद् यतमानसः ॥
कुलजां युवतीं वीक्ष्य नमस्कुर्य्यात् समाहितः ।
यदि भाग्यवशेनैव कुलदृष्टिस्तु जायते ॥
तदैव मानसीं पूजां तत्र तासां प्रकल्पयेत् ।
बालां वा यौवनोन्मत्तां वृद्धां वा सुन्दरीं तथा ॥
कुत्सितां वा महादुष्टां नमस्कृत्य विभावयेत् ।
तासां प्रहारं निन्दाञ्च कौटिल्यमप्रियं तथा ॥
सर्वथा न च कर्त्तव्यमन्यथा सिद्धिरोधकृत् ।

स्त्रियो देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणम् ॥
स्त्रीसङ्गिना सदा भाव्यमन्यथा स्वस्त्रियामपि ।
विपरीतरता सा तु भविता हृदयोपरि ॥
नाधर्मो जायते सुभ्रु ! किञ्च धर्मो महान् भवेत्
स्वेच्छाचारोऽत्र गदितः प्रचरेत् हृष्टमानसः ॥
इत्याचारपरः श्रीमान् जपपूजादितत्परः ।
पानतः कुलतन्त्रीनां परतत्त्वे प्रलीयते ॥
कौलतन्त्रेऽपि । शृणु देवि ! प्रवक्ष्यामि कौलिकाचरणं यथा ।
पाने भ्रान्तिर्भवेद् यस्य घृणा स्याद्रक्तरेतसोः ॥
शुद्धौ चाशुद्धता भ्रान्तिः पापशङ्का च मैथुने ।
स भ्रष्टः पूजयेद्देवीं चण्डीमन्त्रं कथं जपेत् ॥
रोगी दुःखी भवेद्देवि ! रौरवे नरके वसेत् ।
पञ्चमात्तु परं नास्ति शाक्तानां सुखमोक्षयोः ॥
भावरूपा च या देवी रेतःप्रीता सदानघे ! ।
रेतसा तर्पणं तस्या मद्यैर्मांसैः समं प्रिये ! ॥
केवलैः पञ्चमैर्देवि ! सिद्धो भवति साधकः ।
ध्यात्वा कुण्डलिनीं शक्तिं रमन् रेतो विमुञ्चयेत् ॥
अमन्त्रा च यदा नारी रसाद् यत्नात्तु लभ्यते ।
आत्मदेहस्वरूपेण तत्कर्णे मन्त्रमुच्चरेत् ॥
ततश्च शक्तिरूपा स्यात् भुक्तिमुक्तिप्रदायिनी ।
रम्भा च उर्वशी मुख्या या नारी गगने भुवि ॥
पाताले वा स्थिता या च तस्या नाथस्तु कौलिकः ।
तस्यापि वर्ज्या या नार्य्यस्तस्याः शृणु विधिं प्रिये ! ॥
गुरुरेव शिवः साक्षात् तत्पत्नी परमेश्वरी ।
मनसा कर्मणा वाचा रमणं तत्र वर्जयेत् ॥
तस्य देवपदे भक्तो मुक्तिं प्राप्य परां व्रजेत् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

गुरोः स्नुषा गुरोः कन्या तथा च मन्त्रपुत्रिका ॥
एतस्या रमणं वर्ज्यं ब्रह्मघ्नं मानसेऽपि च ।
कौलिकस्य च पत्नी च सा साक्षादीश्वरी शिवे ! ॥
तस्या रमणमात्रेण कौलिको नारकी भवेत् ।
मातापि गौरवाद्वर्ज्या अन्या वा विहिताः स्त्रियः ॥
भूतियागे च कर्त्तव्ये विचारो मन्त्रवित्तमैः ।
अन्यस्थाने विचारे च देवीशापः प्रजायते ॥
शिवहीना च या शक्तिर्दूरं तां परिवर्जयेत् ।
अभिषेकाद् भवेत् शुद्धिर्मन्त्रोच्चारणतः श्रुतौ ॥
पञ्चमेन च देवेशि ! सर्वपापैः प्रमुच्यते ।
केवलेनाद्ययोगेन साधको भैरवो भवेत् ॥
द्वितीयेन महेशानि ! पूजको ब्रह्मरूपभाक् ।
केवलेन तृतीयेन महाभैरवतां व्रजेत् ॥
चतुर्थेन तु तत्त्वेन भुवि पूज्यैकनायकः ।
परे च परतां याति मम तुल्यः परेश्वरि ! ॥
पञ्चमेन भवेद्योगी सर्वसिद्धिपरायणः ।
इतीदं कथितं देवि ! सुगोप्यमतियत्नतः ॥
न देयं पशवे देवि ! कुलनिन्दापराय च ।
कुलाचारगृहं गत्वा भक्त्या पापविशुद्धये ॥
याचयेदमृतं ज्ञानं तदभावे जलं पिबेत् ।
कुलाचारो हि यच्छक्त्या दत्तं पात्रन्तु भक्तितः ॥
नमस्कृत्य प्रगृह्णीयात् अन्यथा नरकं व्रजेत् ॥
अन्यत्रापि । वृथा कालं न गमयेत् द्यूतक्रीड़ादिना सुधीः ।
गमयेद्देवतापूजाजपयागस्तवादिना ॥
गुरोः कृपालापकथास्तोत्रागमविलोकनैः ।
गमयेदनिशं कालं न वदेत् परदूषणम् ॥

प्रत्यक्षे वा परोक्षे वा प्रत्यहं प्रणमेद् गुरुम् ।
गुरोरग्रे पृथक् पूजामौद्धत्यञ्च विवर्जयेत् ॥
दीक्षां व्याख्यां प्रभुत्वञ्च गुरोरग्रे न कारयेत् ।
गुरुशय्यासनं यानं पादुकोपानहौ तथा ॥
स्नानोदकं तथा च्छायां लङ्घनं न कदाचन ।
श्रीगुरुं कुलशास्त्राणि पूजास्थानानि यानि च ॥
भक्त्या श्रीपूर्वकं देवि ! प्रणम्य परिकीर्त्तयेत् ।
गुरुनाम न भाषेत जपकालादृते प्रिये ! ॥
श्रीनाथदेवस्वामीति विवादे साधने वदेत् ।
उत्पादकब्रह्मदात्रोर्गरीयान् मन्त्रदः पिता ॥
तस्मान्मन्त्रे च सततं पितुरप्यधिकं गुरुम् ।
कुलाचारं गुरुं देवं मनसापि न निन्दयेत् ॥
कुलस्त्रीवीरनिन्दाञ्च वर्जयेत् मतिमान् सदा ।
अन्तः शाक्ता वहिः शैवाः सभायां वैष्णवा मताः ॥
नानामूर्त्तिधराः कौलाः विचरन्ति महीतले ।
निगमे तु । गुरुणालोकितः शिष्य उत्तिष्ठेदासनं त्यजेत् ।
गुरुणा सदसद्वापि यदुक्तं तन्न लङ्घयेत् ॥
रभसं मैथुनं मिथ्या यो वदेदन्तिके गुरोः ।
स याति नरकं घोरं भैरवेण च भाषितम् ॥
संक्रान्तिर्नवमी पूर्णा चाष्टमी च चतुर्दशी ।
एकादशी व्यतीपाते कर्मलोपं न कारयेत् ॥
तत्त्वहीनं कृतं कर्म जपकर्म च निष्फलम् ।
शाम्भवी कुप्यते तेभ्यो ब्रह्महत्या दिने दिने ॥
भावचूड़ामणौ च ।
एकाकी निर्जने देशे श्मशाने निर्जने वने ।
शून्यागारे नदीतीरे निःशङ्को विहरेत् मुदा ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वीराणां जपकालस्तु सर्वकालः प्रशस्यते ।
सर्वदेशे सर्वपीठे कर्त्तव्यं नात्र संशयः ॥

अन्यदुक्तम् । स्वकुलान्ते पुरश्चर्य्या कार्य्या रात्रौ च नान्यथा ।
वेदहीने द्विजे जात्या यथा न श्रुतिसंस्क्रिया ॥
विष्णुभक्तिं विना देवि ! भक्तिर्नैव यथा भवेत् ।
शक्तिज्ञानं विना मुक्तिर्यथा हास्याय कल्पते ॥
गुरुं विना तथा तन्त्रे नाधिकारः कथञ्चन ।
पतिहीना यथा नारी सर्वकर्मविवर्जिता ॥
कुलं विना तथा दिव्यो वीरो वा मम साधकः ।
नाधिकारीति कौलेषु तस्माद् यत्नपरो भव ॥
अविनीतं कुलं यस्य स कथं मम पूजकः ।
तस्माद् यत्नात् तथा कार्य्यं यथा स्याद् विनयान्वितम् ॥ इति

तन्त्रचूड़ामणौ च ।

विष्णुभक्तो यदा देव ! कुलदीक्षापरो भवेत् ।
पुत्रदारधनं तस्य नाशयामि न संशयः ॥
कुलं देवं द्विजं हित्वा वैष्णवं देशिकं यदि ।
करोति कुलशिष्योऽसौ भ्रष्टो भवति साधकः ॥
हविरारोपमात्रेण वह्निर्दीप्तो यथा भवेत् ।
कुलदेवमुखात् तद्वत् तथा दीप्तो भवाम्यहम् ॥
दीक्षणात् पूजनाद्धोमात्तथा दृष्ट्यवलोकनात् ।
यत्किञ्चित् ज्ञानमात्रेण पशुना निर्जितोमृतः ॥
साधकस्य महापापं दत्त्वा तस्य हराम्यहम् ।
पशोर्विद्यां समासाद्य यदि पूजापरो भवेत् ॥
तस्य वक्त्रं समालोक्य कुलवक्त्रं विलोकयेत् ।
पशूपदिष्टं यत्किञ्चित् क्रियते कुलसाधकैः ॥
तत्तत्कर्म महादेव ! अभिचाराय कल्पते ।

यदि दैवात् पशोर्विद्यां लभ्यते कुलजैर्बुधैः ॥
द्विजस्य कौलिकीं प्राप्य पुनर्विद्यां समाचरेत् ।
अज्ञानाद् यत् कृतं कर्म नालोच्य कुलकौलिकीम् ॥
क्षमस्व देवि ! तत्पापं हर देवि ! कृपां कुरु ।
एवं प्रार्थ्य पुनर्दीक्षां कुर्य्यात् साधकसत्तमः ॥

अन्यदुक्तं तत्रैव ।

मनसा वचसा देव ! कुलाकुलगुरुं यदि ।
निन्दां करोति पापो यस्तस्योपरि च जायते ॥
एतत् शास्त्रप्रसङ्गन्तु एतत् पुस्तकदर्शनम् ।
पशोरग्रे न कर्त्तव्यं प्राणान्तेऽपि कदाचन ॥
कृत्वा सूर्य्यमुखं दृष्ट्वा स्मर्त्तव्यः कुलनायकः ।
पशुना यः सहालापः सहशय्या सहासनम् ॥
संसर्गश्चैव मेवात्र कुलीनस्य महात्मनः ।
पातकं न तु चैतेषां संक्षये पुण्यराशयः ॥
प्रभवन्ति न तीर्थानि न गङ्गा न च काशिका ।
महाविद्याजपादेव चत्वारि पातकानि च ॥
नश्यन्ति च न संसर्गः क्षयं याति कदाचन ।
अज्ञानात् पशुसंसर्गो यदि दैवात् प्रजायते ॥
तदा द्वादशवर्षाख्यं व्रतार्थं यत्नमाचरेत् ।
कुलीनायाः समीपस्थः कुलसेवापरायणः ॥
उच्छिष्टभोजी तन्नामजापी च तत्पतेरपि ।
तदा ह्येतां समाभ्यर्च्य यत्नैश्च परितोष्य च ॥
शुचिर्भूत्वा परां विद्यां गृहीत्वा शुद्धिमाप्नुयात् ।
व्रताशक्तो यदि भवेत् सुवर्णं कुलतोषकृत् ॥
दद्यात् कुलाय पापानां क्षयार्थं कुलसाधकः ।
ज्ञानात् संसर्गमासाद्य शुद्धिं प्राप्नोति नैव च ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पशुभ्यो भाषणाच्चैव योनिमालभ्य साधकः ।
नानाक्लेशसमायुक्तो नरकान् प्रतिपद्यते ॥
न चैवं दीक्षयेन्नाम न चान्यदर्शनञ्चरेत् ।
मम शास्त्रकथाञ्चाग्रे प्रयत्नेन विवर्जयेत् ॥
कर्मणा मनसा वाचा पशुशास्त्राङ्गपूजनम् ।
प्रकुर्वन्ति महापापास्त्याज्याश्च कुलपांशुलाः ॥
निर्जीवकाष्ठे लोष्ट्रे वा शर्करायां तृणेऽपि वा ।
सर्वत्र चिन्तिता चाहं न पशोर्मित्रविग्रहे ॥
चेतनाधिष्ठितं सर्वसुखं दुःखं प्रकल्पितम् ।
तत्रैव चेतनाभावान्नियमो नास्ति तादृशः ॥
प्रसन्ना तेन गोप्तव्या कुलीनैः सिद्धिहेतवे ।

अन्यदुक्तं तत्रैव ।

दीक्षायां कुलपूजायां शिष्यत्वे यदि वा गुरौ ।
लज्जापरं कुलं तत्र नित्यापि नित्यनिद्रिता ॥
अधस्तादृष्टिमात्रेण तस्य विद्या ह्यधोमुखी ।
निमीलनान्मृता विद्या बोधनान्मारयेद्ध्रुवम् ॥
पार्श्वावलोकनेनैव व्याधिदारिद्र्यपीड़िता ।
चतुर्दिगवलोकेन उच्चाटनगता भवेत् ॥
एतादृशं कुलं देव ! यदि कुर्य्यात् कथञ्चन ।
तदा कुलगुरुं प्रार्थ्य कारयेद्दीक्षणं ततः ॥
उपदेष्टा यदा देव ! तदा पुत्री तु कन्यका ।
पूजार्हा च तदा देवी तदा माता न संशयः ॥
सर्वथा पितृपुत्रीभ्यां मूलयोगेन दृश्यते ।
तत्कृते पापबुद्ध्या वै उभौ नरकगामिनौ ॥
चुम्बके अन्यशास्त्रज्ञे पशुग्रामे च भैरव ! ।
न वक्तव्यं न कर्त्तव्यं न च वाच्यं कथञ्चन ॥

एवं कृते गुरौ शिष्ये मम शापो भविष्यति ।

शिवागमे च । शक्त्युच्छिष्टमविचार्य्य पिबेच्चक्रेश्वरो यदि ॥
घोरञ्च नरकं याति कुलमार्गे पतेद् ध्रुवम् ।
तस्माद्विचार्य्य यत्नेन शक्त्युच्छिष्टं पिबेत् सुधीः ॥
आनन्दं कारयेद्वीरस्तत्त्वं निर्भ्रान्तितः पिबेत् ।
शक्तिः शिवः शिवः शक्तिः शक्तिर्ब्रह्मजनार्दनः ॥
शक्तिरिन्द्रावधिः शक्तिः शक्तिश्चन्द्रोग्रहो ध्रुवम् ।
शक्तिरूपं जगत् सर्वं यो न जानाति नारकी ॥

वीरतन्त्रेऽपि । स्नानादिमानसं शौचं मानसः प्रवरो जपः ।
पूजनं मानसं दिव्यं मानसं तर्पणादिकम् ॥
सर्व एव शुभ कालो नाशुभो विद्यते क्वचित् ।
न विशेषो दिवा रात्रौ न सन्ध्यायां महानिशि ॥
सर्वदा पूजयेद्देवीं सुस्नातः कृतभोजनः ।
महानिशाशुचौ देशे बलिं मन्त्रेण दापयेत् ॥

एतेन दिवसेऽपि पञ्चतत्त्वेन संपूजनं कार्य्यमिति सूचितम् । यत्तु ।

रात्रावेव महापूजा कर्त्तव्या वीरवन्दिते ! ।

इति स्वतन्त्रवचनम् ।

न दिने सर्वथा कार्य्या शासनात् मन्त्रसुव्रते ! ।
हविष्याशी दिवा लक्षं पुरश्चारी तु यो जपेत् ।
तत्र मात्रं दिवा पूजा पशुवद्धुवन्दिते ! ॥

इति स्वतन्त्रवचनम्, तत्तु पुरश्चरणविषये बोद्धव्यमिति । अत्र रात्रावेव इति शब्दस्वरसात् सामान्याधिकारर इति ब्रूमः । कालीतन्त्रादिस्वरसाच्च । तत्तु जपेन कालनियमम् इति पुरैव लिखितम् । एवं छिन्नमस्तातन्त्रेऽपि ।

सिद्धमन्त्रे न दोषः स्यान्नाशौचे नियमेऽपि च ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

न कल्पना दिवारात्रौ न च सन्ध्यावसानकम् ॥
सदैव पूजयेन्मन्त्री मैथुने तु विशेषतः ।
किन्तु—न पश्येत् पतितां नग्नामुन्मत्तां प्रकटस्तनीम् ॥
दिवसे न रमेन्नारीं तद्योनिं नैव वीक्षयेत् ॥
कुलार्णवेऽप्येवम्। तत्प्रकरणत्वात् पुरश्चरणं वा इति ।

अथ रुद्रयामले ।

पशोः सम्भाषणाद्देवि ! मन्त्रसिद्धिर्न जायते ।
पशुस्तु द्विविधो देवि ! दीक्षितोऽपि भवेत् पशुः ॥
दीक्षितश्च कुलाचारनिन्दको द्विविधः पशुः ।
गोलकेन सहालापात् स्पर्शात् सम्भावसंस्कृतात् ॥
न सिध्यति महेशानि ! सत्यं सत्यं वदाम्यहम् ।
विकल्पिता न सिध्यन्ति जपात् सिध्यन्ति लोकदाः ॥
तस्मादेतत् परित्यज्य सिद्धिः स्यात् केवलाज्जपात् ।
वीरहत्या वृथापानं वीरजायानिषेवणम् ॥
महापातकमित्याहुः कौलिकानां कुलेश्वरि ! ।
अर्थाद्वा कामतो वापि लौल्यादपि च यो नरः ।
लिङ्गयोनिरतो मन्त्री रौरवं नरकं व्रजेत् ॥

इति महामहोपाध्यायपरमहंसपरिव्राजक-पूर्णानन्दगिरि-
विरचिते श्यामारहस्ये पुरुषार्थसाधनाचारविवरणं
नामाष्टमः परिच्छेदः ।

अथ नवमः परिच्छेदः ।

अथ कुण्डगोलोद्भवादिग्रहणविधिः । तदुक्तं तन्त्रान्तरे
आनीय प्रमदां मत्तां दीक्षितां यौवनान्विताम् ।
स्वकान्तां परकान्तां वा घृणालज्जाविवर्जिताम् ॥

पराङ्मुखोपविष्टस्तु निशायामर्द्धरात्रके ।
हेतुयुक्तं सताम्बूलं दत्त्वा न्यासान् विधाय च ॥
मौलौ कुन्तलकर्षणं नयनयोराचुम्बनं गण्डयो-
र्दन्तेनाधरपीड़नं हृदि हतिर्मुष्ट्या च नाभौ भगे ।
कक्षाकण्ठकपोलमण्डलकुचश्रोणीषु देया नखाः
सीमन्ते लिखनं नखैरुरसिजं गृह्णीत गाढ़ं ततः ।
कुर्वीताविरतं मनोभवगृहे मातङ्गलीलामिति
जङ्घाङ्गुष्ठपदोरुगुल्फहननं चान्योन्यतः कामिनोः ॥
आं ईं हुं क्लीं वूं अमुकीं द्रावय स्वाहा इति विन्यसेत् ।
ऐं क्लीञ्चपले चलच्चित्तान्तु रेतो मुञ्च इयं पठेत् ॥
वूं क्लीं स्त्रीं क्लीं देवेशि ! द्राविणीबीजमुत्तमम् ।
तस्यां योनौ न्यसेद्विद्यां मैथुनं कारयेत् प्रिये ! ॥
शुद्धमन्त्रौषधेनैव योनिप्रमथनं चरेत् ।
मथ्यमाने पुनस्तस्यां जायते तत्त्वमुत्तमम् ॥
गृह्णीयात् तत् प्रयत्नेन द्रव्यं कुलोद्भवं शुभम् ।
निःशङ्कभाहितं द्रव्यं गृहीत्वा तेन पूजयेत् ॥
सान्निध्यं जायते देवि ! सर्वकामसुपालभेत् ।
कुण्डोद्भवामृतं द्रव्यं कथितं दुर्लभं मया ॥

पञ्चमीयामलेऽपि ।

चर्व्यं चोष्यं निवेद्याथ वस्त्रालङ्करणादिकम् ।
पूजयेदक्षतैः शुक्लैस्तस्या मदनमन्दिरम् ॥
भावयेत् कामतत्त्वेन तासु तत्त्वं न चोत्सृजेत् ।
शुद्धमन्त्रौषधेनैव मथयेन्मदनालयम् ॥
मथ्यमाने पुनस्तस्या जायते तत्त्वमुत्तमम् ।
गृह्णीयात् तत् प्रयत्नेन द्रव्यं कुण्डोद्भवं शुभम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ शुद्धमन्त्रौषधं यथा तदुक्तं कुलोड्डीशे ।
मायागच्छ पदं शुक्रस्तम्भनकारिणि ठद्वयम् ॥
अनेनार्कोपरागे च जातीमूलं समानयेत् ।
एतद्गृत्वा साधकेन्द्रः शुक्रस्तम्भनमाचरेत् ॥ इति ।
गोलोद्भवं तथा देव ! गृह्यते च विधानवित् ।
कुलजां दीक्षितां मत्तां पतिहीनां विचक्षणाम् ॥
शक्तियोग्यां स्वरूपाञ्च अनपत्यां समानयेत् ।
सुन्दरीं शोभनां दिव्यां पीनोन्नतपयोधराम् ॥
द्विरष्टवर्षदेशीयां सदा कामाभिलाषिणीम् ।
पूर्वोक्तक्रमयोगेन कृत्वा न्यासादिकं ततः ॥
तत्त्वं प्रगृह्य यत्नेन पूजार्थं साधकोत्तमः ।
इदं गोलोद्भवं द्रव्यं देवतासृष्टिकारकम् ॥
अनेन पूजयेद् यो हि सर्वकाममुपालभेत् ।
स्वयम्भूं कथयिष्यामि पूजार्थं साधकोत्तमः ॥
पूर्ववद्यासवर्य्यन्तु कारयेद्देवि ! सुन्दरि ।
तस्यास्तु मदनागारे पूजयेत् परमेश्वरीम् ॥
स्वयमक्षोभितो भूत्वा साधकः पञ्चमीं यजेत् ।
स्वेच्छा ऋतुमती शक्तिः साक्षाद्देवी सुरेश्वरि ! ॥
तस्याः पुष्पं स्वयं यत्तद्रक्षणीयं प्रयत्नतः ।
वस्त्रालङ्कारपुष्पेण शक्तिञ्च पूजयेत् सदा ॥
यथा काले तथा पुष्पं स्वयं तद्गोपयेत् सकृत् ।
गृहीत्वा तत् प्रयत्नेन स्वयम्भू कुसुमं चरेत् ॥
स्वयम्भूपुष्पयोगेन साक्षतेन समर्चयेत् ।
विद्यां स्वप्नावतीं जप्त्वा क्षिप्रमाकर्षणादिकम् ॥
देवताश्च महानागा राक्षसा दानवाश्च ये ।
राजानश्च स्त्रियः सर्वा नित्यं वश्या भवन्ति हि ॥

मुण्डमालायाम् ।
स्वयम्भू कुसुमं देवि ! त्रिविधं भुवि जायते ।
आषोड़शादनूढ़ाया उत्तमा सर्वसिद्धिदा ॥
बलात्कारेण ऊढ़ाया मध्यमा भोगवर्द्धिनी ।
रजोयोगवशादन्या चाधमा फलदायिनी ॥
तन्त्रचूड़ामणौ च ।
शृणु वत्स ! कुलद्रव्यमाहात्म्यं परमं शुभम् ।
यत् प्राप्य कुलदेवेन लभ्यते वाञ्छितं महत् ॥
अमावस्यातिथौ देवी स्वयम्भूमध्यवर्त्तिनी ।
अमृतं वर्षते सा तु त्रिदिनं पृथिवीतले ॥
तस्यां तिथौ कुले देवि ! यदि विद्यां समुच्चरेत् ।
पूर्वसेवा भवत्यत्र प्रत्युच्चारणमेव हि ॥
तस्मात् सर्वप्रयत्नेन कुलं वीक्ष्य जपं कुरु ।
दृष्ट्वा च अमृतं देवगलितं परिगृह्य च ॥
साधयेत् साधनं सर्वं कुलाचारस्य सिद्धये ।
शिवहीना यदा शक्तिः सर्गादौ वर्षते यतः ॥
तदेव परमं द्रव्यं स्वयम्भूकुसुमाख्यकम् ।
स्वयम्भूकुसुमं द्रव्यं त्रैलोक्ये चापि दुर्लभम् ॥
क्वचिद्गन्धर्वराजेन लभ्यते वा नराधिपैः ।
यदि तल्लभ्यते देव ! लाक्षारससमन्वितम् ॥
कस्तूरीकुङ्कुमाक्तञ्च वटीं कृत्वा सुगोपयेत् ।
मन्त्रराजं समालिख्य पूजयेद् यदि साधकः ॥
एतेनाक्षतयोगेन मधुमतीसिद्धमानयेत् ।
सुप्तादिदोषयुक्ता ये मन्त्रा विद्याश्च कीर्त्तिताः ॥
प्रबुद्धास्तत्प्रयोगेण यावत् सा पुनरागता ।
ततः प्रयोगं विद्यानां मन्त्रादीनाञ्च कारयेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

एवं प्रबुद्धा भवति नैव तादृक् कदाचन ।
एतत् त्रयाणां मध्ये तु स्वयम्भूकुसुमं महत् ॥
श्रीक्रमेऽपि । कस्तूरीकुङ्कुमं रक्तचन्दनागुरुकादिकम् ।
नानासुगन्धिकं दत्त्वा एकीकृत्य तु साधकः ॥
एतेनाक्षतयोगेन पूजयेत् परमेश्वरीम् ।
स्वयम्भूकुसुमैः पूजां प्रत्यहं यः समाचरेत् ।
तस्य मधुमतीसिद्धिरधीना देवि ! जायते ॥

अथ दूतीयजनविधिः ।

यामसमाचगते रात्रौ कुलगेहगतः पुमान् ।
ताम्बूलपूरितमुखो धूपामोदसुगन्धिभिः ॥
रक्तचन्दनलिप्ताङ्गो रक्तमाल्यानुलेपितः ।
रक्तवस्त्रपरीधानो लाक्षारुणगृहे स्थितः ॥
रक्तमाल्येन संवीतो रक्तपुष्पविभूषितः ।
पञ्चोकरणसङ्केतैः पूजयेत् कुलनायिकाम् ॥

कुलनायिका यथा । तदुक्तं तत्रैव ।

नटी कापालिनी वेश्या पुक्कसी नापिताङ्गना ।
रजकी रञ्जकी चैव सैरिन्ध्री च सुभाषिणी ॥
घटिका घटिका चैव तथा गोपालकन्यका ।
विशेषवैदग्ध्ययुताः सर्वा एव वराङ्गनाः ॥
गुरुभक्ता देवभक्ता घृणालज्जाविवर्जिताः ।
संगोपनरताः प्रायस्तरुण्यः सर्वसिद्धिदाः ॥
एवं यथोदितां प्रसूनतूलिकोपरि संस्थाप्य पूजामारभेत् ।

तदुक्तं तत्रैव ।

अद्वैताचारसम्पन्नां घृणालज्जाविवर्जिताम् ।
सदनुष्ठाननिरतां सात्त्विकीं भक्तिसंयुताम् ॥
देवताभावसंयुक्तां गुरुभक्तां दृढव्रताम् ।

ईर्षालस्येन रहितां समयां भक्तवत्सलाम् ॥
चातुर्य्यौदार्य्यदाक्षिण्यकरुणादिकलान्विताम् ।
रूपयौवनसम्पन्नां शीलसौभाग्यशालिनीम् ॥
सदा परिगृहीतां वा यद्वा सङ्केतमागताम् ।
अथवा तत्क्षणायातां मदनानलतापिताम् ॥
विलिप्तां रक्तगन्धेन रक्ताम्बरविभूषिताम् ।
सुगन्धिवद्धकुसुमां सर्वाभरणभूषिताम् ॥
स्वधूपधूपितां तन्वीं दूतीकर्मणि योजयेत् ।
एवं भूतां यजेत्ताञ्च प्रसूनतूलिकोपरि ॥
व्यङ्गाङ्गीं विक्षताङ्गीं वा सविकल्पकमानसाम् ।
वर्षीयसीं पापरतां क्रूरामत्यन्तलोलुपाम् ॥
अभक्तां मनसा दीनां वर्जयेत् साधकोत्तमः ।
समानीय कुलं सोऽपि गुरुभक्तमनन्तरम् ॥
स्नातं शुद्धदुकूलादि अनुलेपनशोभितम् ।
स्वस्तिकृतं गतं श्रान्तिं स्वागतं चासनं तथा ॥
निवेश्य तूलिकामध्ये प्रसूनेन सुगन्धिना ।
चन्दनागुरुकर्पूरकस्तूरीकुङ्कुमादिभिः ॥
समाकीर्णे स्वपर्य्यङ्के पूजयेत् कुलनायिकाम् ॥
अङ्गन्यासकरन्यासौ प्राणायामस्ततःपरम् ।
विधाय मातृकान्यासं कुलाङ्गेऽपि प्रविन्यसेत् ॥
ततः पूर्वोक्तविधिना घटार्घ्यस्थापनादिकम् ।
विधाय तद्वराङ्गेषु पूजयेत् परमेश्वरीम् ॥

तदुक्तं तत्रैव ।

पूजयेदपि पल्यङ्कमध्ये मण्डूकमग्रतः ।
कालाग्निरुद्रमाधारशक्तिं कूर्समनन्तकम् ॥
वराहं पृथिवीं कन्दं मृणालं केशराण्यपि ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पद्मञ्च कर्णिकाञ्चैव मण्डलञ्च समर्चयेत् ॥
धर्मं वैराग्यमैश्वर्य्यं ज्ञानमज्ञानमेव च ।
अनैश्वर्य्यमवैराग्यमधर्ममपि पूजयेत् ॥
आत्मतत्त्वं ज्ञानतत्त्वं परतत्त्वञ्च पूजयेत् ।
गन्धपुष्पाक्षतादीनि दत्त्वा तत्रैव धूपयेत् ॥
तस्योपरि कुलं स्थाप्यं पूजानुष्ठानमेव च ।
पूजयेच्च ततस्तस्यां पञ्चकामान् समाहितः ॥
क्लीञ्चैव कामबीजं क्लीं कन्दर्पो हुं च मन्मथः ।
व्लूं मकरकेतनश्चैव स्त्रीं चैव हि मनोभवः ॥
ओंकारादिनमोऽन्तञ्च कुसुमैर्गन्धसंयुतैः ।
अर्चयित्वा चतुर्दिक्षु पूजयेत् कुलनायकः ॥
वटुकं भैरवञ्चैव दुर्गाञ्च क्षेत्रपालकम् ॥
तन्त्रान्तरे च । वाग्भवं कामबीजञ्च स्त्रीबीजं कामराजकम् ।
हसव्लेमात्मकं दत्त्वा आधारशक्तिमुच्चरेत् ॥
श्रीपादुकां ततो दत्त्वा पूजयामि वदेत्ततः ।
अनेन मनुना तस्या ललाटे सुमनोहरम् ॥
त्रिकोणं तत्र संलिख्य सिन्दूराद्यैर्वरानने ! ॥
उत्तरतन्त्रे च । तस्या मूर्ध्नि त्रिकोणञ्च यन्त्रमालिख्य साधकः ।
महाप्रेतासनं मध्ये अधो बालाञ्च पूजयेत् ॥
मौलौ गणेशं केशाग्रे कुलाध्यक्षं ललाटके ।
दुर्गां भ्रुवो स्तथा लक्ष्मीं रसनायां सरस्वतीम् ॥
स्तनद्वये वसन्तञ्च मदनञ्च प्रपूजयेत् ।
मुखे सुधाकरं पृष्ठे ग्लुं बीजानन्तरोदिते ॥
दक्षिणांशं समाश्रित्य आशिरश्चरणावधि ।
पूज्याः कामकलास्तस्याः साधकाङ्गेषु साधकः ॥
श्रद्धाप्रीतीरतिश्चैव भूतिः कान्तिर्मनोरमा ।

विमला मोदिनी घोरा मदनोत्पादिनी मदा ॥
मोहिनी दीपनी चैव शोधिनी शाङ्करी तथा ।
रञ्जनी चैव मदना कला स्वरविभूषिता ॥
ततश्चन्द्रकलाः पूज्याः आशिरश्चरणावधि ।
पुष्टा वशा च सुमना रतिः प्रीतिर्धृतिस्तथा ॥
सिद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ।
मदिरा शशिनीच्छाया तथा सम्पूर्णमण्डला ॥
तुष्टिश्च अमृता चैव पूज्याश्चन्द्रकला इमाः ।
स्वरैरेव प्रपूज्या हि सर्वकार्य्यार्थसिद्धये ॥
ललिताव्याप्तिदीपिकायान्तु ।
भगे तदीये विद्यन्ते नाड्यस्त्रिस्रः प्रधानिकाः ।
एका तु नाड़िका सौरी चान्द्री चान्या च नाड़िका ॥
आग्नेयी चापरा ज्ञेया पूजयेत्ताञ्च साधकः ।
अम्बु स्रवति चान्द्री हि पुष्पं स्रवति भानवी ॥
बीजं स्रवति चाग्नेयी तास्तु नामभिरर्चयेत् ।
वाग्भवाद्यैर्नमोयुक्तैः पूजयेत् सुप्रसन्नधीः ॥
उत्तरतन्त्रेऽपि । पूजयेन्मदनागारे रक्तगन्धेन चर्चिते ।
भगमालामनुं प्रोच्य त्रितारानन्तरं तथा ॥
ऐं क्लीं श्रीं हुं व्लुं क्लिन्ने ततः परम् ।
सर्वाणीति भगानीति वशमानय मे ततः ।
स्त्रीं क्लीं क्लीं व्लीं क्लीं भगमालिन्यै नमः स्वाहा ॥
पूजयित्वा तु तच्चक्रं गन्धैः पुष्पैस्तथाक्षतैः ।
धूपैर्दीपैश्च नैवेद्यैर्विविधैः कुलसाधकः ॥
विधाय नन्दितां ताञ्च तदुच्छिष्टं स्वयं हरेत् ।
अर्चयेद्गन्धपुष्पाद्यैः स्वशिरस्तदनन्तरम् ॥
मूलमन्त्रं ततः ओं क्लीं नमः शिवाय ततः परम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

यजेत्तु तत्पुरा घोरे सद्योजातेश्वरानपि ॥
निवृत्तिश्च प्रतिष्ठा च विद्या च तदनन्तरम् ।
शान्तिश्च शान्त्यतीता च षड़ङ्गं तदनन्तरम् ॥
समग्रमविद्यामुच्चार्य्य त्रिकोणञ्चैव पूजयेत् ।
अन्यत्रापि । इहाप्यावाहनं नास्ति जीवन्यासोऽपि नैव च ॥

अथैनां विधिना षोड़शोपचारैः इष्टदेवीं प्रपूजयेत् ।

तदुक्तं उत्तरतन्त्रे ।

अवधूतेश्वरीं कुब्जां कामाख्यां समयामपि ।
राजेश्वरीं कालिकाञ्च तथा दिक्करवासिनीम् ॥
महाचण्डेश्वरीं तारां पूजयेत्तत्र साधकः ।
तदनुज्ञां ततो लब्ध्वा दत्त्वा ताम्बूलमुत्तमम् ॥
शिवञ्च तत्र निःक्षिप्य गजतुण्डाख्यमुद्रया ।

गजतुण्डा मुद्रा यथा ।

अङ्गुष्ठानामिकामध्या योन्याकारेण योजयेत् ।
गजतुण्डाकृतिर्देवीम् इत्याह भगवान् हरः ॥

अत्राप्यारम्भे त्यागे च धर्माधर्महरीत्यादि मन्त्रद्वयं गुह्यवचनान्तरदर्शनात् तद्यथा ।

शिवशक्तिसमायोगो यत्र यत्र प्रजायते ।
तत्र तत्र त्वयं ग्राह्यो धर्माधर्मादिको मनुरिति ॥

ततोऽष्टोत्तरसहस्रमष्टोत्तरशतं वा अक्षुब्धो जपेत् ।

तदुक्तम् उत्तरतन्त्रे ।

प्रजपेत् क्षोभरहितश्चाष्टोत्तरसहस्रकम् ।
शतमष्टोत्तरं वापि अक्षुब्धस्थिरमानसः ॥
जपान्ते तज्जपं देव्यै समर्प्य तदनन्तरम् ।
क्षुब्धां मनोभवसुखैः पूजयेत् सुचिरं रसात् ॥
गलचक्रदलं तस्माद् गृहीत्वा कुण्डगोलकम् ।

अर्घ्यस्थापनयन्त्राङ्गं चन्दनादिषु योजयेत् ॥

ज्ञानार्णवे विशेषो यथा ।

शिवशक्तिसमायोगो योग एव न संशयः ।
चीत्कारो यन्त्ररूपस्तु वचनं स्तवनं भवेत् ॥
आलिङ्गनन्तु कस्तूरी कर्पूरं चुम्बनं भवेत् ।
नखदन्तक्षतान्यत्र पुष्पाणि विविधानि च ॥
मैथुनं तर्पणं विद्धि वीर्य्यपातो विसर्जनम् । इति ।

कुलार्णवे च ।

आलिङ्गनं चुम्बनञ्च स्तनयोर्मर्दनं ततः ।
दर्शनं स्पर्शनं योनेर्विकाशं लिङ्गघर्षणम् ॥
प्रवेशः स्थापनं शक्तेर्नवपुष्पाणि वर्जयेत् ।

रुद्रयामलेऽपि ।

संयोगाज्जायते सौख्यं परमानन्दलक्षणम् ।
कुलामृतं प्रयत्नेन गृह्णीयाद् दुर्लभं नरः ॥
तेनामृतेन दिव्येन तर्पयेत्त्रिपुरां पराम् ।
सान्निध्यात् तत्क्षणाद् याति प्रीता सिद्धिं प्रयच्छति ॥
समस्तदेवतानाञ्च तर्पणञ्च सदामृतैः ।
गुरूणां साधकानाञ्च सर्वेषां तर्पणं भवेत् ॥
तेनामृतेन दिव्येन सर्वे तुष्टा भवन्ति च ।
यत्कामं कुरुते मन्त्री तत्क्षणादेव सिध्यति ॥

समयार्णवे च ।

कुलामृतं समादाय ततोऽर्घ्यं वा क्षिपेत् बुधः ॥

इति श्रीपूर्णानन्दगिरिविरचिते श्यामारहस्ये कुसुमोत्पादनं नाम नवमः परिच्छेदः ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ दशमः परिच्छेदः ।

अथ सामान्यसाधनम् । तदुक्तं कालीतन्त्रे ।
अथोच्यते कालिकायाः सामान्यं साधनं प्रिये ! ।
कृतेन येन विविना पलायन्ते महापदः ॥
शिवावलिश्च दातव्यः सर्वसिद्धिमभीप्सुभिः ।
महोत्पाते महायोगे महादोषे महाग्रहे ॥
महापदि महायुद्धे महाविग्रहसंकुले ।
महादारिद्र्यशमने महादुःस्वप्नदर्शने ॥
महाशान्तौ महारण्ये महास्वस्त्ययने तथा ।
घोराभिचारशमने घोरोपद्रवनाशने ॥
कूटयुद्धादिशमने कूटशत्रुनिवारणे ।
राजादिभयशान्त्यर्थं राजक्रोधोपशान्तये ॥
न ददाति वलिं यस्तु शिवायाः शिवतृप्तये ।
स पापिष्ठो नाधिकारी कुलदेव्याः प्रपूजने ॥
कुलीनं नावमन्येत कुलजां परिपूजयेत् ।
कुलजेषु प्रसन्नेषु कालिकासन्निधिर्भवेत् ॥
अहो धन्यवतां लोके जानाति कुलदर्शनम् ।
तेषां मध्ये च यः कोऽपि कुलदेवीं समर्चयेत् ॥
कुलाचारविहीनो यः पूजयेत् कालिकां नरः ।
स स्वर्गमोक्षभागी च न स्यात् सत्यं न संशयः ॥
आयुरारोग्यमैश्वर्यं बलं पुष्टिर्महद्यशः ।
कविता भक्तिमुक्ती च कालिकापदपूजनात् ॥
कुलचूड़ामणौ । कुलवारे कुलाष्टम्यां चतुर्दश्यां विशेषतः ।
योगिनीपूजनं तत्र प्रधानं कुलपूजनम् ॥
यथा विष्णुतिथौ विष्णुः पूजितो वाञ्छितप्रदः ।

तथा कुलतिथौ दुर्गा पूजिता वरदायिनी ॥
अथ कुलवारादयो यथा । तदुक्तं यामले ।
रविश्चन्द्रो गुरुः सौरिश्चत्वारश्च कुला मताः ॥
भौमशुक्रौ कुलाख्यौ तु बुधवारः कुलाकुलः ।
द्वितीया दशमी षष्ठी कुलाकुलमुदाहृतम् ॥
विषमाश्चाकुलाः सर्वाः शेषाश्च तिथयः कुलाः ।
वारुणार्द्राभिजिन्मूलं कुलाकुलमुदाहृतम् ॥
कुलानि समधिष्ठानि शेषभान्यकुलानि च ।
तिथिवारे च नक्षत्रे अकुलस्थायिनो जनाः ॥
कुलाख्ये जापको नित्यं साम्यञ्चैव कुलाकुलम् ॥
एवं कुलवारादिकं ज्ञात्वा साधकः कर्म कुर्य्यात् ।
अथ शिवावलिप्रकारः । तदुक्तं कुलचूड़ामणौ ।
विल्वमूले प्रान्तरे वा श्मशाने वापि साधकः ।
मांसप्रधानं नैवेद्यं सन्ध्याकाले निवेदयेत् ॥
कालिकालीति वक्तव्ये तत्रोमा शिवरूपिणी ।
पशुरूपा समायाति परिवारगणैः सह ॥
भुक्त्वा रौति यदैशान्यां सुखमुत्तोल्य सुस्वरम् ।
तदैव मङ्गलं तस्य नान्यथा कुलदूषणम् ॥
अवश्यमन्नदानेन नियतं तोषयेत् शिवाम् ।
नित्यश्राद्धं तथा सन्ध्यावन्दनं पितृतर्पणम् ॥
तथैव कुलदेवीनां नित्यता कुलपूजने ।
पशुरूपां शिवां देवीं यो नार्चयति निर्जने ॥
एकया भुज्यते यत्र शिवया देव भैरव ! ।
शिवाभावेन तस्याशु सर्वं नश्यति निश्चितम् ॥
जपपूजाविधानानि यत्किञ्चित् सुकृतानि च ।
गृहीत्वा शापमादाय शिवा रोदिति निर्जने ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

एकया भुज्यते यत्र शिवया देव भैरव ! ।
वाञ्छनाद्विगुणं कर्म सगुणं साधयेद्यतः ॥
तेन सर्वप्रयत्नेन कर्त्तव्यं पूजनं महत् ।
राजादिभयमापन्ने देशान्तरभयादिके ॥
शुभाशुभानि कार्य्याणि विचिन्त्य वलिमाहरेत् ।
गृह्ण देवि ! महाभागे ! शिवे ! कालाग्निरूपिणि ! ॥
शुभाशुभफलं व्यक्तं ब्रूहि गृह्ण वलिं तव ।
एवमुच्चार्य्य दातव्यो वलिः कुलजनप्रियः ॥
यदि न गृह्यते वत्स ! तदा नैव शुभं भवेत् ।
शुभं यदि भवेत्तस्य भुज्यते तदशेषतः ॥
एवं ज्ञात्वा महादेव ! शान्तिस्वस्त्ययनं चरेत् ।
कुलाचारं दक्षिणाख्यं कथितं तव सुव्रतम् ॥
न कस्मैचित् प्रवक्तव्यं यदीच्छेच्छुभमात्मनः ।
निर्जने चैव कर्त्तव्यं न चैवं जनसन्निधौ ॥
न पितुः सन्निधाने वा न मातुः सुतसन्निधौ ।
किं वा पक्षिपतङ्गादिदर्शने नैव कारयेत् ॥
पाताले मण्डले वापि गह्वरे वा सुयन्त्रिते ।
कुलपुष्पं कुलद्रव्यं कुलपूजां कुले जपम् ॥
कुरुं कुलपतिञ्चापि कुलमालां कुलाकुलम् ।
कुलचक्रं कुलध्यानं सर्वथा न प्रकाशयेत् ॥
प्रकाशात् सिद्धिहानिः स्यात् प्रकाशाद् बन्धनादिकम् ।
प्रकाशान्मन्त्रनाशः स्यात् प्रकाशादेव हिंसनम् ॥
प्रकाशान्मृत्युलाभः स्यात् न प्रकाश्यं कदाचन ।
पूजाकाले च देवेशि ! यदि कोऽप्यत्र गच्छति ॥
दर्शयेद्वैष्णवीं मुद्रां विष्णुन्यासं तथान्तरम् ।
प्रकाशाद् यदि गुप्तिः स्यात् तत्प्रकाशे न दूषणम् ॥

गोपनाद्यदि व्यक्तः स्यात् न गुप्तिः साभिधीयते ।
कदाचिदङ्गहानिस्तु न च व्यक्तिः कदाचन ॥

अथ समयाचारः । तदुक्तं तत्रैव ।

शृणु पुत्र ! रहस्यं मे समयाचारसम्भवम् ।
येन हीना न सिध्यन्ति जन्मकोटिसहस्रशः ॥
मानवः कुलशास्त्राणां कुलचर्य्यानुसारिणाम् ।
उदारचित्तः सर्वत्र वैष्णवाचारतत्परः ॥
परनिन्दासहिष्णुः स्यादुपकाररतः सदा ।
पर्वते विपिने चैव निर्जने शून्यमण्डपे ॥
चतुष्पथे कलामध्ये यदि दैवाद् गतिर्भवेत् ।
क्षणं ध्यात्वा मनुं जप्त्वा नत्वा गच्छेद् यथासुखम् ॥
गृध्रं वीक्ष्य महाकालीं नमस्कुर्य्यादलक्षितम् ।
क्षेमङ्करीं तथा वीक्ष्य जम्बूकीं यमदूतिकाम् ॥
कुररं श्येनभूकाकौ कृष्णमार्जारमेव च ।
पूर्णोदरि ! महाचण्डे ! मुक्तकेशि ! वलिप्रिये ! ॥
कुलाचारप्रसन्नास्ये ! नमस्ते शङ्करप्रिये ! ।
श्मशानस्थं शवं दृष्ट्वा प्रदक्षिणमनुव्रजन् ॥
प्रणम्यानेन मन्त्रेण मन्त्री सुखमवाप्नुयात् ।
घोरदंष्ट्रे ! कठोराक्षि ! किचिशब्दप्रणादिनि ! ॥
घुष्टघोररवास्फाले ! नमस्ते चितिवासिनि ! ।
रक्तवस्त्रां रक्तपुष्पां विलोक्य त्रिपुरात्मिकाम् ॥
प्रणमेद्दण्डवद्भूमाविमं मन्त्रमुदीरयन् ।
बन्धूकपुष्पसङ्काशे ! त्रिपुरे ! भयनाशिनि ! ॥
भाग्योदयसमुत्पन्ने ! नमस्ते वरवर्णिनि ! ।
कृष्णवस्त्रं तथा पुष्पं राजानं राजपुत्रकम् ॥
हस्त्यश्वरथशस्त्राणि फलकान् वीरपौरुषान् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

महिषं कुलदेवञ्च दृष्ट्वा महिषमर्दिनीम् ॥
जयदुर्गां स्मरेन्मन्त्री शतविघ्नैर्न लिप्यते ।
जयदेवि ! जगद्धात्रि ! त्रिपुराद्ये ! त्रिदैवते ! ॥
भक्तेभ्यो वरदे ! देवि ! महिषघ्नि ! नमोऽस्तु ते ।
मद्यभाण्डं समालोक्य मत्स्यं मांसं वरस्त्रियम् ।
दृष्ट्वा च भैरवीं देवीं प्रणम्य विमृषेन्मनुम् ॥
घोरविघ्नविनाशाय कुलाचारसमृद्धये ।
नमामि वरदे देवि ! मुण्डमालाविभूषिते ! ॥
रक्तधारासमाकीर्णवदने ! त्वां नमाम्यहम् ।
एतेषां दर्शने देवि ! यदि नैवं प्रकुर्वते ॥
शक्तिमन्त्रं पुरस्कृत्य तस्य सिद्धिर्न जायते ।
एतेषां मारणोच्चाटौ हिंसनं वाग्भवादिभिः ॥
कुरुते यदि पापात्मा मद्भक्तः स कथं भवेत् ।
प्रधानांशसमुद्भूता एते कुलजनप्रियाः ॥
डाकिन्यश्च तथा सर्वा मदंशाः शृणु भैरव ! ।
लब्धसिद्धिसमायोगात् डाकिनीहिंसनं यदि ॥
अथवा दानवानाञ्च मद्भक्तानां विशेषतः ।
वटुकानां भैरवाणां तस्य सिद्धिर्न जायते ॥

इति श्रीपूर्णानन्दगिरिविरचिते श्यामारहस्ये
दशमः परिच्छेदः ।

अथ एकादशः परिच्छेदः ।

अथ मन्त्रसिद्धिप्रकारो लिख्यते । तदुक्तं वीरतन्त्रे ।

अथातः संप्रवक्ष्यामि गुरुसिद्धिपरस्पराम् ।
रहस्यं मन्त्रसिद्धेस्तु पुरश्चर्यादिभिर्विना ॥

गोपितं कोटिशास्त्रेषु इदानीं प्रकटीकृतम् ।
एवं ज्ञात्वा विशेषज्ञो गोपयेत् प्रीतये मम ॥
एतत् प्रकाशनात् लोके महाहानिः पदे पदे ॥
शिवशिखिसितभानुं पञ्चमान्त्यस्वराढ्यं
द्वितयमिदमपूर्वं बीजमुग्रप्रभायाः ।
क्षणमपि स्वमणीनां मण्डलान्तर्विभाव्य
क्षपयति दुरदृष्टं वादिराट् जायते सः ॥ १ ॥
स जयति रिपुवर्गान् वादिराज्ञो विवादे
लसति च रमणीनां चित्तचौरश्चिरायुः ।
कलयति कविराजैरप्रदृष्टं सुकाव्यं
मधुमतिरपि हेया किं पुनः सिद्धसङ्घाः ॥ २ ॥
कुलयुवतिसुयोनौ मन्त्रवर्णान् विलिख्य
निखिलनिगमवर्णान् सुप्तदोषादिदृष्टान् ।
विदितगुरुकुलान्तर्बाह्यवर्त्माविधिज्ञो
मनुपुटितसुधीमान् साधयेद्दान्तचेताः ॥ ३ ॥
कुलपथमनुसन्ध्यां योऽपि तासां स्वभूमौ
तव जननि ! जनो यं तर्पयेत्तीर्थतोयैः ।
रुधिरभवसुपुष्पैर्गन्धमाल्यानुलेपै-
रचितयुवतिवेशस्त्वद्विया ध्यायते सः ॥ ४ ॥
परिचरति समस्तैर्न्यासपूर्वैः प्रसिद्धै-
स्तव परिकरजालैर्योनिचक्रे प्रपूज्य ।
सुविमलकुलजां त्वां क्रौष्टृणावर्जितां यः
स्वयमपि रचिताङ्गः क्षोभकृद्योगिनीनाम् ॥ ५ ॥
पशुरिपुकुलचक्रं संस्पृशन्मध्यशाखां
कुलपतिकुलनाथष्ठद्वयं योजयित्वा ।
मनुपुटितविमृग्यं योजयेत्तद्बहिर्यो

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

जननि ! तव कलानां कोविदां कामरूपः ॥ ६ ॥
कुमतिरहितचित्तः संलिखेत्तां त्रिधा मे
विगतभयविवादध्वान्तजालः सुधांशुः ।
तव चरणतलान्तर्धूलिजालैर्विशालैः
चिरकलितवपुस्तद्धर्मभिर्देवपूज्यैः ॥ ७ ॥
परिचरति स विज्ञो मोक्षचर्य्याधिपश्च
मदनमदबधूनां बीजमुद्धृत्य शक्तिम् ।
तदनु कठिनबीजं ज्ञानचक्रं तदन्त-
र्यदि जपति मदन्तर्भावमासाद्य सद्यः ॥ ८ ॥
सुरनगरगतिज्ञैः सिद्धवृन्दैः प्रपूज्यः
शिवमृगमदपृथ्वीशक्तियुक्तः स्वसिद्धम् ।
हरिहरचतुरास्यस्वस्वभूतिं प्रसूतं
परमवररसज्ञः क्षोभकृत् कामिनीनाम् ॥ ९ ॥
रतिपतिरपि वाचां श्रीपतिः सार्वभौमः
मृगमदकठिनाधः कामबीजं तदग्रे ।
भुवनभयविनाशः क्षोभिणीं योजयित्वा
जपति यदि सकृद्वा चिन्तते वीरसिंहः ॥
(कुलयुवतिकुलान्तः क्षोभकृत् कामभावः) ॥१०॥ पाठान्तरम् ।
मदनमदलताधः शक्तिबीजं नियोज्य
स्मरहरहरिरूपौ कामरूपः कुबेरः ।
रिपुकुलहरिणाक्षी लोचनाम्भोजविप्रुड्-
विपुलजलनिषेकात् खण्डितान्तःस्थतापः ॥ ११ ॥
शिवमृगमदमूलं लोभमूलं समूलं
भजति यदि गुरूणां वर्त्ममूलं विमृग्यम् ।
निधिरपि निशिनाथो गौष्पतिः क्षुद्रचेताः
यदि भवति तदेतन्मुख्यमुर्वीपतित्वम् ॥ १२ ॥

वरुणरणविवर्ज्यं घ्राणमेकं विवर्ज्यं
तदुपरि मृगचिह्नं द्वन्द्वमेतद् भवान्याः ।
निखिलमनुवरेण्यं मोक्षदानैकदक्षं
सदसदमयधर्माक्षेपहृन्मन्त्रराजम् ॥ १३ ॥
अनलशिरसि घर्मं वादिराजं स्वतन्त्रं
भवसमनययुक्तं बीजमेतद्भवान्याः ।
द्वितयमपि विमानं वक्तुमीशो महेशः
किमिह कमलजन्माजन्मधारासहस्रैः ॥ १४ ॥
इह भजति य एनं मन्त्रराजं सुभाग्यैः
भवति जननि ! युष्मत्पादपद्मोत्थजन्मा ।
त्यजसि परपुमांसं मादृशं क्वापि काले
न खलु न पुनरर्घ्यं तस्य किञ्चित् कदाचित् ॥ १५ ॥
विहितगुरुसुखाद्वा बालकाद्वा पशोर्वा
लिखितमपि सुबुद्ध्या प्राप्य कस्मादकस्मात् ।
स्मररिपुपुरपारे मोक्षचर्य्याश्च पारे
परमपदविलीनः सर्वसौभाग्यभोगैः ॥ १६ ॥
अनलपुरविभागे कालिकावक्त्रबीजं
तदपि यदि विदध्यादक्षतं सान्तवर्णम् ।
नयनयुतलकारं मस्तके नामयुक्तं
तदनु विकटदंष्ट्रासोत्कटं बीजयुक्तम् ।
जपति यदि समस्तं गुह्यगुह्यातिगुह्यं
त्रिजगति किमिहास्ते क्लेशलभ्यं कथञ्चित् ॥ १७ ॥
क्रमपठितमपूर्वं सर्वमेवानुबध्यं
मनुमपि परवाच्यं तस्य मध्यस्थरूपम् ।
भजति यदि चिदानन्दात्मधृक्केवलोऽसौ
विपिनभुवि मनुष्यः कौतुकी कामदेवः ॥ १८ ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

इति ते कथितं सर्वं रहस्यं परमाद्भुतम्।
यथानुक्रमतो लोके किं न साधयति योगिराट्॥
इति श्रीपूर्णानन्दपरमहंसविरचिते श्यामारहस्ये मन्त्र-
साधनोपाय एकादशः परिच्छेदः।

अथ द्वादशः परिच्छेदः।

अथ काम्यप्रयोगो लिख्यते। तदुक्तं कालीतन्त्रे।
अथ काम्यविधिं वक्ष्ये येन सर्वत्र सर्वगः।
साधकः साधयेत् सिद्धिं देवानामपि दुर्लभाम्॥
कुलागारं पुष्पितायाः दृष्ट्वा यो जपते नरः।
अयुतैकप्रमाणेन साधकः स्थिरमानसः॥
केवलं गुप्तभावेन स तु विद्यानिधिर्भवेत्॥
अयुतैकप्रमाणेति दिनत्रयं व्याप्य अयुतं जपेदित्यर्थः। इदन्तु रात्रावेव कर्त्तव्यं न तु दिवसे विविधविधिनिन्दाश्रुतेरिति।
संस्कृताः प्राकृताः सर्वा लौकिका वैदिकास्तथा।
वशमायान्ति ते सर्वे साधकस्य न चान्यथा॥
कुलसर्वस्वेऽपि। ऋतुमत्या भगं पश्यन् यो जपेदयुतं नरः।
अनुकूलाहि तद्वाणी गद्यपद्यमयी भवेत्॥
छन्दोवद्धा परा वाणी तस्य वक्त्रात् प्रजायते।
अथ कालीतन्त्रे।
अथवा मुक्तकेशश्च हविष्यं भक्षयन्नरः।
प्रजप्य चायुतं प्राज्ञ एतदेव फलं लभेत्॥
नग्नां परस्त्रियं पश्यन् अयुतं यस्तु साधकः।
प्रजपेत् स भवेत् सद्यो विद्याया वल्लभः स्वयम्॥

तस्य दर्शनमात्रेण वादिनः कुण्ठतां गताः।
गद्यपद्यमयी वाणी सभायां तस्य जायते॥
तन्नाम्ना सुधियः सर्वे प्रणमन्ति मुदान्विताः।
तस्य वाक्यपरिचयात् जड़ा भवन्ति वाग्मिनः॥
सारसर्वस्वेऽपि।
नग्नां परस्त्रियं वीक्ष्य यो जपेदयुतं नरः।
स भवेत् सर्वविद्यानां पारगः सर्वदैव हि॥
कवित्वं जायते तस्य वाचा जीवसमो भवेत्।
अथवा मुक्तकेशश्च हविष्यं भक्षयन्नरः॥
प्रजपेदयुतं तावदेवं प्रतिनिधिर्भवेत्।
धनकामस्तु यो विद्वान् महदैश्वर्य्यकामुकः॥
बृहस्पतिसमो यस्तु कवित्वं कामयेन्नरः।
अष्टोत्तरशतं जप्त्वा कुलमामन्त्र्य मन्त्रवित्॥
मैथुनं यः प्रयात्येषः स तु सर्वफलं लभेत्।
लतारतेषु जप्तव्यं महापातकमुक्तये॥
लता यदि न संसर्गः तदा रेतः प्रयत्नतः।
समुत्सार्य्य जपेन्मन्त्रो धर्मकामार्थसिद्धये॥
महाचीनद्रुमलतावेष्टितः साधकोत्तमः।
रात्रौ यदि जपेन्मन्त्रं सैव कल्पलता भवेत्॥
महाचीनद्रुमलतावेष्टनेन च यत् फलम्।
तस्यापि षोड़शांशेन कलां नार्हन्ति ते शवाः।
शवासनाधिकफलं लतागेहप्रवेशनम्॥
अथ विशेषो यथा। तदुक्तं कुलचूड़ामणौ।
रजोऽवस्थां समालोक्य तन्मूलेष्विष्टदेवताम्।
पूजयित्वा महारात्रौ त्रिदिनं पूजयेन्मनुम्॥
लक्षपीठफलं देव! लभते नात्र संशयः।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

वेतालपादुकासिद्धिं खड्गसिद्धिञ्च भैरव ! ॥
अञ्जनं तिलकं गुप्तिं साधयेत् साधकोत्तमः ॥
प्रजपेदिति । प्रतिदिनमष्टोत्तरसहस्रमित्यर्थः ।
यत्र जापे च होमे च संख्या नोक्ता मनीषिभिः ।
तत्रेयं गणना प्रोक्ता गजाष्टकसहस्रकम् ॥
पृथ्वीमृतुमतीं वीक्ष्य सहस्रं यदि नित्यशः ।
तदा वादी सुसिद्धान्तः हतः क्षितितलं विशेत् ॥
पर्वते हस्तमारोप्य निर्भयः शुद्धमानसः ।
कवित्वं लभते सोऽपि अमृतत्वञ्च गच्छति ॥
पद्मं दृष्ट्वा तथा विन्दुं खञ्जनं शिखिनं तथा ।
चामरं रविबिम्बञ्च तिलपुष्पं सरोवरम् ॥
त्रिशूलं वीक्ष्य जप्त्वा च शतशः शुद्धभावतः ।
सुप्रसादं सुवचनं सुलोचनं सुहास्यकम् ।
सुवेशं सुभगं गन्धं सुजनं सुखमेव च ॥
लभते च यथासंख्यं शृणु पार्वति ! सादरम् ।
महाचीनक्रमेणैव देवीं ध्यात्वा प्रपूज्य च ॥
तद्द्रुमोद्भवपुष्पेण पूजयेद्भक्तिभावतः ।
स भवेत् कुलदेवश्च कुलक्रमगतः शुचिः ॥
ब्रह्मतरोर्महापद्मे देवीं ध्यात्वा यथाविधि ।
तत् सुधारसधारेण तर्पयेन्मातृकानने ॥
तिथिक्रमेण संख्याभिर्लताभिर्वेष्टितो यदि ।
तदा मासेन सिद्धिः स्यात् सहस्रजपमानतः ॥
अष्टम्यां च चतुर्दश्यां द्विगुणं यदि दृश्यते ।
तदैव महती सिद्धिर्देवानामपि दुर्लभा ॥
जपकल्पं महादेवि ! शृणुष्व कमलानने ।
स्वयं कर्त्तुमशक्तश्चेत् सम्प्रदायविदोऽथवा ॥

दैशिकेन पुरश्चर्य्यां कारयेन्मन्त्रसिद्धये ॥
तथाच योगिनीहृदये ।
तस्माज्जपं स्वयं कुर्य्याद् गुरुं वा कारयेद्बुधः ।
गुरोरभावे विप्रञ्च सर्वप्राणिहिते रतम् ॥
गृहीत्वा भाग्यतो मन्त्रमिमं सद्गुरुवक्त्रतः ।
पुरश्चर्य्यामवश्यं हि कुर्वीत विजितात्मनः ॥
उत्तरतन्त्रेऽपि । सर्वस्वेनापि कर्त्तव्यं पुरश्चरणमुत्तमम् ।
अन्यथा नाधिकारः स्यात् तस्य पूजादिषु प्रिये ! ॥
कारयित्वा पुरश्चर्य्यां मन्त्रिणं शास्त्रवेदिनम् ।
वस्त्रालङ्कारवसुभिः प्रीणयेद् देवताधिया ।
ततोऽस्य मन्त्रसिद्धिः स्याद् देवता च प्रसीदति ॥
अथ कुलसारे ।
एवंविधविधानेन पुरश्चारी भवेन्नरः ।
लक्ष्यसंख्यं जपेद्देवि ! होमं कुर्य्यात् दशांशतः ॥
विल्वपत्रेण वा देवि ! तथा नीलाम्बुजेन च ।
शर्कराघृतयुक्तेन मधुयुक्तेन वा पुनः ॥
एवं हुत्वा ततो देवि ! तर्पणञ्च तथा पुनः ।
तर्पयेत् शुद्धदुग्धैश्च तथा च विमलैर्जलैः ॥
कुम्भाख्यमुद्रया देवि ! अभिषेकं स्वमूर्द्धनि ।
ब्राह्मणान् भोजयेद्द्रव्यैः पदार्थैः षड्रसैरपि ॥
विप्राराधनमात्रेण व्यङ्गं साङ्गं भवेद् यतः ।
गोभूहिरण्यवसुभिस्तर्पयेद्दैशिकः सुधीः ॥
दैशिकाय ततो देवि ! दक्षिणां विभवावधि ।
दातव्या परमप्रीत्या कार्य्यसिद्धिमभीप्सुभिः ॥
दैशिके परितुष्टे च तुष्टाः स्युः सर्वदेवताः ।
एवंविधं जपं कृत्वा सर्वसिद्धिमुपालभेत् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ जपनियमः। तदुक्तं कुलार्णवे।

लक्षमात्रं जपेद् यस्तु महापापैः प्रमुच्यते।
लक्षद्वयेन पापानि सप्तजन्मभवान्यपि।
महापातकमुख्यानि नाशयेन्नात्र संशयः॥
चतुर्लक्षं जपेद्देवि! महावागीश्वरो भवेत्।
कुबेर इव देवेशि! पञ्चलक्षात् न संशयः॥
षड्लक्षजपमात्रेण महाविद्याधरो भवेत्।
सप्तलक्षजपान्मन्त्री खेचरो मेलको भवेत्॥
अष्टलक्षं जपन्मन्त्री देवपूज्यो भवेन्नरः।
अणिमाद्यष्टसिद्धीनां नायको भवति प्रिये!॥
वरदास्तस्य राजानः योषितस्तु विशेषतः।
नवलक्षप्रमाणानि यो जपेत् कालिकामनुम्॥
रुद्रमूर्त्तिः स्वयं कर्त्ता हर्त्ता साक्षान्न संशयः।
सर्वैर्वन्द्यः सदा सुस्थः सर्वसौभाग्यवान् भवेत्॥
यत्र वा कुत्रचिद्भागे लिङ्गं स्यात् पश्चिमामुखम्।
स्वयम्भूर्वाणलिङ्गं वा वृषशून्यं जलस्थितम्॥
पश्चिमायतनं वात्र इतराद्वापि सुव्रते!।
शक्तिक्षेत्रेषु गङ्गायां नद्यां पर्वतमस्तके।
पवित्रे सुस्थले देवि! जपेद्विद्यां प्रसन्नधीः॥

अथ यामले। एवं कृतपुरश्चर्य्यः स्वयं वा गुरुणाऽथवा।
सर्वकामसमृद्धिः स्यात् प्रयोगानथ चारयेत्॥

भैरवतन्त्रेऽपि। महापीठे शिवक्षेत्रे शून्यागारे चतुष्पथे।
पूजयित्वा गन्धपुष्पैर्धूपदीपानुलेपनैः॥
कालिकां परमेशानीं जपेदयुतमानकम्।
अष्टम्याञ्च चतुर्दश्यां संक्रान्त्यां पूर्णिमातिथौ॥
भौमकुह्वां विशेषेण स्वयं वा गुरुणाऽथवा।

जपेत् सहस्रमानन्तु साष्टं शतमथापि वा॥
होमयेन्मधुरोपेतैः पायसैः सर्वसिद्धये।

कुलसर्वस्वेऽपि।

कारयित्वा स्वस्त्ययनं द्विजिनागमवेदिना।
प्रतोष्य दक्षिणाभिस्तं वसेत् कल्पायुतं दिवि॥

कुलसारसंग्रहे।

पुष्यकाले युगाद्यायां पुष्ये मूलोत्तरासु च।
सुगन्धिकुसुमैर्देवीमर्चयित्वा वरानने!॥
जपेत् साष्टसहस्रैस्तु तर्पयेद् दुग्धखण्डकैः।
महतीं श्रियमाप्नोति राजानस्तस्य किङ्कराः॥

वीरतन्त्रे च। आनीय देशिकं शुद्धं जितेन्द्रियञ्चापि द्विजम्।
कारयीत जपं रात्रौ पूजयित्वा महेश्वरीम्॥
गन्धताम्बूलधूपाद्यैर्नैवेद्यैश्च पृथग्विधैः।
अष्टोत्तरसहस्रन्तु साष्टं शतमथापि वा॥
प्रत्यहं कारयेद्धीमान् यावत्त्रिंशद्दिनं भवेत्।
पूर्णमासे तु मन्त्रज्ञं तोषयेत् धनधान्यकैः॥
पुत्रवत् पालयत्येषा कालिकासाधकं सदा।
अवश्यं कालिकामन्त्रे जपो रात्रौ मतः प्रिये!॥
पूज्यो गुरुः सदा चास्मिन् परमोऽपि गुरुस्तथा।
परमेष्ठिगुरुश्चैव परापरगुरुस्तथा॥
उत्तरोत्तरतश्चैषां प्रशस्ता जपकर्मणि।
गुरुर्न रूक्षो द्रष्टव्यो नापि क्षुब्धस्तथैव च॥
इदं रहस्यं देवेशि! नाभक्ताय प्रदर्शयेत्।
कुलज्ञाय सुशीलाय वदान्याय महात्मने॥
गुरुभक्ताय शान्ताय सर्वभूतहिताय च।
प्रदद्याद् देशिको देवि! विधानं कालिकामतम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथ निशायां दीक्षितायां कुलनायिकां समानीय व्यापकन्यासं कुर्य्यात्।

प्रथमं साधकश्रेष्ठो देवीकूटस्य मन्त्रवित्।
विलिख्य मन्त्रं पूर्वोक्तं पूजयेत् कुलवर्त्मना॥
पीठदेवीं प्रथमे च पूजयेद् गन्धपुष्पकैः।
महाभागं ततो मूलदेवीमावरणैः सह॥
लक्षैकं तत्र जप्त्वा तु चोड्डीयानं ततो विशेत्।
देवीकूटस्येति पादपद्मोपरि।
तत्पीठे योगनिद्राख्यां पूजयित्वा ततो जपेत्॥
निजेष्टदेवतां तत्र जपेत् लक्षं समाहितः।
उड्डीयानमरुयुगमित्यर्थः।
कामरूपं ततो ध्यात्वा तत्र कात्यायनीं जपेत्।
कामरूपं प्रजापतिमित्यर्थः।
तत्रापि लक्षमानेन जप्त्वा मन्त्रं समाहितः।
ततः पूर्णगृहं गत्वा यजेच्चण्डीं ततो जपेत्॥

पूर्णगिरौ शिरसि इत्यर्थः। यजेदिति मूलदेवीं सावरणां प्रपूज्य लक्षं जपेदित्यर्थः।

कामरूपान्तरे वत्स! कामाख्यां प्रथमं यजेत्।
कामरूपं विन्दुचक्रं जप्त्वा रात्रौ समाहितः॥
संख्यापूर्त्तौ पुनः पृच्छेत् का त्वं देवि! कुलोत्तमे!।
एवं कृते विस्मृतश्चेत् स्वनामगोत्रकान्यपि॥
तत्रेष्टदैवतेरेव शृणुष्व वरमुत्तमम्।
ततः प्रणम्य देवेशीं शृणुयाद्वरमुत्तमम्॥
एवं जपवशादेव पुनः पूर्वोक्तमाचरेत्।
अक्षोभितकुलाचारपरिचर्य्यापरायणः।
अथवा सर्वपीठेषु यजेन्महिषमर्दिनीम्॥

ततः प्रसन्ना भवति स्वैरं कुलवरं प्रिये!।
ततो जप्त्वा मूलमन्त्रं सर्वसिद्धीश्वरो भवेत्॥

इति पूर्णानन्दपरमहंसविरचिते श्यामारहस्ये
द्वादशः परिच्छेदः।

अथ त्रयोदशः परिच्छेदः।

अत्र ग्रन्थगौरवभयात् महाभयादिपीठक्रमो न लिखितः। किन्तु सर्वपीठे महिषमर्दिनीपूजायाः विहितत्वात् तत् क्रमो लिख्यते। तदुक्तं कुलचूड़ामणौ।

भैरव उवाच।

मातर्महिषमर्दिन्याः सङ्केतं कथयस्व नः।
कुलाचारस्य संसिद्धौ भुक्तिमुक्तिप्रसिद्धये॥

श्रीदेव्युवाच।

सृष्टिस्थितिविनाशानामादिभूता महेश्वरी।
गोप्या सर्वप्रयत्नेन शृणु तां कथयामि ते॥
त्रैलोक्यबीजभूतान्ते सम्बोधनपदं ततः।
सृष्टिसंहारवर्णौ द्वौ निष्ठा महिषमर्दिनी॥

अस्यार्थः। मदनरिपुशक्तिबीजान्ते महिषमर्दिनीपदमाभिमुख्यार्थेनोद्धृत्य वह्निललनासुद्धरेदिति।

अतिगुह्यतरा विद्या सृष्टिस्थितिविधायिनी।
सर्वदेवसर्वसिद्धिबीजभूता सनातनी॥
न कस्मैचित् प्रदातव्या कथिता सिद्धिदायिनी।
अत्यन्तगुरुभक्ताय शिष्याय यदि कथ्यते।
तदाष्टवर्णं वक्तव्यं न बीजं नापि साधनम्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तदुक्तं तन्त्रान्तरे।

आदौ दुर्गां ततो वर्णां ततोऽपि आद्यकाह्वयाम्।
ततः कनकप्रभाञ्चैव क्षत्तिकामभयप्रदाम्॥
कन्यकाञ्च स्वरूपाञ्च यजेत् पूर्वादितः सुधीः॥

कुलचूड़ामणौ।

अष्टपत्रे यजेद्देवीं दुर्गाद्यां दीर्घपूर्विकाम्।

दीर्घशब्देन अत्र पारिभाषिकग्रहणम्। तेन आ ई ऊ ए ऐ ओ औ अः इति शारदाटीकाकारेणोक्तम्। ततो देव्या दक्षोर्द्ध्वहस्ततः पत्राग्रे यं चक्राय नमः वं खड्गाय नमः लं बाणाय नमः वं शूलाय नमः। वामोर्द्ध्वतः शं शङ्खाय नमः चं चर्मणे नमः। हं तर्जनाय नमः सं धनुषे नमः इति पूजयेत्। तदुक्तं तत्रैव।

आयुधानि पलाशाग्रे यादिभिः क्रमशो यजेत्।

ततोऽष्टदलवाह्ये ब्रह्माण्याद्यष्टशक्तीः प्रपूज्य चतुरस्रे पूर्वादिक्रमेण लोकपालान् तद्बहिस्तदस्त्राणि पूजयेत्। तदुक्तं तत्रैव।

ब्रह्माण्याद्यास्ततः पश्चात् लोकपालान् ततो वहिः।
तदस्त्राणि सिद्धमन्त्री प्रयोगञ्च समाचरेत्॥

ततः पुनर्देवीं संपज्य यथाशक्ति जपं कृत्वा अर्घ्यजलपुष्पाभ्यां गुह्यातिगुह्यमन्त्रेण देव्या वामकरे जपं समर्प्य स्तुतिं कृत्वा प्रदक्षिणाष्टाङ्गप्रणामं विधाय देवीं स्वहृदि विसर्जयेदिति।

अथ पुरश्चरणनियमो यथा।

अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः।
ततो होमदशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्मण

भोजनमिति पुरश्चरणाङ्गत्वाद् दक्षिणा। होमद्रव्यनियमो यथा।

वशयेत्तिलहोमेन नरान्नरपतीनपि।
सिद्धार्थैर्जुहुयान्मन्त्री रोगैर्मुच्येत तत्क्षणात्॥
पद्मं हुत्वा यजेत् शत्रून् दूर्वाभिः शान्तिमेव च।
पलाशकुसुमैः पुष्टिर्धान्यैः धान्यश्रियं लभेत्॥
काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम्।
मरीचहोमैर्मरणं रिपुराप्नोति सर्वदा॥
क्षुद्राभिचारभूतादीन् ध्यात्वा देवीं विनाशयेत्।

कुलचूड़ामणौ। प्रयोगहोमसंशये सहस्रवसुसंज्ञकम्॥

एषा विद्या महाविद्या न देया यस्य कस्यचित्।
यदि भाग्यवशाद्देवि! कुलदेवी कुलोत्तमैः॥
दीक्षिता कुलजाभिस्तु सिद्धिदा सैव नान्यथा॥

गुप्तरहस्योक्तं महिषमर्दिन्याः कवचं लिख्यते।

भैरव उवाच। शृणु देवि! प्रवक्ष्यामि मर्दिन्याः कवचं शुभम्।

यस्याराधनमात्रेण महाभैरवतां व्रजेत्॥
देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये।
पन्नगैराक्षसैर्मर्त्यैर्मुनिभिः सेवितं सदा॥
अस्याः कवचं महापुण्यं स्वयं वक्त्राद् विनिःसृतम्।
भूप्रदेशे समे शुद्धे पुष्पप्रकरसंकुले।
कल्पयेदासनं धीमान् कौसलं कम्बलासनम्॥
वामे गुरुं पुनर्नत्वा दक्षिणे च गणाधिपम्।
मध्ये तु मर्दिनीं नत्वा सर्वे रक्षन्तु मां सदा॥
आग्नेय्यां नैर्ऋते पातु चैशान्यां वायवे तथा।
उत्तरे पातु ललिता जिह्वाललनभीषणा॥
कौमारी पश्चिमे पातु धनदा च दिशो दशः।

CC-0. Prof. Satya Vrat Shastri Collection, Chennai. Digtized by Muthulakshmi Research Academy

साधारणी प्राणविद्या हृल्लेखा सिद्धिगोचरा ।
एतत् पूर्वस्थिता देवी गुरुसिद्धिप्रणाशिनी ॥
विशेषतः कलियुगे महासिद्धौघदायिनी ।
गुरूणां कुलनाथानां महाशापप्रदायिनी ॥
जयदुर्गा त्वया प्रोक्ता परमा सिंहवाहिनी ।
त्रैलोक्यबीजभूतान्ते सा परा मर्दिनी कुलम् ॥
वरं वह्निप्रियायुक्ता देवाननसमन्विता ।
दत्ता ते परमा विद्या ङेयुक्ता हृदयान्विता ॥
सर्वत्र कुलशास्त्रज्ञे ! महाशापप्रदायिनी ।
तस्मात् सर्वप्रयत्नेन गोप्तव्येयं नवाक्षरी ॥
अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः ।
नारदोऽस्य ऋषिः प्रोक्तश्छन्दोगायत्र्यमीरितम् ॥
देवता महिषघ्नीयं पूर्वं बीजं परापरा ॥

अथ अस्याः पूजाक्रमः । प्रातःकृत्यादि स्नानादिकं विधाय द्वारदेवताः पूजयेत् । तदुक्तं तन्त्रान्तरे ।

ऊर्ध्वोडुम्बरके विघ्नं महालक्ष्मीं सरस्वतीम् ॥
ततो-दक्षिणशाखायां विघ्नं क्षेत्रेशमध्यतः ।
तयोः पार्श्वगते गङ्गायमुने पुष्पवारिभिः ॥
देहल्या मर्चयेदस्त्रं प्रतिद्वारमिति क्रमात् ।

ततस्त्रिविधविघ्नोत्सारणं स्थापनं भूतशुद्धिं प्राणायामञ्च पूर्ववत् कृत्वा ऋष्यादिन्यासान् कुर्य्यात् । तदुक्तम् । नारद-ऋषिर्गायत्रीच्छन्दः श्रीमहिषमर्दिनी देवता ह्रीं बीजं स्वाहा शक्तिर्महिषमर्दिनीकीलकं चतुर्वर्ग इत्यभिलप्य पूर्ववत् न्यसेत् । तदा करन्यासं कुर्य्याद् यथा । ओं महिषहिंसके ! हुं फट् अङ्गुष्ठाभ्यां नमः । ओं महिषशत्रो ! सर्वे हुं फट् तर्जनीभ्यां स्वाहा ओं महिषं हिंसय हुं फट् मध्यमाभ्यां वषट् । महिषं

हन हन देवि ! हुं फट् अनामिकाभ्यां हुं । ओं महिषमर्दिनि ! हुं फट् करतलपृष्ठाभ्यां अस्त्राय फट् । इति न्यस्य एवं पञ्चापञ्चाङ्गेषु अङ्गन्यासं कृत्वा ऊर्ध्वोर्ध्वतालत्रयं कृत्वा दशदिग्बन्धनं कुर्य्यात् । तदुक्तं तत्रैव ।

ओं महिषहिंसके ! हुं फट् हृदयाय नमो हृदि ।
ओं महिषशत्रो ! सर्वे हुं फट् शिर उदीरितम् ॥
ओं महिषं हिंसय हुं फट् शिखामन्त्र उदीरितम् ।
ओं महिषं हन हन देवि ! हुं फट् कवच इत्यपि ॥
ओं महिषमर्दिनि ! हुं फट् अस्त्राणि शृणु भैरव ! ॥

ततः पूर्ववन्मातृकान्यासव्यापकन्यासौ कृत्वा कुलकुसुमादिना वृत्तषोड़शदलकेशराष्टदलाष्टवर्णयुक्तं वृत्तचतुरस्रं चतुर्द्वारकर्णिकाद्यबीजात्मकं यन्त्रं निर्माय पुरतः सिंहासने संस्थाप्य तत्राधारशक्त्यादिपीठदेवताः च संपूज्य पूर्ववदर्घ्यस्थापनादिकं कृत्वा देवीं ध्यात्वा पूजयेत् तदुक्तं तत्रैव ।

ध्यायेत् कालीं महादैत्ययुद्धवासरसोन्मुखीम् ।
दक्षिणे चक्रखड्गौ च बाणशूलौ तथैव च ॥
वामे शङ्खं तथा चर्म धनुस्तर्जनमेव च ।
बिभ्रतीं कालतीव्रोरुमहिषाङ्गनिषेदुषीम् ॥
पीताम्बरधरां देवीं पीनोन्नतकुचद्वयाम् ।
जटासुकुटशोभाढ्यां पिष्टभूमिसुखावहाम् ॥

एवं ध्यात्वा मानसोपचारैः संपूज्य आवाहनादिकं कृत्वा षोड़शोपचारैः देवीं पूजयेत् । अङ्गमन्त्रैरङ्गानि संपूज्य कामाख्यां दिशि पर्य्यन्तं पूर्वोक्तप्रह्लादानन्दनाथादिगुरुपंक्तिं गुरुपरमगुरुपरमेष्ठिगुरूंश्च पूजयेत् । पूर्वाद्यष्टदले आं दुर्गायै ईं वरवर्णिन्यै ऊं आद्यायै एं कनकप्रभायै ऐं कृत्तिकायै ओं अभयप्रदायै औं कन्यायै अः स्वरूपायै नम इति पूजयेत् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

तदुक्तं तन्त्रान्तरे।

आदौ दुर्गां ततो वर्णां ततोऽपि आद्यकाह्वयाम्।
ततः कनकप्रभाञ्चैव कृत्तिकामभयप्रदाम्॥
कन्यकाञ्च स्वरूपाञ्च यजेत् पूर्वादितः सुधीः॥

कुलचूड़ामणौ।

अष्टपत्रे यजेद्देवीं दुर्गाद्यां दीर्घपूर्विकाम्।

दीर्घशब्देन अत्र पारिभाषिकग्रहणम्। तेन आ ई ऊ ए ऐ ओ औ अः इति शारदाटीकाकारेणोक्तम्। ततो देव्या दक्षोर्द्ध्वहस्ततः पत्राग्रे यं चक्राय नमः वं खड्गाय नमः लं बाणाय नमः वं शूलाय नमः। वामोर्द्ध्वतः शं शङ्खाय नमः चं चर्मणे नमः। हं तर्जनाय नमः सं धनुषे नमः इति पूजयेत्। तदुक्तं तत्रैव।

आयुधानि पलाशाग्रे यादिभिः क्रमशो यजेत्।

ततोऽष्टदलबाह्ये ब्रह्माण्याद्यष्टशक्तीः प्रपूज्य चतुरस्रे पूर्वादिक्रमेण लोकपालान् तद्बहिस्तदस्त्राणि पूजयेत्। तदुक्तं तत्रैव।

ब्रह्माण्याद्यास्ततः पश्चात् लोकपालान् ततो बहिः।
तदस्त्राणि सिद्धमन्त्री प्रयोगञ्च समाचरेत्॥

ततः पुनर्देवीं संपज्य यथाशक्ति जपं कृत्वा अर्घ्यजलपुष्पाभ्यां गुह्यातिगुह्यमन्त्रेण देव्या वामकरे जपं समर्प्य स्तुतिं कृत्वा प्रदक्षिणाष्टाङ्गप्रणामं विधाय देवीं स्वहृदि विसर्जयेदिति।

अथ पुरश्चरणनियमो यथा।

अष्टलक्षं जपेन्मन्त्रं तद्दशांशं हुनेत्ततः।
ततो होमदशांशतर्पणं तद्दशांशाभिषेकं तद्दशांशब्राह्मण-

भोजनमिति पुरश्चरणाङ्गत्वाद् दक्षिणा। होमद्रव्यनियमो यथा।

वशयेत्तिलहोमेन नरान्नरपतीनपि।
सिद्धार्थैर्जुहुयान्मन्त्री रोगैर्मुच्येत तत्क्षणात्॥
पद्मं हुत्वा यजेत् शत्रून् दूर्वाभिः शान्तिमेव च।
पलाशकुसुमैः पुष्टिर्धान्यैः धान्यश्रियं लभेत्॥
काकपक्षैः कृतो होमो द्वेषं वितनुते नृणाम्।
मरीचहोमैर्मरणं रिपुराप्नोति सर्वदा॥
क्षुद्राभिचारभूतादीन् ध्यात्वा देवीं विनाशयेत्।

कुलचूड़ामणौ। प्रयोगहोमसंशये सहस्रवसुसंज्ञकम्॥

एषा विद्या महाविद्या न देया यस्य कस्यचित्।
यदि भाग्यवशाद्देवि! कुलदेवी कुलोत्तमैः॥
दीक्षिता कुलजाभिस्तु सिद्धिदा सैव नान्यथा॥

गुप्तरहस्योक्तं महिषमर्दिन्याः कवचं लिख्यते।

भैरव उवाच। शृणु देवि! प्रवक्ष्यामि मर्दिन्याः कवचं शुभम्।

यस्याराधनमात्रेण महाभैरवतां व्रजेत्॥
देवैर्देवत्वविषये सिद्धैः खेचरसिद्धये।
पन्नगैराक्षसैर्मर्त्यैर्मुनिभिः सेवितं सदा॥
अस्याः कवचं महापुण्यं स्वयं वक्त्राद् विनिःसृतम्।
भूप्रदेशे समे शुद्धे पुष्पप्रकरसंकुले।
कल्पयेदासनं धीमान् कोमलं कम्बलासनम्॥
वामे गुरुं पुनर्नत्वा दक्षिणे च गणाधिपम्।
मध्ये तु मर्दिनीं नत्वा सर्वे रक्षन्तु मां सदा॥
आग्नेय्यां नैर्ऋते पातु चैशान्यां वायवे तथा।
उत्तरे पातु ललिता जिह्वाललनभीषणा॥
कौमारी पश्चिमे पातु धनदा च दिशो दशः।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

शाकिनी डाकिनी पातु मर्दिनी पातु सर्वदा ॥
कल्पवृक्षः सदा पातु विघ्ने च रक्तदन्तिका ।
एतास्तु वरयोगिन्यो रक्षन्तु साधकाग्रतः ॥
पठित्वा पाठयित्वा च कवचं सिद्धिदायकम् ।
पठेन्मासत्रयं मन्त्री वारमेकं तथा निशि ॥
रात्रौ वारत्रयं जप्त्वा नाशयेद्विघ्नमेव च ।
जपन्मासत्रयं विद्यां राजानं वशमानयेत् ॥
भीतो भयात् प्रमुच्येत देवि ! सत्यं न संशयः ।
अप्रकाश्य मिदं गुह्यं न देयं यस्य कस्यचित् ॥
सत्कुलीनाय शान्ताय सुजने दम्भवर्जिते ।
दद्यात् स्तोत्रमिदं पुण्यं सर्वकर्मफलप्रदम् ॥
कवचं यो न जानाति जपेन्महिषमर्दिनीम् ।
दारिद्र्यत्वं भवेत्तस्य सत्यं सत्यं वदाम्यहम् ।
अनया सदृशी विद्या नास्ति तन्त्रेषु गोपिता ॥

इति कवचं समाप्तम् ।

अथ स्तुतिः तदुक्तं कुलचूडामणौ । भैरव उवाच ।

मच्चित्ते चर चण्डि ! चूर्णितदुराचारप्रचण्डासवे
स्वैरं दारय भूवि दुर्धरदवद्रोहोर्मिमर्मास्पदः ।
तेनायं निरुपद्रुतो निरुपमश्रीपादपद्माटवी-
प्रान्तानन्तवशान्तरे मम मनोहंसश्चिरं नन्दतु ॥ १ ॥
हित्वा चण्डि ! हिरण्यदारणपटुप्रोद्दामदन्ताङ्गुलिः
स्फालत्कल्पसुमेरुसादरसटाटोपं नृसिंहं सुराः ।
मातस्तत्पशुपाशपेशलपटुश्रीपादसंसेविनं
सेवन्ते करिवैरिणं किमरिभिर्भीतिर्भवत्सेविनाम् ॥ २ ॥
चण्डि ! त्वद्विषयान्तरक्षणपदं श्रोत्रान्तरं चोद्धतं
तत्तत्त्वं पुरुषप्रकृत्यनुगतं ब्रह्मादिभिर्गीयते ।

तस्माद्देवि ! समस्तदैवतसुधासारैकधामस्फुरत्-
श्रीमत्पादसरोजचुम्बनपरं मामद्य सम्भावय ॥ ३ ॥
मन्निद्रा यदि वास्तु तत्कुलपथाचाराद्दरं मास्तु वा
कीर्त्तिः केशवकौशिकार्चनकरी नैवास्तु सत्सन्निधिः ।
मातर्ब्रह्महरिस्मरारिहुतभुग्दैत्यारिसेवापद-
श्रीमत्पादसरोजचिन्तनविधौ चित्तं सदैवास्तु नः ॥ ४ ॥
निर्दिष्टोऽस्मि यदि त्वदीयपदयुक्पूर्वापरीभावने
निर्दिष्टस्य तदा ममापि विरलं किंवास्तु सिद्धास्पदम् ।
तस्माद्देवि ! कृपाभवाञ्छितभवं श्रीपादपद्मद्वयं
मच्चित्ते चतसम्पदि प्रसरतु क्षेमङ्करि ! क्षम्यताम् ॥ ५ ॥
स्वात्मानं परिरभ्य भूतपतिरप्युन्मादमासादितः
स्वैरं जीवनरक्षणे स च कृतो नैवाभविष्यत् प्रभुः ।
दैवाद्विच्युतचन्द्रचन्दनवनप्रागल्भगर्भस्रव-
न्माध्वीपूर्णभवत्पदैककमलामोदेन नास्वादितः ॥ ६ ॥
हाहा मातरनादिमोहजलधिव्याहारसिद्धाखिल-
ब्रह्मानन्दरसाभिषेकनिरसस्वान्तोदरैर्मादृशः ।
अस्माकं सुरवृन्दनिर्भरमनस्तापाभिभूतिक्षम-
श्रीमद्भक्तिरसातिदुर्दिनपरीणाहः सदा सर्पतु ॥ ७ ॥
यत्पादस्फुरदंशुजालजठराचण्डांशुकोटिस्खलत्-
स्वान्तध्वान्तविसारिनिर्मलचिदानन्दत्रयं दैवतम् ।
स्वर्गं संसृजते स्थितिं वितनुते सृष्टिं पुनर्लुम्पते
प्रोद्भिन्नाञ्जननीलनीरजमहच्चित्ते तदेवास्तु नः ॥ ८ ॥
या शश्वन्महिषच्छलस्फुरमिलद्गर्भद्विधारस्फुर-
द्भक्तान्तः प्रसरत्तमस्तमशिरो दैत्यं समालम्बते ।
सा दुर्गा भयदुर्गदुर्गतिहरा लम्बान्तरवासिनी
दृप्यद्दैवतवैरिमारणपटुर्जीयाज्जयाह्लादिनी ॥ ९ ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

नृत्यत्खेटकचामराञ्जनचरच्चक्राद्यखड्गावर-
स्फायच्छैलशिलीमुखोच्छलदनल्पाजिच्युतास्त्रायुधौ ।
वाञ्छावात-विसर्पिनर्त्तितशिरःसाटोपदुष्टासुर-
द्रुव्यत्खण्डविखण्डिताखिलशकुन्तक्षुत्पिपासाकुलैः ॥१०॥
काञ्चीकल्पविरामकालकलितां तीव्रोरुसम्पादको-
न्माद्यन्माहिषतिर्य्यगायतशिरःशृङ्गान्तरालस्थले ।
वर्णैर्वर्णसुपत्रमध्यकलिते रक्षाश्रुती मातृभिः
सेव्ये चारुवराङ्गने रणमुदा चूर्णायमानां स्मरेत् ॥ ११ ॥
ऊर्द्ध्वाधःक्रमसव्यवामकरयोश्चक्रं दरं कर्त्तृका
खेटं वाणधनुस्त्रिशूलभयकृन्मुद्रां दधानां शिवाम् ।
श्यामां नीलघनोच्चकुन्तलचयप्रोन्नद्धजूटास्फल-
द्वीरास्फाललसत्करालवदनां घोराट्टहासोद्भटीम् ॥ १२ ॥
एवं ये भवदेवि ! मूर्त्तिमनघां ध्यायन्ति दुर्गादिभिः
शक्राद्यैरपि पूजितां परपुरक्षोभादिकं कुर्वते ।
राज्यं शत्रुजयः सदर्थधिषणा काव्यामृतं देशिकः
स्तम्भोच्चाटनमारणादिकृतिनां तेषां स्वयं जायते ॥ १३ ॥
स्तोत्रं ते चरणारविन्दयुगलध्यानावधानान्मया
मन्त्रोद्धारकुलोपचाररचितं गुप्तोपदेष्टा यदि ।
ये शृण्वन्ति पठन्ति देवि ! सहसा श्रीमोक्षकामादय-
स्तेषां हस्तगता भवन्ति जगतां मातर्नमस्ते जयः ।

इति स्तुतिः समाप्ता ।

चितामध्ये च यो दद्याद् बलित्रितयमुत्तमम् ।
कालरात्रि ! महाकालि ! कालिके ! घोरनिस्वने ! ।
गृहाणेमं बलिं मातर्देहि सिद्धिमनुत्तमाम् ।
कालकायं बलिं दत्त्वा पञ्चगव्येन सुन्दरि ! ॥
अस्थिसंप्रोक्षणं कृत्वा पीठमन्त्रं न्यसेत्ततः ।

भूर्जे वा वटपत्रे वा तत्र पीठमनुं न्यसेत् ॥
पीठमास्तीर्य्य तस्मिन् वै न्यसेद्वीरासनं ततः ।
वीरासनेन देवेशि ! रक्षां दिक्षु प्रकल्पयेत् ॥
कूर्चयुग्मद्वयं देवि ! मायायुग्मं ततः परम् ।
कालिके ! घोरदंष्ट्रे ! च प्रचण्डे ! चण्डनायिके ! ॥
दानवान् द्रावयेत्युक्त्वा हनेति द्वितयं ततः ।
शवशरीरमहाविघ्नं छेदय द्वितयं ततः ॥
हिठान्ते वर्मशस्त्रान्ते वीराह्वोऽयं मनुर्मतः ।
अनेन मन्त्रेण लोष्टं पार्श्वे दिक्षु विनिःक्षिपेत् ॥
तन्मध्ये भैरवो देवो न विघ्नैः परिभूयते ।
यदि प्रमादाद्देवेशि ! साधको भयविह्वलः ॥
ततस्तैस्तैः सुहृद्वर्गैः रक्षिता नाभिभूतयः ।
अर्केन्दुसितवाद्यालमूलैर्निर्मितवर्त्तिकाम् ॥
प्रदीपं तत्र संस्थाप्य अस्त्रं तत्र प्रपूजयेत् ।
ऋते तस्मिन् महादीपे विघ्नैश्च परिभूयते ॥
तदधश्चास्त्रमन्त्रेण निखनेत् कुलदीपकम् ।
तत्तत् कल्पविधानेन भूतशुद्ध्यादिकं चरेत् ॥
सोढां वा तारकं वापि विन्यस्य पूजनं ततः ।
मन्त्रध्यानपरो भूत्वा जपेन्मन्त्रमनन्यधीः ॥
एकाक्षरी यदि भवेत् दिक्सहस्रं ततो जपेत् ।
द्व्यक्षरे चाष्टसाहस्रं त्र्यक्षरे त्वयुतार्द्धकम् ॥
अतःपरन्तु मन्त्रज्ञो गजान्तकसहस्रकम् ।
निशाप्रान्तं समारभ्य उदयान्तं समाचरेत् ॥
अन्यत्रापि । पञ्चोपचारेण पुरतो देवतां परिपूजयेत् ।
यद्यसत्यभयं वापि नेत्रे वस्त्रेण बन्धयेत् ॥
ततोऽर्द्धरात्रिपर्य्यन्तं यदि किञ्चिन्न पश्यति ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

जयदुर्गामनुनार्घ्यं तेनैव सर्षपान् क्षिपेत् ॥

जयदुर्गामन्त्रो यथा । तदुक्तं बृहन्मत्स्यसूक्ते ।

तारो दुर्गे युगं रक्षि ततो ढान्तं सलोचनम् ।
द्विठान्ता जयदुर्गेयं विद्या वेद्या दशाक्षरी ॥
तिलोऽसि सोमदैवत्यो गोसवःसृष्टिकारकः ।
पितॄणां स्वर्गतुष्ट्यर्थं मर्त्यानान्तु स रक्षकः ॥
भूतप्रेतपिशाचानां विघ्नेषु शान्तिकारकः ।
इति क्षिप्त्वा तिलानात्मचतुर्भागे शिवादितः ॥
ततः सप्तपदं गत्वा पुनस्तत्रैव संविशेत् ।
देवं तत्रापि संपूज्य पूजयेन्मनुमुत्तमम् ॥
निर्भयः प्रजपेद् यावत् सिद्धिरग्रे भवेन्नरः ।
तत् सत्यं कारयित्वा च वरयेद्वरमुत्तमम् ॥
यदा वलिं प्रार्थयते नरं कुञ्जरमेव वा ।
दिनान्तरे च दास्यामि स्वीकृत्य च गृहं व्रजेत् ॥
परेऽह्नि च ततो दद्यात् पिष्टेन नवकुञ्जरान् ।

यवोद्भवेन धान्योद्भवेन वा । तदुक्तं तन्त्रान्तरे ।

यत्र क्षेत्रमयं वापि शालिधान्योद्भवञ्च वा ।
चन्द्रहासेन विधिवत् तत्तन्मन्त्रेण घातयेत् ॥
चन्द्रहासेनार्द्धचन्द्राकृतिखड्गेन इत्यर्थः ।

नीलतन्त्रेऽपि । जपादौ तु वलिं दद्यात् पश्चादपि वलिं हरेत् ।
जपान्ते जपमध्ये वा देहि देहीति भाषते ॥
तदापि च बलिं दद्यात् महिषं छागमेव वा ।
न दित्सु वीक्षणं किञ्चिन्न च बन्धुसमागमः ॥
जलादिदुर्गसर्पाणां दक्षिणां विभवावधि ।
गुरवे गुरुपुत्राय तत्पत्नैर वा प्रदापयेत् ॥
सम्यक् सिद्धैकमन्त्रस्य नासाध्यमिह किञ्चन ।

बहुमन्त्ररतः पुंसः का कथा शिव एव सः ॥

श्मशानविशेषो यथा । तदुक्तं कुलसद्भावे ।

श्मशानालयमागत्य मुक्तकेशो दिगम्बरः ।
जपेदयुतसंख्यन्तु सर्वकामार्थसिद्धये ॥
तत्रैव प्रेतमारुह्य प्रजपेन्मन्त्रमुत्तमम् ।
अयुतं मैथुनीभूत्वा विभीः सत्यपरायणः ॥
स याति परमां सिद्धिं देवैरपि सुदुर्लभाम् ।
आकर्षणवशीकारमारणोच्चाटनादिकम् ॥
स्तम्भनं मोहनञ्चैव द्रावणं त्रासनं तथा ।
वाग्मित्वञ्च धनित्वञ्च बहुपुत्रत्वमेव च ॥
बहुवल्लभतामेति सर्वप्रियत्वमेव हि ।
स याति खेचरत्वञ्च देवैरपि सुदुर्लभम् ॥
न जरा न च मृत्युश्च न रोगो न च घातनम् ।
अथवा स भवेन्नित्यं कर्त्तुर्विंशतिसिद्धियुक् ॥
स्वदेहरुधिराक्तैश्च बिल्वपत्रैः सहस्रशः ।
श्मशानेऽभ्यर्च्य देवीञ्च वागीशसमतां व्रजेत् ॥

नीलतन्त्रे च । महाचीनद्रुमलतामज्जाभिर्बिल्वपत्रकम् ।
सहस्रं देवीमभ्यर्च्य श्मशाने साधकोत्तमः ॥
तदा राज्यमवाप्नोति यदि नैवं पलायते ।
अनादित्यं यथा दृष्ट्वा लक्षं जपति भूमिपः ॥
निर्मलाञ्च ततो दृष्ट्वा वश्यार्थमयुतं जपेत् ॥

भैरवतन्त्रेऽपि ।

श्मशाने योषितं मन्त्री संपूज्य ऋतुगां शुभाम् ।
रक्तचन्दनसिक्ताङ्गीं रक्तवस्त्रैरलङ्कृताम् ॥
तावत् पुष्पैर्मनुं प्रोच्य ततो ध्यायेच्च चण्डिकाम् ।
पूजयित्वा लभेत् राज्यं यदि न वितयायते ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मेषमहिषरक्तेन वाग्मित्वं तस्य जायते ।
धनित्वं जायते तस्य सर्वसिद्धिः प्रजायते ॥
वचसा स भवेज्जीवो धनेन च धनाधिपः ।
आज्ञया देवराजोऽसौ रूपेणैव मनोभवः ॥
बलेन पवनो ह्येष सर्वतत्त्वार्थसाधकः ।
साधितं शोधितं मांसं साखि दद्यात् सदा वलिम् ॥
मूषमांसं छागमांसं मैषं माहिषमेव च ।
सर्वं साखि प्रदातव्यं तथा लोमसमन्वितम् ॥
अजीवं स्वनखच्छिन्नं केशं संमार्जनास्पदम् ।
निवेदयेत् श्मशाने च सर्वसिद्धिप्रदं भवेत् ॥
नारीरजोऽन्वितं कृत्वा पत्राणां शतमुत्तमम् ।
प्रत्येकं प्रजपेन्मन्त्रं ततो होमं समाचरेत् ॥
युगानामयुतं देवि ! पूजिता दक्षिणा भवेत् ।
सर्वसिद्धिर्भवेत्तस्य वाग्मी धीरश्च जायते ॥
न तस्य दुर्लभं किञ्चित् पृथिव्यां तस्य जायते ।

कुलसद्भावेऽपि ।

रेतोयुक्तेन पुष्पेण चार्कस्यैव सहस्रशः ।
श्मशानेऽभ्यर्च्य कालीं तु सर्वसिद्धिं स विन्दति ॥
धनवान् बलवान् वाग्मी सर्वयोषित्प्रियः सुखी ।
जायते नात्र सन्देहो महाकालवचो यथा ॥
श्मशाने शयनं यस्य शवासनगतः पुमान् ।
असकृच्च जपेन्मन्त्रं सर्वसिद्धिप्रदो भवेत् ॥
तर्पयेच्च शवास्ये तु रक्तमांसादिभिस्तथा ।
त्रिभिर्मन्त्रमुदीर्य्यैवं सर्वसिद्धिर्भवेत्ततः ॥
तर्पयेच्च पयोभिश्च रक्तधारायुतै स्तथा ।
रेतोभिश्च तथा तद्वत् स्वकीयेन कचेन च ॥

मैथुनाजितयोषायाः कुलप्रक्षालनेन च ।
मेषमाहिषरक्तेन नररक्तेन चैव हि ॥
मूषमार्जाररक्तेन वाग्मित्वं तस्य जायते ।
वलित्वं जायते तस्य सर्वसिद्धिश्च जायते ॥

भावचूड़ामणौ । सर्वसिद्धिप्रदं साक्षान्महापातकनाशनम् ।
सर्वपापहरञ्चैव सर्वरोगविनाशनम् ॥
नान्यत् सिद्धिप्रदं देवि ! वीरसाधनवर्जितम् ।
महाबलो महाबुद्धिर्महासाहसिकः शुचिः ॥
महास्वच्छो दयावांश्च सर्वभूतहिते रतः ।
तेषां कृते महादेवि ! वीरसाधनमुत्तमम् ॥

बृहत्श्रीक्रमसंहितायाम् ।

नास्मात्परतरं किञ्चित् सत्वरं सिद्धिदायकम् ।
सर्वसिद्धिर्भवत्येव अहोरात्रे कलौ युगे ॥
द्वापरे तच्च मासे च त्रेतायां वत्सरेण च ।
कृते च दशभिर्वर्षैः सत्ये सिद्धिर्न संशयः ॥

अथाष्टम्यां चतुर्दश्यां कुजवारे वा प्रथमप्रहराभ्यन्तरे गुरुं देवीञ्च नत्वा वीरवेशो यात्रां कुर्य्यात् । तदुक्तं तन्त्रान्तरे ।

घटीबन्धनवस्त्रञ्च मूलेन परिधाय च ।
तवार्थेन पुनर्वस्त्रं मूलेनाङ्गविलेपनम् ॥
कृतोष्णीशश्च मूलेन सिन्दूरेणोर्द्ध्वपुण्ड्रकम् ।
इष्टदेवं गुरुं नत्वा यात्रा प्रहरमध्यतः ॥
कार्य्या च साधकैः सार्द्धं हृदि मन्त्रं परामृषन् ।
अक्षुब्धो भुक्तभोज्यस्तु यदि स्याद्वीरसाधकः ॥
दिव्यो वा पशुभावो वा भुक्त्वा साधनमाचरेत् ॥

अथ साधनस्थानम् । तदुक्तं भावचूड़ामणौ ।

शून्यागारे नदीतीरे पर्वते निर्जनेऽपि वा ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

विल्वमूले श्मशाने वा तत्समीपे वनस्थले ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥
भौमवारे तमिस्रायां साधयेत् सिद्धिमुत्तमाम् ।
उपचारं समादाय कुलामृतरसन्तथा ॥
गुड़ार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च ।
गौड़ी च क्षत्रियस्यैव माध्वी वैश्यस्य तत्र वै ॥
कदलीमधुसंमिश्रश्वानत्वचि रसैः सुरा ।
सर्वं शूद्रस्य संप्रोक्तं यत्र वा तद्रुचिर्भवेत् ॥
गृहीत्वा तत्र दातव्यं सर्वं नैव च संस्पृशेत् ।
अन्यत्रापि । द्विजानामनुकल्पन्तु न साक्षाच्च विकल्पितम् ॥

तदुक्तं रुद्रयामले ।

सत्यक्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टकैः ।
त्रेतायां पूजिता देवी घृतेन सर्ववर्णिभिः ॥
मधुभिः सर्ववर्णैश्च पूजयेद् द्वापरे युगे ।
पूजनीया कलौ देवि ! केवलैर्वासवैश्च तैः ॥
मासभक्तञ्च शुद्धान्नं धूपदीपादिकं तथा ।
तिलाः कुशाश्च सर्वाश्च स्थापनीयाः प्रयत्नतः ॥

अथ पूर्वोक्तान्यतमस्थानं गत्वा सामान्यार्घ्यं विधाय पूर्वमुखो मूलान्ते फट्कारं दत्त्वा यागभूमिं प्रोक्ष्य गुरुगणेश-वटुकयोगिनीभ्यः पूर्वादितः संपूज्य पूर्वोक्तविधानेन मन्त्रं भूमौ विलिख्य ये चात्रेत्यादि पूर्वोक्तमन्त्रेण भूमौ पुष्पाञ्जलि-त्रयं दत्त्वा प्रणम्य श्मशानाधिपतिभ्यः पूर्ववद्बलिं दत्त्वा अघोरमन्त्रेण शिखाबन्धनं विधाय स्वदर्शनमन्त्रान्ते आत्मानं रक्ष रक्षेति हृदि हस्तं दत्त्वा हृद्रक्षां विधाय पूर्वोक्तक्रमेण भूतशुद्ध्यादिकं विधाय जयदुर्गामन्त्रेण दिक्षु सर्षपं विकीर्य

तिलोऽसीत्यादिना तिलान् विकीर्य्य विहितासनसमीपं गच्छेत् ।
तदुक्तं तन्त्रान्तरे ।

गुरुपूजादिकं सर्वं पूर्वोक्तमन्त्रमुच्चरेत् ।
ये चात्रेत्यादि मन्त्रेण भूमौ पुष्पाञ्जलिं क्षिपेत् ॥
श्मशानाधिपतीनान्तु पूर्ववद्बलिमाहरेत् ।
अघोरास्त्रेण मन्त्रेण शिखाबन्धनमाचरेत् ॥
स्वदर्शनेन वा रक्षामुभाभ्यां परिकल्पयेत् ।
मायास्फुरद्वयं वर्म प्रस्फुरद्वितयं पुनः ॥
घोरघोरतरेत्यन्ते तनुरूपपदं ततः ।
चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः ॥
हनयुग्मं समुद्धृत्य सहस्रारस्वरूपकम् ।
वर्मास्त्रान्तं महामन्त्रं सुदर्शनं प्रकीर्त्तितम् ॥
भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत् ।
जयदुर्गाख्येन मनुना सर्षपान् दिक्षु निःक्षिपेत् ॥

अथ विहितशवो यथा । तदुक्तं भावचूड़ामणौ ।

यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतम् ।
रज्जुवद्धं सर्पदष्टं चण्डालं चाभिभूतिकम् ॥
तरुणं सुन्दरं शूद्रं रणे नष्टं समुज्ज्वलम् ।
पलायनविशून्यन्तु संमुखे रणवर्त्तिनम् ॥
एतेषामन्यतमं ग्राह्यमित्यर्थः ।

अथ निषिद्धशवो यथा । तदुक्तं तत्रैव ।

स्वेच्छामृतं द्विवर्षञ्च वृद्धं स्त्रियं द्विजं तथा ।
अन्नाभावे मृतं कुष्ठिनं सप्तवर्षाद्धकं तथा ॥
एवं चाष्टशतं त्यक्त्वा पूर्वोक्तान्यतमं शवम् ।
गृहीत्वा मूलमन्त्रेण पूजास्थानं समानयेत् ॥
नीलतन्त्रे च । चाण्डालं चाभिभूतं वा शीघ्रं सिद्धिफलप्रदम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

विल्वमूले श्मशाने वा तत्समीपे वनस्थले ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥
भौमवारे तमिस्रायां साधयेत् सिद्धिमुत्तमाम् ।
उपचारं समाहृत्य कुलामृतरसन्तथा ॥
गुड़ार्द्रकरसेनैव सुरा तु ब्राह्मणस्य च ।
गौड़ी च क्षत्रियस्यैव माध्वी वैश्यस्य तत्र वै ॥
कदलीमधुसंमिश्रश्वानत्वचि रसैः सुरा ।
सर्वं शूद्रस्य संप्रोक्तं यत्र वा तद्रुचिर्भवेत् ॥
गृहीत्वा तत्र दातव्यं सर्वं नैव च संस्पृशेत् ।
अन्यत्रापि । द्विजानामनुकल्पन्तु न साक्षाच्च विकल्पितम् ॥

तदुक्तं रुद्रयामले ।

सत्यक्रमाच्चतुर्वर्णैः क्षीराज्यमधुपिष्टकैः ।
त्रेतायां पूजिता देवी घृतेन सर्ववर्णिभिः ॥
मधुभिः सर्ववर्णैश्च पूजयेद् द्वापरे युगे ।
पूजनीया कलौ देवि ! केवलैर्वासवैश्च तैः ॥
मासभक्तञ्च शुद्धान्नं धूपदीपादिकं तथा ।
तिलाः कुशाश्च सर्वाश्च स्थापनीयाः प्रयत्नतः ॥

अथ पूर्वोक्तान्यतमस्थानं गत्वा सामान्यार्घ्यं विधाय पूर्वमुखो मूलान्ते फट्कारं दत्त्वा यागभूमिं प्रोक्ष्य गुरुगणेश-वटुकयोगिनीभ्यः पूर्वादितः संपूज्य पूर्वोक्तविधानेन मन्त्रं भूमौ विलिख्य ये चात्रेत्यादि पूर्वोक्तमन्त्रेण भूमौ पुष्पाञ्जलि-त्रयं दत्त्वा प्रणम्य श्मशानाधिपतिभ्यः पूर्ववद्बलिं दत्त्वा अघोरमन्त्रेण शिखाबन्धनं विधाय स्वदर्शनमन्त्रान्ते आत्मानं रक्ष रक्षेति हृदि हस्तं दत्त्वा हृद्रक्षां विधाय पूर्वोक्तक्रमेण भूतशुद्ध्यादिकं विधाय जयदुर्गामन्त्रेण दिक्षु सर्षपं विकीर्य्य

तिलोऽसीत्यादिना तिलान् विकीर्य्य विहितासनसमीपं गच्छेत् ।
तदुक्तं तन्त्रान्तरे ।

गुरुपूजादिकं सर्वं पूर्वोक्तमन्त्रमुच्चरेत् ।
ये चात्रेत्यादि मन्त्रेण भूमौ पुष्पाञ्जलिं क्षिपेत् ॥
श्मशानाधिपतीनान्तु पूर्ववद्बलिमाहरेत् ।
अघोरास्त्रेण मन्त्रेण शिखाबन्धनमाचरेत् ॥
स्वदर्शनेन वा रक्षामुभाभ्यां परिकल्पयेत् ।
मायास्फुरद्वयं वर्म प्रस्फुरद्वितयं पुनः ॥
घोरघोरतरेत्यन्ते तनुरूपपदं ततः ।
चटयुग्मं तदन्ते च प्रचटद्वितयं पुनः ॥
हनयुग्मं समुद्धृत्य सहस्रारस्वरूपकम् ।
वर्मास्त्रान्तं महामन्त्रं सुदर्शनं प्रकीर्त्तितम् ॥
भूतशुद्धिं ततः कृत्वा न्यासजालं प्रविन्यसेत् ।
जयदुर्गाख्येन मनुना सर्षपान् दिक्षु निःक्षिपेत् ॥

अथ विहितशवो यथा । तदुक्तं भावचूड़ामणौ ।

यष्टिविद्धं शूलविद्धं खड्गविद्धं पयोमृतम् ।
रज्जुवद्धं सर्पदष्टं चण्डालं चाभिभूतिकम् ॥
तरुणं सुन्दरं शूद्रं रणे नष्टं समुज्ज्वलम् ।
पलायनविशून्यन्तु संमुखे रणवर्त्तिनम् ॥
एतेषामन्यतमं ग्राह्यमित्यर्थः ।

अथ निषिद्धशवो यथा । तदुक्तं तत्रैव ।

स्वेच्छामृतं द्विवर्षञ्च वृद्धं स्त्रियं द्विजं तथा ।
अन्नाभावे मृतं कुष्ठिनं सप्तवर्षाद्धकं तथा ॥
एवं चाष्टशतं त्यक्त्वा पूर्वोक्तान्यतमं शवम् ।
गृहीत्वा मूलमन्त्रेण पूजास्थानं समानयेत् ॥
नीलतन्त्रे च । चाण्डालं चाभिभूतं वा शीघ्रं सिद्धिफलप्रदम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

कालीतन्त्रेऽपि। ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम्।

अथ शवसमीपं गत्वा ॐ फट् इति शवमभूक्ष्य ॐ हुं मृतकाय नमः फट् इति शवोपरि पुष्पाञ्जलित्रयं दत्त्वा स्पर्शपूर्वकं वक्ष्यमाणमन्त्रेण प्रणमेत्। तदुक्तं भावचूडामणौ।

प्रणवाद्यस्त्रमन्त्रेण शवञ्च प्रोक्षणञ्चरेत्।
प्रणवं कूर्चबीजञ्च मृतकाय नमः फट्॥
पुष्पाञ्जलित्रयं दत्त्वा प्रणमेत् स्पर्शपूर्वकम्॥
हे वीर! परमानन्द! शिवानन्द! कुलेश्वर!।
आनन्दभैरवाकार! देवीपर्य्यङ्कसंस्थित!॥
वीरोऽहं त्वां प्रपद्यामि उत्तिष्ठ चण्डिकार्चने।
प्रणम्यानेन मन्त्रेण क्षालयेत् तदनन्तरम्॥

अथ सुगन्धिजलेन शवं सुस्नाप्य वाससा जलमुद्धृत्य धूपैर्धूपितं गन्धचन्दनादिभिः शवं प्रलिप्य तत् कटिदेशे धृत्वा पूजास्थानं समानयेत्। तदुक्तं नीलतन्त्रे।

तारं कूर्चं मृतकाय नमोऽन्तं मन्त्रमुद्धरेत्।
शवस्नपनमन्त्रोऽयम् इत्यादि।
धूपैः सुधूपितं कृत्वा गन्धादिना प्रलिप्य च।
रक्ताक्तो यदि देवेश! भक्षयेत् कुलसाधनम्॥

ततः कुशशय्यायां पूर्वशिरः कृत्वा शवं स्थापयेत्। तदुक्तं तत्रैव।

कुशशय्यां परिस्कृत्य तत्र संस्थापयेत् शवम्।
एलालवङ्गकर्पूरजातीखदिरसारकैः।
ताम्बूलं तन्मुखे दत्त्वा शवं कुर्य्यादधोमुखम्॥
स्थापयित्वा तस्य पृष्ठं चन्दनेन विलेपयेत्।
बाहुमूलादि कव्यन्तं चतुरस्रं विभाव्य च॥
मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम्।

ततश्चैनेयमजिनं कम्बलान्तरितं न्यसेत्॥

तन्त्रान्तरे च। गत्वा शवस्य सान्निध्यं धारयेत् कटिदेशतः।

यद्युपद्रावयेदस्य दद्यान्निष्ठीवनं शवे॥
पुनः प्रक्षालनं कृत्वा जपस्थानं समानयेत्॥

ततो द्वादशाङ्गुलमानानि यज्ञकाष्ठानि दशदिक्षु संस्थाप्य पूजयेत् तत्र इन्द्रादिदशदेवताः।

विषमिन्द्राय संलिख्य सुराधिपतये ततः।
इमं बलिं गृह्ण युगं गृह्णापरयुगं ततः॥
विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ ठद्वयम्।
अनेन मनुना पूर्वं बलिं दद्याच्च सामिषम्॥
साध्यनामादिकं कृत्वा पूर्ववद्बलिमाहरेत्।
सर्वेषां लोकपालानां ततः साधकसत्तमः॥

तत्र अयं क्रमः। लं इन्द्राय सुराधिपतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपारिषदाय सपरिवाराय नमः। इति संपूज्य बलिं दद्याद् यथा। ॐ इन्द्राय सुराधिपतये इमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु सिद्धिं प्रयच्छ स्वाहा। एष बलिः इन्द्राय नमः वं वह्नये तेजोऽधिपतये मेषारूढाय शक्तिहस्ताय इत्यादि पूर्ववत् संपूज्य बलिं दद्यात्। ॐ वह्नये तेजोऽधिपतये इत्यादि पूर्ववत्। यं यमाय प्रेताधिपतये दण्डहस्ताय महिषवाहनाय इत्यादिना संपूज्य बलिं दद्यात् अनेन ॐ यमाय प्रेताधिपतये इत्यादि पूर्ववत्। क्षं निर्ऋतये रक्षोऽधिपतये खड्गवाहनाय खड्गहस्ताय इत्यादि पूर्ववत् संपूज्य बलिं दद्यात् अनेन ॐ निर्ऋतये रक्षोऽधिपतये इत्यादि पूर्ववत्। वं वरुणाय जलाधिपतये मकरवाहनाय पाशहस्ताय इत्यादिना पूर्ववत्। वं वायवे वायुधिपतये अङ्कुशहस्ताय मृगवाहनाय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यात्

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अनेन। ओं वायवे वायुधिपतये इत्यादि पूर्ववत्। ओं कुबेराय यक्षाधिपतये गदाहस्ताय नरवाहनाय इत्यादिना संपूज्य बलिं दद्यात् अनेन। ओं कुबेराय यक्षाधिपतये इत्यादिना पूर्ववत् ओं ईशानाय भूताधिपतये शूलहस्ताय वृषवाहनाय इत्यादिना पूर्ववत्। निर्ऋतिवरुणयोर्मध्ये ओं अनन्ताय नागाधिपतये चक्रहस्ताय रथवाहनाय इत्यादिना पूर्ववत् संपूज्य बलिं दद्यात् अनेन ओं अनन्ताय इत्यादि पूर्ववत्। इन्द्रेशानयोर्मध्ये ओं ब्रह्मणे लोकाधिपतये पद्महस्ताय हंसवाहनाय इत्यादिना पूर्ववत् संपूज्य ओं ब्रह्मणे इत्यादिना पूर्ववत्। शवाधिष्ठातृदेवताभ्यो बलिं दद्यात् चतुषष्टियोगिनीभ्यो नमः। डाकिनीभ्यो नमः।

अथ पूजासामग्रीं समीपे भुवि चोत्तरसाधकञ्च संस्थाप्य मूलान्ते ह्रीं फट् शवाय नमः इत्यादिना आसनं संपूज्य मूलमुच्चरन् अश्वारोहणक्रमेण शवोपरि उपविश्य स्वपादतले कुशान् दत्त्वा शवकेशान् प्रसार्य्य जुटिकां बध्वा गुरुं देवीञ्च नमस्कृत्य प्राणायामषड्ङ्गन्यासान् कृत्वा पूर्वोक्तवीरासनं दर्शदिक्षु मनुना लोष्ट्राणि निःक्षिप्य संकल्पं कुर्य्यात्। तदुक्तं भावचूड़ामणौ।

पूजाद्रव्यं सन्निधौ च दूरे चोत्तरसाधकम्।
समानगुणसम्पन्नं मान्त्रिकं विजितेन्द्रियम्॥
अभिषेकविधिं ज्ञात्वा देवतां भावयेत् पराम्।
संस्थाप्यात्मानमभ्यर्च्य स्वमन्त्रान्ते ततः परम्॥
फड़ित्यनेन मन्त्रेण तत्राश्वारोहणं विशेत्।
कुशान् पादतले दत्त्वा शवकेशान् प्रसार्य्य च॥
दृढ़ं निबध्य जुटिकां कृतसङ्कल्पसाधकः॥

तन्त्रान्तरे। शवोपरि समारुह्य गुरुपूजादिकं चरेत्।
प्राणायामं विधायाथ दिक्षु लोष्ट्राणि निःक्षिपेत्॥

ततः स्ववामे शवसमीपे अर्घ्यपात्रादिकं संस्थाप्य शवजुटिकायां पीठपूजादिकं कृत्वा षोड़शोपचारैः देवीं संपूज्य शवमुखे देवीं कारणेन त्रिः सन्तर्पयेत्। तदुक्तं भावचूड़ामणौ।

तत्र देवीं सुसंपूज्य उपचारैः सुविस्तरैः।

नीलतन्त्रे च। शवास्ये विधिवद्देवीं देवताप्यायनं ततः।

ततः शवादुत्थाय तस्य संमुखं गत्वा वक्ष्यमाणमन्त्रं पठेत्। तदुक्तं भावचूड़ामणौ।

उत्थाय संमुखे स्थित्वा पठेद्भक्तिपरायणः।
ओं वशो मे भव देवेश! ममामुकपदं ततः॥
सिद्धिं देहि महाभाग! कृताश्रमपदां वर!।

ततो मूलमन्त्रं पठन् पट्टसूत्रेण शवपादद्वयं दृढ़ं निबध्य वक्ष्यमाणमन्त्रेण रक्तचन्दनादिना त्रिकोणचक्रं विलिखेत्।

तदुक्तं तन्त्रान्तरे।

मूलमन्त्रमुच्चरन् मन्त्री शवपादद्वयं ततः।
पट्टसूत्रेण बध्नीयात् येनोत्थातुं न शक्यते॥

भावचूड़ामणौ। ओं भीमभीरुभयद्राव! द्रव्यलोचनभावक!।
त्राहि मां देवदेवेश! शवानामधिपाधिप!॥
इति पादतले तस्य त्रिकोणं चक्रमुल्लिखेत्।
येनोत्थातुं न शक्नोति शवश्च निश्चलो भवेत्॥

शवहस्तद्वयं पार्श्वयोः प्रसार्य्य तदुपरि कुशान् दत्त्वा तत्र स्वपादौ निधाय पुनः प्राणायामं कृत्वा शिरसि गुरुं हृदि देवीञ्च ध्यात्वा ओष्ठाधरसंपुटौ विहितमालया विभीर्जयेत्। तदुक्तं तत्रैव। उपविश्य पुनस्तस्य वाह्ने निःसार्य्य पार्श्वयोः।

हस्तयोः कुशमास्तीर्य्य पादौ तत्र निधापयेत्॥
ओष्ठौ संपुटकौ कृत्वा स्थिरचित्तः स्थिरेन्द्रियः।
तदा देवीं हृदि ध्यात्वा मौली जपमथाचरेत्॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अत्रापि श्मशानसाधनक्रमेण जपः कार्य्यः। यद्यर्द्धरात्रि-
पर्य्यन्तं किञ्चिन्न लक्ष्यते। तदा पूर्ववत् अर्घ्यं तिलान् विकिरन्
सप्तपादगमनादिकं कृत्वा जपं कुर्य्यादिति।

चलासने भयं नास्ति भये जाते वदेत्ततः।
यद्यत् प्रार्थयसे देवि! दातव्यं कुञ्जरादिकम्॥
दिनान्तरे तु दास्यामि स्वनाम कथयस्व मे।
इत्युक्तः संस्कृतेनैव निर्भयस्तु पुनर्जपेत्॥
पुनश्चेत् मधुरं वक्ति वक्तव्यं मधुरं ततः।
ततः सत्यं कारयित्वा वरन्तु प्रार्थयेत्ततः॥
यदि सत्यं न करोति वरं वा न प्रयच्छति।
तदा पुनर्जपेद्धीमान् एकाग्रमानस स्तथा॥
नररूपं विना तत्र देवोऽपि नापसर्पति।
यत्नत स्तेन बोद्धव्यो नरो वा देवयोनयः॥
माता मातुःस्वसा वापि मातुलानी तथैव च।
आगत्य चिह्नं कुरुते माययाच्छाद्य विग्रहम्॥
उत्तिष्ठ वत्स! ते कार्य्यं सर्वं यातु न संशयः।
प्रभातसमयो जातस्त्वत्पिता क्रोशति गृहम्॥
प्रायो विमत्सरा लोका राजानो दण्डधारिणः।
कदाचित् केन वा दृष्टस्तदा किञ्चिद् भविष्यति॥
इत्यादि विविधैर्वाक्यैर्न च जापं परित्यजेत्।
मृताः पितृगणास्तत्र दूरदेशनिवासिनः॥
बान्धवास्तत्र गच्छन्ति देवरूपधरास्तथा।
स्त्रीपुत्रसेवकादींश्च गृहीत्वा नियतैः परैः॥
रुदन्तः पुत्रकाः सर्वे भ्रातरोऽनुजशिष्यकाः।
निजकान्ताङ्गसंस्पर्शं वस्त्राद्याभरणादिकम्॥
गृहीत्वा नीयते तत्र पानकैस्तद्भयं त्यजेत्।

बान्धवैस्तत्र दिवसे शङ्का तत्र प्रजायते॥
यदि न क्षुभ्यते तत्र तदा किं वा न लभ्यते।
स्त्रीरूपधारिणी देवी द्विजरूपधरः पुमान्॥
वरं गृह्णेति शब्दं वै चिरात्रान्ते वरं लभेत्।
साधुना साधुना वापि योषिच्चेद् वरदायिनी॥
तदा वीरपतिस्तस्य किं न सिध्यति भूतले।
निष्पापपुरुषेणैव कुलीनेनैव संस्कृता॥
असंस्कृतवरा देवी पापं युङ्क्ते न संशयः।
संमुखेऽसंमुखे चापि संस्कृतं वक्ति चापरम्।
सेव देवी न सन्देहः स देवो भैरवः स्वयम्।
न चेदेवं भवेच्चैव मायाघटितविग्रहः॥
वरं न वरयेत्तत्र न किञ्चित् प्रवदेत्ततः।
स चेत् संस्कृतमाख्यानं वक्ति वक्तव्यमीदृशम्॥
न चेत् स्वयं कौलिकोऽपि वरं ग्राह्यं निराकुलम्।
अथवा उत्कटं किञ्चित् ज्योतिर्वा नीललोहितम्॥
शब्दो वा जायते सम्यगमृतं वापि लभ्यते।
विचार्य्य तद्गृहीतव्यमेवं शिवेन भाषितम्॥
एवं कृत्वा तु बहुधा न चाकृतविबुद्धयः।
अवश्यं तत्र दातव्यं न च प्रत्यक्षतां क्वचित्॥
भैरवा वटुकाश्चैव कुलशास्त्रपरायणाः।
एतच्छास्त्रप्रसङ्गेन कृत्याकुटिलविग्रहाः॥
पुत्रो भूत्वा हरेद्विद्यां नारी भूत्वा विमोहयेत्।
तस्मात्तत्तु भवेद्दोषात् विचारे यत्नमाचरेत्॥
सत्ये कृते वरं लब्ध्वा संत्यजेच्च जपादिकम्।
फलं जातमिति ज्ञात्वा जुटिकां मोचयेत्ततः॥
अन्यत्रापि। शवं प्रक्षाल्य संस्थाप्य बन्धनं मोचयेत् पदम्।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पदे चक्रं मार्जयित्वा पूजयित्वा जले क्षिपेत् ॥
शवं जलेऽथ गर्त्ते वा निःक्षिप्य स्नानमाचरेत् ।
ततस्तु स्वगृहं गत्वा वलिं दद्यात् दिनान्तरे ॥

अस्यां रात्रौ येषां देवानां यजमानोऽहं ते गृह्णन्तु इमं वलिम् । इति भावचूड़ामणौ ।

अथ तैस्तु चित्श्मशाननरकुञ्जरशूकरात् ।
दत्त्वा पिष्टमयानेवं कर्त्तव्यमुपबोधनम् ॥
परेऽह्नि नित्यमाचर्य्य पञ्चगव्यं पिबेत्ततः ।
ब्राह्मणान् भोजयेत्तत्र पञ्चविंशतिसंख्यकान् ॥
पञ्च पञ्च विहीनान् वा क्रमाच्चैव दशावधि ।
ततः स्नात्वा च भुक्त्वा च निवसेदुत्तमस्थले ॥
यदि न स्याद्विप्रभोज्यं तदा निर्धनतां व्रजेत् ।
तेन चेन्निर्धनस्तस्य तदा देवः प्रकुप्यति ॥
त्रिरात्रं वाथ षड्रात्रं नवरात्रन्तु संयमेत् ।
स्त्रीशय्यां यदि गच्छेद्वै तदा व्याधि र्भवेत् च हि ॥
गीतं श्रुत्वा च बधिरो निश्चक्षुर्नृत्यदर्शनात् ।
यदि वक्ति दिने वाक्यं तदास्य मूकता भवेत् ॥
पञ्चदशदिनान्ते तु देहे देवस्य संस्थितिः ।
गोब्राह्मणानां निन्दाञ्च न कुर्य्याच्च कदाचन ॥
देवगोब्राह्मणादींश्च प्रत्यहं संस्पृशेत् शुचिः ।
प्रातर्नित्यक्रियान्ते तु विल्वपत्रोदकं पिबेत् ॥
ततः स्नायाच्च गङ्गायां प्राप्ते षोड़शवासरे ।
स्वाहान्तमूलमुच्चार्य्य तर्पणान्ते नमः पदम् ॥
एवं शतत्रयादूर्द्ध्वं देवान् वै तर्पयेज्जलैः ।
स्नानतर्पणशून्यस्य न स्याद्देवस्य तर्पणम् ॥
इत्यनेन विधानेन सिद्धिं प्राप्नोति मानवः ।

इह भुक्त्वा वरान् भोगान् अन्ते याति हरेः पदम् ।
असाङ्गं वापि साङ्गं स्यात् निष्फलं सफलं भवेत् ॥
कृत्वा साधनमेवैतत् शक्तेः प्रियतरो भवेत् ।
शवाभावे श्मशाने वा कार्य्यं वै वीरसाधनम् ॥
यो भावो यस्य वै प्रोक्तस्तैर्भावैर्यदि नार्चयेत् ।
दशाहक्रमयोगेन भ्रष्टो भवति साधकः ॥
कुलमन्त्रं गृहीत्वा न यावत् बुद्धिः प्रजायते ।
नोपदिश्येत्तत्र भावं न रूपं तत्र सन्दिशेत् ॥

इति श्यामारहस्ये त्रयोदशः परिच्छेदः ।

अथ चतुर्दशः परिच्छेदः ।

अथ प्रकारान्तरसाधनम् । तदुक्तं कालीतन्त्रे ।
शृणु देवि ! वरारोहे ! वीरसाधनमुत्तमम् ।
नृणां शीघ्रज्ञानार्थं प्रकारान्तरमुच्यते ॥
चतुष्पथे चतुर्दिक्षु पुरुषं हृदयं खनेत् ।
जीवितं ब्रह्मरन्ध्रे वै दीपं प्रज्वालयेदथ ॥
मध्ये तथा खनेदेकं तत्र शुद्धासनं भवेत् ।
पूर्वोक्तेन च मार्गेण तत्र संस्कारमारभेत् ॥
महाकालादिदेवेभ्यो वलिं पूर्ववदाहरेत् ।
कल्पोक्तपूजां संपूज्य जपेत् प्रयतमानसः ॥
दन्ताक्षमालया चैव राजदन्तेन मेरुणा ।
दिग्वासाः प्रजपेन्मन्त्रमयुतं सर्वदैवतम् ॥
जपान्ते च वलिं दत्त्वा दक्षिणा विभवावधि ।
सर्वसिद्धीश्वरो विद्वान् सर्वदेवनमस्कृतः ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

अथवा विजनेऽरण्ये अस्थिशय्यासनो नरः ।
उदयान्तं दिवा जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥
विल्ववृक्षे निजक्रोड़े शवमारोप्य यत्नतः ।
नृसिंहमुद्रया वीक्ष्य जपेन्मातृकया यदि ॥
सहस्रं तत्र वै जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
वटमूले शवं नीत्वा तत्र देवीं प्रपूज्य च ॥
सुप्त्वा तत्र मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
करकाञ्चीं समादाय मुण्डमालाविभूषितः ॥
तेनैव तिलकं कृत्वा तत्तद्भस्मविभूषितः ।
श्मशाने च सकृज्जप्त्वा सर्वसिद्धीश्वरो भवेत् ॥
कुङ्कुमागुरुकस्तूरीरोचना घनचन्दनम् ।
कर्पूरं पद्मरागञ्च केशरं हरिचन्दनम् ॥
एकत्र साधितं कृत्वा प्रत्येकं साधयेत् सुधीः ।
जिह्वाग्रे रुधिरं वीर आकाशे च समाहरेत् ॥
तेनैव वटिकां कृत्वा भद्रकालीं ततो जपेत् ।
नीलां नीलपताकाञ्च लोलजिह्वां करालिकाम् ॥
ललाटे तिलकं कृत्वा साधको वीरभीः स्वयम् ।
महाष्टमीनवम्यास्तु संयोगे पुरतः स्थितः ॥
छागमहिषमेषाणां चतुर्दिक्षु शवान् क्षिपेत् ।
कबन्धान् मुण्डपूजाञ्च दीपादिभिरलङ्कृताम् ॥
मध्ये कबन्धमास्तीर्य्य तत्र गन्धर्वरूपधृक् ।
ताम्बूलपूररक्तास्य मञ्जनाञ्जितलोचनम् ॥
कृत्वा तत्र मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
वियत्त्रययुतं देवि ! नेत्रान्तं चन्द्रभूषितम् ॥
वीजं प्रत्येकदेवानामिति तासाञ्च पार्वति ! ।
मूलमन्त्रेण मन्त्रज्ञो जपेत् सार्द्धशतद्वयम् ॥

जिह्वाग्रे रुधिरं गृह्य चामुण्डे ! घोरनिःस्वने ! ।
वलिं क्षिप्त्वा वरं देहि रुधिरं गगनेऽमले ॥
कालि ! कालि ! प्रचण्डोग्रे ! ततोऽस्त्रं कवचं ततः ।
कालिकेयं समाख्याता वीराणां हितकाम्यया ॥
कूर्चयुग्मं महादेवि ! लीलया कथितं तव ।
चन्द्रखण्डसमायुक्तं ततो नीलपदं ततः ।
पताके हुँ फड़न्ते च पूर्वकूटमनुर्मतः ॥
सुगुप्तेयं महाविद्या तव स्नेहादिहोदिता ।
जयश्रीकरणी देवी पताकेव रणस्थले ॥
तेन नीलपताकेयं योज्या वै नीलसाधने ।
उग्रचण्डा महाविद्या या पुरा कथिता प्रिये ! ॥
लोलजिह्वा तु सा प्रोक्ता संयोज्या नीलसाधने ।
या सा विद्या महातारा सा करालेति कीर्त्तिता ॥
भूमिपूरसमायुक्ता सामावस्या शुभोदया ।
भाद्रे पुष्करयोगे च तस्यां वीरवरोत्तमः ॥
विष्णुक्रान्तां समानीय निःक्षिपेत् मन्त्रभूमिषु ।
तत्र तां साधितां कृत्वा तद्दिने मृतहट्टके ॥
तत्र प्रसारितं मत्स्यमेकं मूल्येन दापयेत् ।
तज्जलेनाभिषेकञ्च पूर्ववच्च शवोपरि ॥
साधितां विजयां तस्य उदरे मुखवर्त्मना ।
क्षिप्त्वा तत्र खनेन्मत्स्यमञ्जनाञ्जितलोचनः ॥
तिलकौ पूर्वद्रव्येण उत्थाय च मनुं जपेत् ।
स्वयं वै तत्र भगवान् भैरवो लगुड़ाङ्कितः ॥
भ्रमातीतस्ततो वीर स्तं विलोक्य जपेन्मनुम् ।
यदि भाग्यवशाद्देवि ! लगुड़स्तत्र लभ्यते ॥
तदा स्वयं भैरवोऽसौ स्वयं वीरेश्वरो भवेत् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मत्स्यमानीय देवेशि ! निःक्षिपेत् पिष्टकानने ॥
तत्रासकृज्जपित्वा च देवतामिलनं भवेत् ।
तत्र नत्वा महादेवं महादेवीञ्च भाविनि ! ॥
तद्भस्मतिलकं कृत्वा स्वयं वीरेश्वरो भवेत् ।
निशायां मृतहट्टे च उन्मत्तानन्दभैरवः ॥
दिग्वासा विमली भस्मभूषणो मुक्तकेशकः ।
कृपाणखड्गहस्तश्च जपेन्मातृकया यदि ॥
तदा तस्य महादेवि ! सर्वसिद्धिः प्रजायते ।
डाकिनीं योगिनीं वापि अन्यां वा भूतकाङ्क्षिनाम् ॥
तत्र चानीय संपूज्य सर्वसिद्धीश्वरो भवेत् ।
सर्वेषां जीवहीनानां जन्तूनां नीलसाधने ॥
ब्राह्मणं गोमयं त्यक्त्वा साधयेद्वीरसाधनम् ।
मृतासनं विना देवि ! पूजयेत् पार्वतीं शिवाम् ।
तावत्कालं वसेद्घोरे यावदाहृतसंप्लवम् ।
महाशवाः प्रशस्ताः स्युः कालीकावीरसाधने ॥
क्षुद्राः प्रयोगे कर्त्तॄणां प्रशस्ताः सर्वसिद्धिदाः ।
एवं नीलक्रमं देवि ! कथितञ्च तवानघे ! ॥
न कस्यचित् प्रवक्तव्यं मम प्रीत्या महेश्वरि ! ॥
श्रीदेव्युवाच । ज्ञातमेतन्मया देव ! त्वत्प्रसादान्महेश्वर ! ।
अशक्तानान्तु मे देव ! पुरश्चरणमुच्यताम् ॥

भैरव उवाच ।

श्मशानेषु पुरश्चर्य्या कथिता देवि ! दुर्लभा ॥
अथवाऽन्यप्रकारेण पुरश्चरणमुच्यते ।
कुजे वा शनिवारे वा नरमुण्डं समायुतम् ॥
पञ्चगव्येन मिलितं चन्दनाद्यैर्विशेषतः ।

निक्षिप्य भूमौ हस्तार्द्धमानतः कानने वने ॥
तत्र तद्दिवसे रात्रौ सहस्रं यदि मानवः ।
एकाकी प्रजपेन्मन्त्रं स भवेत् कल्पपादपः ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
शवमानीय तद्द्वारि तेनैव परिखन्यते ॥
तद्दिनात् तद्दिनं यावत् जपेदष्टोत्तरं शतम् ।
स भवेत् सर्वसिद्धीशो नात्र कार्य्या विचारणा ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
अष्टम्याञ्च चतुर्दश्यां पक्षयोरुभयोरपि ॥
सूर्य्योदयात् समारभ्य यावत् सूर्य्योदयान्तरम् ।
तावज्जप्त्वा निरातङ्कः सर्वसिद्धीश्वरो भवेत् ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
चन्द्रसूर्य्यग्रहे चैव ग्रासावधि विमुक्तितः ॥
यावत्संख्यं मनुं जप्त्वा तावद्धोमादिकं चरेत् ।
सूर्य्यग्रहणकालाद्धि नान्यः कालः प्रशस्यते ॥
अत्र यद्यत् कृतं सर्वमनन्तफलदं भवेत् ।
तावदिति जपदशांशहोमादिकमित्यर्थः ॥
ग्रहणे चन्द्रसूर्य्यस्य शुचिः पूर्वमुपोषितः ।
नद्यां समुद्रगामिन्यां नाभिमात्रोदके स्थितः ॥
यदा शुद्धोदके स्नात्वा शुचौ देशे समाहितः ।
स्पर्शाद्विमुक्तिपर्य्यन्तं जपं कुर्य्यादनन्यधीः ॥
अनन्तरं दशांशेन क्रमाद्धोमादिकं चरेत् ।
तदन्ते महतीं पूजां कुर्य्याद् ब्राह्मणभोजनम् ॥
ततो मन्त्रस्य सिद्ध्यर्थं गुरुं संपूज्य तोषयेत् ॥
अथ कालीतन्त्रे । शरत्काले चतुर्थ्यादि नवम्यन्तं विशेषतः ।
भक्तितः पूजयित्वा च रात्रौ तावत् सहस्रकम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

जपेदेकाकी विजने केवलं तिमिरालये ।
अष्टम्यादिनवम्यन्तमुपवासपरो भवेत् ॥
अन्यत्र गुरुमार्गस्य लङ्घनं नैव कारयेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
अष्टमीसन्धिवेलायां अष्टोत्तरलताग्रहम् ।
प्रविश्य मन्त्री विधिवत् ताः समभ्यर्च्य यत्नतः ॥
पूर्वोक्तफलमासाद्य पूजादिकं समाचरेत् ।
केवलं कामदेवोऽसौ जपेदष्टोत्तरं शतम् ॥
तासान्तु पत्रमूलेन उग्रां संपूज्य कर्णिके ।
मन्त्रसिद्धिर्भवेत् सद्यो लतादर्शनपूजनात् ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
आकृष्णयोः कुलागारे भावयेन्मन्त्रमेव च ॥
प्रपूज्य तत्र संस्कारं कृत्वा तस्यै निवेद्य च ।
किञ्चित् जपं मनुं नीत्वा देवताभावतत्परः ॥
तां विसृज्य नमस्कृत्य स्वयं जप्त्वा सुसंयतः ।
प्रातः स्त्रीभ्यो वलिं दत्त्वा मन्त्रसिद्धिर्न संशयः ॥
अथवान्यप्रकारेण पुरश्चरणमिष्यते ।
गुरुमानीय संस्थाप्य देववत् पूजनं विभोः ॥
वस्त्रालङ्कारहेमाद्यैः सन्तोष्य गुरुमेव च ।
तत्सुतं तत्सुताञ्चैव तत्पत्नीञ्च विशेषतः ॥
पूजयित्वा मनुं जप्त्वा सर्वसिद्धीश्वरो भवेत् ।
अथवान्यप्रकारेण पुरश्चरणमिष्यते ॥
सहस्रारे गुरोः पादपद्मं ध्यात्वा प्रपूज्य च ।
केवलं देवभावेन जप्त्वा सिद्धीश्वरो भवेत् ॥
गुरवे दक्षिणां दद्याद् यथाविभवमात्मनः ।
गुरोरनुज्ञामात्रेण दृष्टमन्त्रोऽपि सिध्यति ॥

गुरुं विलङ्घ्य शास्त्रेऽस्मिन् नाधिकारः सुरैरपि ।
एषाञ्च मन्त्रतन्त्राणां प्रयोगः क्रियते यदि ॥
गुरुवक्त्रं विना देवि ! सिद्धिहानिः प्रजायते ।
एतत्तन्त्रञ्च मन्त्रञ्च शिष्येभ्योऽपि न दर्शयेत् ।
अन्यथा प्रेतराजस्य भवनं याति निश्चितम् ॥

अथ कालिकादर्शनार्थं साधनान्तरमालिख्यते । प्रदोषे शून्यगृहं गत्वा उत्तराभिमुख उपविश्य भूतशुद्ध्यादिकं न्यासान्तं विधाय सिन्दूरेण नवकोणवृत्ताष्टदलवृत्तचतुरस्रचतुर्द्वारात्मकं यन्त्रं विलिख्य संमुखे कुमार्य्याः शक्तिबीजं लिखित्वा पुरतः संस्थाप्य तत्र पीठपूजां विधाय द्वादश प्राणायामं कृत्वा देवीं ध्यायेद् यथा ।

नृकपालसमारूढां नरमालाविराजिताम् ।
कृष्णाभ्रसन्निभां रक्तवासोपरि विभूषिताम् ॥
चतुर्बाहुधरां देवीं दिव्यालङ्कारशोभिताम् ।
निशामुखं समारुह्य यावद् यामद्वयं भवेत् ॥
तावत्कालं जपेन्मन्त्रं कालिकादर्शनोत्सुकः ।
चन्दनावीतनृशिरः शवोपरि विराजितः ॥
घृतप्रदीपमालाभिस्तथैव परिवेष्टितः ।
मुण्डोपरि भवेन्मुण्डो भयमोहविवर्जितः ॥
ऊर्द्ध्वास्यः प्रजपेन्मन्त्रं दीपालोकनतत्परः ।
मुण्डोपरि भवेन्मुण्डस्तद्दीपञ्च निधापयेत् ॥
पूजयेन्मूलमन्त्रेण कुर्य्याद्देव्या विलक्षणः ।
सिन्दूरमण्डलं कृत्वा नवकोणसमन्वितम् ॥
शक्तिबीजन्तु तन्मध्ये लिखित्वान्यैः समावृतम् ।
बहिरष्टदलं पद्मं तेनैव कारयेद् बुधः ॥
तत्रावाह्य जगद्धात्रीं कालिकां कृष्णविग्रहाम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पूजयेद्विधिवद्देव्यै नवरात्रं समाहितः ॥
ततस्तुष्टा जगद्धात्री कालिका परमेश्वरी ।
सर्वसम्पत्तिदा देवी साधकस्यानुकम्पया ॥
नेदं प्रकाशयेद् मन्त्रं प्राणैः कण्ठगतैरपि ।
शिष्याय भक्तिहीनाय भैरवेन हि भाषितम् ॥

इति श्यामारहस्ये चतुर्दशः परिच्छेदः ।

अथ पञ्चदशः परिच्छेदः ।

अथ काम्यहोमार्थं कुण्डनियमो यथा । तदुक्तं यामले ।
शान्त्यै चोक्तं तथारोग्ये कुण्डञ्च चतुरस्रकम् ।
आकर्षणे त्रिकोणं स्यात् उच्चाटे वर्त्तुलं तथा ॥
मारणे च तथा योज्यं वर्त्तुलं मन्त्रभिः सदा ॥
देव्युवाच । देवदेव ! महादेव ! भक्तानां प्रीतिवर्द्धन ! ।
कालिका या महाविद्या निर्दिष्टा न प्रकाशिता ॥

श्रीमहादेव उवाच ।

लक्षं लक्षसहस्राणि वारितासि मया पुनः ।
स्त्रीस्वभावान्महादेवि ! पुनस्त्वं परिपृच्छसि ॥
अत्यन्तदुर्लभं देवि ! कवचं सर्वकामदम् ।
तथापि कथयाम्यद्य तव प्रीत्या वरानने ! ॥
उक्तं पुरा महादेवि ! श्रूयतां तत् कृपामयि ! ।
कवचाज्ञानतो देवि ! विद्यासिद्धिर्न जायते ॥

श्रीदेव्युवाच । कथ्यतां कवचं देव ! यदि स्नेहोमयि प्रभो ।
अन्यथा जगतां नाथ ! प्राणांस्त्यजामि निश्चितम् ॥

श्रीमहादेव उवाच ।

कवचं कथयिष्यामि सुगोप्यमतिदुर्लभम् ।
गोपनीयं प्रयत्नेन स्वयोनिवद्वरानने ! ॥
पूर्वस्यां पातु कालो च कपाली दक्षिणेऽवतु ।
कुल्ला रक्षतु पाश्चात्ये कुरुकुल्ला तथोत्तरे ॥
विरोधिनी तथैशान्यां विप्रचित्ताग्निकोणक ।
नैर्ऋते पातु चोग्रा च वायावुग्रप्रभावतु ॥
दीप्ता तु रक्षतां शीर्षे नीलाव्यान्मुखमण्डले ।
घना रक्षतु कण्ठे च वलाका हृदयेऽवतु ॥
नाभौ मात्राजङ्घयोश्च मिता मुद्रावतु ध्वजे ।
ब्रह्माण्याद्या महादेव्यः सर्वत्र पान्तु सर्वदा ॥
श्लोकत्रयं महापुण्यं यज्ज्ञात्वा मत्समो भवेत् ।
तव स्नेहान्महादेवि कथयामि सुदुर्लभम् ॥

श्रीपरमशिव उवाच ।

सर्पिःसागरविस्फुरन्मणिमयद्वीपे कदम्बान्विते
गेहे रत्नमये शवस्य हृदये रत्नामृतेशानने ।
वर्गाद्याननवामलोचनमयीं श्रीदक्षिणां कालिकां
सद्यश्छिन्नशिरःकरां भगवतीं ध्यायन्ति पुण्याशयाः ॥
मद्याघूर्णितलोचनत्रयमहाशोभामयीं योषितां
लक्षैः सेवितपादपद्मयुगलां श्रीभैरवीद्योतिताम् ।
श्रीमत्कालमुखे सुखं निदधतीं चान्द्रीं कलां बिभ्रतीं
तां ध्यायन्ति सुसिद्धये भगवतीं तद्भावनानन्दिताः ॥
मांसासृग्दुग्धखण्डच्छुरितमधुमहापानमत्तां हसन्तीम्
अट्टाट्ट कालकालं कहकहडमिति प्रोल्लसन्तीं सखीषु ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

मृत्यप्रोद्दामहासोन्मदमुदितमहाभैरवानन्दवीचीं
मातङ्गं खण्डयन्तीमभयवरकरां कालिकां तां भजामः ॥
इदन्तु दिव्यं कवचं मनोज्ञं देयं कदाचिद् गुरुवेऽपि नैव ।
महद्भयात् स्नेहरसेन दत्त्वा हानिः शरीरेण च साधकेषु ॥
यस्मादिदन्तु कवचं लभ्यते बहुपुण्यतः ।
तेन दत्तन्तु सकलं सद्गुरुं परमं प्रिये ! ॥
यस्मै तस्मै न दातव्यं प्राकृतेभ्यो विशेषतः ।
प्रकाशे सिद्धिहानिः स्यात् तस्माद् यत्नेन गोपयेत् ॥
गुरुपादप्रसादेन यदि काली प्रलभ्यते ।
जप्त्वा कालीं महाविद्यामिदन्तु कवचं पठेत् ॥
अज्ञात्वा कवचं देवि ! कालिका चेत् प्रजप्यते ।
स नाप्नोति फलं तस्मात् परत्र नरकं व्रजेत् ॥
सर्वत्र सुलभा विद्या कवचन्तु सुदुर्लभम् ।
शरीरधनदारेण गुरुं सन्तोष्य तत् पठेत् ॥
सफला रजनीपूजा दिवापूजा च निष्फला ।
तस्मात् सर्वप्रयत्नेन रजन्यां कवचं स्मरेत् ॥
विवादे च रणे द्यूते विद्यायां कवितागमे ।
राजगेहे विचारे च सर्वत्रेदं पठेन्नरः ॥
मोहनस्तम्भनाकर्षमारणोच्चाटनं तथा ।
कवचस्मरणाद्देवि ! जायन्ते सर्वसिद्धयः ॥
अथवा किमिहोक्तेन सत्यं सत्यं मम प्रिये ! ।
प्रत्यक्षा दक्षिणा काली वरं यच्छति सुन्दरि ! ॥
गुरौ च कवचे तन्त्रे यन्त्रे देवीं सदा भजेत् ।
गुरुस्त्राता महादेवः कवचं यः प्रयच्छति ॥
इदन्तु कवचं प्राप्य हेलनं कुरुते तु यः ।
अचिरान्मृत्युमाप्नोति मम तुल्योऽपि साधकः ॥

स माता जनकश्चैव स गुरुः स च पूजितः ।
स सर्वदः स आचार्य्यः कवचं यः प्रयच्छति ॥
इति श्रीरुद्रयामले महातन्त्रे श्रीदक्षिणकालिकायाः
परमशिवोक्तं सर्वसिद्धिदं कवचं समाप्तम् ॥

नमामि कृष्णरूपिणीं कृष्णाङ्गयष्टिधारिणीम् ।
समग्रतत्त्वसागरमपारपारगह्वराम् ॥
शिवाप्रभां समुज्ज्वलां स्फुरच्छशाङ्कशेखराम् ।
ललाटरत्नभास्करां जगत्प्रदीप्तिभास्कराम् ॥
महेन्द्रकश्यपार्चितां सनत्कुमारसंस्तुताम् ।
सुरासुरेन्द्रवन्दितां यथार्थनिर्मलाद्भुताम् ॥
अतर्क्यरोचिरूर्जितां विकारदोषवर्जिताम् ।
मुमुक्षुभिर्विचिन्तितां विशेषतत्त्वसूचिताम् ॥
मृतास्थिनिर्मितस्रजां मृगेन्द्रवाहनाग्रजाम् ।
सुशुद्धतत्त्वतोषणां त्रिवेदपारभूषणाम् ॥
भुजङ्गहारहारिणीं कपालखण्डधारिणीम् ।
सुधोर्मिकोपकारिणीं सुरेन्द्रवैरिघातिनीम् ॥
कुठारपाशचापिनीं कृतान्तकामभेदिनीम् ।
शुभां कपालमालिनीं सुवर्णकल्पशाखिनीम् ॥
श्मशानभूमिवासिनीं द्विजेन्द्रमौलिभाविनीम् ।
तमोऽन्धकारयामिनीं शिवस्वभावकामिनीम् ॥
सहस्रसूर्य्यराजिकां धनञ्जयोग्रकारिकाम् ।
सुशुद्धकालकन्दलां सुभृङ्गवृन्दमञ्जुलाम् ॥
प्रजापिनीं प्रजावतीं नमामि मातरं सतीम् ।
स्वकर्मकारणे गतिं हरप्रियाञ्च पार्वतीम् ॥
अनन्तशक्तिकान्तिदां यशोऽर्थभुक्तिमुक्तिदाम् ।

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

पुनःपुनर्जगद्वितां नमाम्यहं सुरार्चिताम् ॥
जयेश्वरि ! त्रिलोचने ! प्रसीद देवि ! पाहि माम् ।
जयन्ति ते स्तुवन्ति ये शुभं लभन्त्यमोक्षतः ॥
सदैव ते हतद्विषः परं भवन्ति सज्जुषः ।
नराः परे शिवेऽधुना प्रसाधि मां करोमि किम् ॥
अतीव मोहितात्मनो वृथा विचेष्टितस्य मे ।
कुरु प्रसादितं मनो यथास्मि जन्मभञ्जनः ॥
तथा भवन्तु तावका यथैव घोषितालकाः ।
इमां स्तुतिं ममेरितां पठन्ति कालिसाधकाः ।
न ते पुनः सुदुस्तरे पतन्ति मोहगह्वरे ॥

इति श्रीब्रह्मकृतकालीस्तवः समाप्तः ।

इति श्रीपूर्णानन्दगिरिपरिव्राजकपरमहंसविरचितं
श्यामारहस्यं समाप्तम् ॥

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy

CC-0. In Public Domain. Digtized by Muthulakshmi Research Academy